MEGHASANDEŚA

OF

KĀLIDĀSA

WITH THE COMMENTARY SUMANORAMAṆĪ

OF

ṚṢIPUTRA PARAMEŚVARA



PUBLISHED BY
THE UNIVERSITY MANUSCRIPTS LIBRARY
TRIVANDRUM.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1946.

INTRODUCTION

The family of the Payyūr Bhaṭṭatiris is a celeberated one in the history of the Sanskrit Literature of Kerala. It is situated at Porkalam (Sanskritised as Raṇakhala) in the Kunnamkulam Taluk in Cochin State, and it has won immortal fame through the numerous excellent works it produced, especially on the *Pūrva-mīmāṃsā-śāstra*. Parameśvara the author of the commentary *Sumanoramaṇī* on Kālidāsa's *Meghasandeśa* now published hailed from this great home of scholars.

From the verses :

अनुदिनमभिनवरूपा सुमनो[illegible]
हरिचरितकाव्यसमू[illegible] ॥

मन्त्रब्राह्मणसूत्रवित् कृतमतिः शास्त्रे च कौमारिले
कर्ता न्यायसमुच्चयस्य कणिकाव्याख्याप्रणेता कविः ।
उत्पत्तिं त्वघमर्षणप्रवरजाद्गौर्यामृषेराप्तवान्
कर्तास्याः परमेश्वरो नतशिराः पूज्ये गुरौ शङ्करे ॥

कृष्णभवदासभावो भगवति भक्त्याह्वयया च भवदासः ।
वादी वेदान्तरतो यस्य पितृव्यः स एव कर्तास्याः ॥

at the end of the *Sumanoramaṇī*, we are able to understand certain details regarding the author. He was the son of Ṛṣi (1) and Gaurī and belonged to the Aghamarṣaṇa-pravara ; he was the disciple of a Śaṅkara and had a paternal uncle Bhavadāsa, who was a great devotee, a controversialist and a Vedāntin ; and besides the *Sumanoramaṇī*, he has written *Haricarita-kāvya*, *Nyāya-samuccaya* and commentary (or rather commentaries) on *Kaṇikā*, that is, the *Nyāyakaṇikā* of Vācaspatimiśra. We have no information regarding *Haricarita* and *Nyāyasamuccaya*, except that the latter is mentioned in the *Sumanoramaṇī*[1] ; but as regards the

1. P. 9, l. 24.

Kaṇikāvyākhyā we know of two different commentaries by him on he *Nyāyakaṇikā* by name *Juṣadhavaṅkaraṇī* and *Svaditaṅkaraṇī*, he former being the earlier production, as is seen from a manuscript of *Svaditaṅkarṇī* in the Government Oriental Manuscripts .ibrary, Madras, (R. No. 3595), which contains the verse :

जुषध्वङ्करणीव्याख्या रचिताऽस्माभिरादितः ।
स्वदितङ्करणीव्याख्या सम्प्रतीयं (वितन्यते) ॥

and has the colophon :

इति श्रीमदृषिगौरीनन्दनश्रीभवदासपितृव्यश्रीमच्छङ्करपूज्यपादशिष्यपरमेश्वरकृतौ स्वदितङ्करण्यां तृतीयः श्लोकः ।[1]

Besides this Parameśvara (I) and the members of the family mentioned by him, we also know of certain others in that family. Parameśvara (I) had five sons Ṛṣi (II), Bhavadāsa (II), Vāsudeva, Subrahmaṇya and Śaṅkara. This Ṛṣi (II) had by his wife Gopālikā a son Parameśvara (II), who is the author of the commentaries on Maṇḍanamiśra's *Sphoṭasiddhi* and *Vibhramaviveka*, Vācaspatimiśra's *Tattvabindu* and Cidānanda's *Nītitattvāvirbhāva*, and another son Vāsudeva (II), the author of *Kaumārilayuktimālā*, *Devīcarita*, *Śivodaya*, *Satyatapaḥkathā*, and *Acyutalīlā*. Parameśvara (II) had a son Ṛṣi (III), whose son Parameśvara (III) is the author of the *Mīmāṃsāsūtrārthasaṅgraha* and a commemtary on the *Kāśikā* of Sucaritamiśra. These facts can be gathered from the works themselves[2].

1. *Vide* S. K. Ramanatha Sastri : *Sphoṭasiddhi* with *Gopālikā*, Madras University Sanskrit Series, No. 6., Introduction, p. xiii.

2. *Ibid*, Introduction pp. xxi—xxiii ; V. A. Ramaswami Sastri : *Tattvabindu* Annamalai University Sanskrit Series, No. 3., Introduction, pp. 88--91.

Prof. K. Rama Pisharoti (*Indian Historical Quarterly*, Vol. V, p. 678) confounds the three Parameśvaras into one.

The verse :

मण्डनाचार्यकृतयो येऽवतिष्ठन्त कृत्स्नशः ।
तद्वंश्येन मयाप्येषा रचिताराध्य देवताम् ॥

at the close of the *Gopālikā*, commentary on the *Sphoṭasiddhi* by Parameśvara II, has led certain scholars like Prof. Rama Pisha-

Near the home of these Bhaṭṭatiris is a place called Veḷakkāṭu (Sankritised as Vedāraṇya, Srutikāntāra etc.), where there is a temple having several deities the chief of whom is the Goddess Durgā, known in that place as Gopālikā, as it is in the aspect of Māyā, the sister of Lord Kṛṣṇa, she is worshipped there. This Gopālikā was the family deity of these Bhaṭṭatiris. Besides this Goddess, our commentator Parameśvara was also perhaps a worshipper of Lord Gaṇapati in the particular aspect in which he invokes Him at the beginning of *Sumanoramaṇī*, namely, as attended on by Hari, Hara, Maṇḍana and Varāha: Cf.

गणपतिरभिमतमनिशं दिशतु महान् म[illegible]मसुसमासहितः ।
हरिहरमदनधराद्याः सेवन्ते यं सदैव सहदयिताः ॥[1]

roti (*op. cit.*, p. 678) and Vatakkumkur Rajaraja Varma (*Keralīyasaṃskṛtasāhityacaritram*, Vol. I, p. 453) to postulate the view that the Payyur Bhaṭṭatiris were the descendants of Maṇḍanamiśra. Mr. Rajaraja Varma further asserts that this Maṇḍana, a Keraliya, is the author of *Brahmasiddhi*, *Sphoṭasiddhi*, etc., and that he is different from Sureśvara-Maṇḍana, the disciple of Śaṅkarabhagavatpāda (*ibid.* pp. 455—456). This view is not correct. It is clear that the verse मण्डनाचार्यकृतयो etc. cannot have the sense given to it by these scholars. Evidently it only means "Having worshipped the Goddess, this has been written by me who belong to that family in which the works of Maṇḍana have become well established."

1. The worship of this Gaṇapati is described in *Mantraratnamañjūṣā* (Bombay, 1911, p. 17) as follows :—

हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं रसा-
दाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया सन्ततम् ।
बीजापूरगदाधनुस्त्रिशिखयुक् चक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशान् हस्तैर्वहन्तं भजे ॥

. . . .

पूर्वोक्ते पूजयेत् पीठे विधिना गणनायकम् ।
त्रिकोणबाह्ये पूर्वादि चतुर्दिक्षु समर्चयेत् ॥

Uddaṇḍa Śāstri who was a prominent member of the well-known *Eighteen-and-a-half poets* in the court of King Mānavikrama of Calicut, refers to a Maharṣi of Payyūr in his *Kokilasandeśa* in the verse :

किञ्चिरपूर्वो रणखलभुवि श्रीमदध्यक्षयेधा
स्तन्मीमांसाद्वयकुलगुरोस्सद्म पुण्यं महर्षेः ।
विद्वद्वृन्दे विवदितुमनस्यागते यत्र शश्व-
च्छाख्याशाखावलभिनिलयस्तिष्ठते कीरसङ्घः ॥

and to a Ṛṣiputra–Parameśvara in his *Mallikāmāruta* in the words :

कथितमप्येतन्मीमांसकचक्रवर्तिना महर्षिपुत्रेण परमेश्वरेण —

वेदे सादरबुद्धिरुद्धततरे तर्के परं कर्कशः
शास्त्रे शातमतिः कलासु कुशलः काव्येषु भव्योदयः ।
श्लाघ्यः सत्कवितासु षट्स्वपि पटुर्भाषासु स त्वं क्षितौ
सर्वोद्दण्डकविप्रकाण्ड ! दद्से कस्मै न विस्मेरताम् ॥

This shows that a Ṛṣi and his son Parameśvara were the contemporaries of Uddaṇḍa, who belonged to the 15th century A. D. as can be judged from the date of birth of Cennās Nārāyaṇan Nampūtiri, another member of this group of poets, which is given in his *Tantrasamuccaya* as kali 4529 (A. D. 1428)[1] But the exact

अग्रस्थबिल्ववृक्षाधः श्रियं श्रीपतिमर्चयेत् ।
पद्मयुग्मधरा पद्मा शङ्खचक्रधरो हरिः ॥

दक्षिणे वटवृक्षाधो गौरीं गौरीपतिं यजेत् ।
पाशाङ्कुशधरा गौरी टङ्कशूलधरो हरः ॥

पश्चिमे पिप्पलस्याधो रतिं रतिपतिं यजेत् ।
रतिरुत्पलहस्ताढ्या कोदण्डास्त्रधरः स्मरः ॥

सौम्ये प्रियङ्गुवृक्षाधो महीं पोत्रिणमर्चयेत् ।
शुकग्रीवाग्रहस्ता भूर्गदाचक्रधरः पतिः ॥

1. *Vide* V. A. Ramaswami Sastri: *Tantrasamuccaya of Nārāyaṇa* T. S. S. 151, 1945, Preface, p. iii.

identity of these Ṛṣi and Parameśvara is not known. Some scholars[1] tentatively take them to be Ṛṣi(II) and Parameśvara(II). If this is correct, then Parameśvara I, the author of *Sumanoramaṇī* can be placed about 1400 A. D.; otherwise his date will fall between 1400 and 1500 A. D.

A peculiar feature of *Sumanoramaṇī*, not generally met with in commentaries on kāvya works, is that it exists in two recensions a shorter and a longer, the longer being mostly an elaboration of the shorter. A notice of the shorter recension was made by Dr. C. Kunhan Raja in *The Adyar Library Bulletin* (February, 1945) and an account of the longer recension has been given by Prof. V. A. Ramaswami Sastri in the *Dr. C. Kunhan Raja Presentation Volume*. The work here published is the longer recension, and relevant extracts from the shorter recension containing additional and variant matter is given as Appendix I, for, though on the whole shorter, in certain places, it is more complete than the longer. A noteworthy feature of the longer recension is that it sometimes drifts into Śāstraic discussions, as for instance, the discussion as to how the word '*tasmin*' in '*tasmin adrau*' in śloka 2, will refer to '*rāmagiri*' in '*rāmagiryāśrameṣu*' in sloka 1 (pp. 5—6) and the discussion on the psychological process in the actions of a person overpowered with feeling (p. 9).

The commentary is elaborate and original and brings out the suggested ideas in the verses in a style which bears more the stamp of the commentator of Śāstra works than that of the general commentator of the Kāvyas. All the traceable references in it to other commentaries by such expressions as '*kaścit*', '*kecit*', etc., are to the *Vidyullatā* of Pūrṇasarasvatī, and it seems Pūrṇasarasvatī was a contemporary of Parameśvara, as otherwise his poignant criticisms of the *Vidyullatā* will lose much of their force and significance.

1. Ullur S. Parameswara Aiyar: *Vijñānadīpikā*, Part IV, Trivandrum, 1938, p. 151; C. Kunhan Raja: *Poona Orientalist*, Vol. IX p. 146.

The instances are given in Appendix III. Other quotations in *Sumanoramaṇī* are given in Appendix II in which, however, such of the quotations as are not traceable to the source mentioned by the author, are indicated by an interrogation mark after the name of the source.

Though the primary object of this edition is to publish the valuable commentary *Sumanoramaṇī*, it was thought desirable to give the variant readings of the text of *Meghasandeśa* from some of the commentaries and other versions also. With this purpose in view the readings in Dakṣiṇāvartanātha's *Pradīpa* (Dk), Jinasena's *Pārśvābhyudaya* (Jn), Mallinātha's *Sañjīvinī*, (Ml), Mahimasiṁhagaṇi's *Sukhabodhikā* (Ms), Pūrṇasarasvatī's *Vidyullatā* (Ps), *Sāroddhāraṇī* (Sd), Sumativijaya's *Sugamānvayavṛtti* (Sv), Vallabhadeva's *Pañcikā* (Vl), and Viśvanātha's commentary (Vs) have been taken. Of these Dakṣiṇāvartanātha's readings were taken from Trivandrum Sanskrit Series No. 64 (Trivandrum, 1919), Mallinātha's from G. N. Nandikarkar's edition (Bombay, 1894), Pūrṇasarasvatī's from R. V. Krishnamachariar's edition (Srirangam, 1926), Vallabhadeva's from Hultzch's edition (London, 1911), Viśvanātha's from a manuscript of his commentary available in this Library (No. 6960), and the rest from K. B. Pathak's edition (Poona, 1916). A concordance of the verses according to these different commentators is given as Appendix V, and an alphabetical list of the verses not commented upon in *Sumanoramaṇī* as Appendix IV.

This edition of the longer recension of *Sumanoramaṇī* is based on two manuscripts :

A. No. 714 of the University collections in this Library. Palm leaf: 6″ × 1¼″. 117 folios. 7 lines per page and 25 letters per line. Malayalam script. Procured from Nareri Mana, Kutallur, Malabar. Complete and in fairly good condition, but is very old and contains numerous mistakes. On the first folio is written: '*Kūṭallūr mēleḷatte Meghasandeśattinte Sumanoramaṇīvyākhyānam*', and also '*Deśamaṅgalatte vāriyatte Meghasandeśavyākhyānam*'.

B. No. L 747 B of the same collection. Palm leaf: 9¼″ × 1¼″. 25 folios. 10 lines per page and 36 letters per line. Malayalam script. Lent to the Library by Raman Vasudevan Namputiri, Padinjaredattillam, Kanayannur, Cochin State. Manuscript is in good condition, is legibly written and contains very few mistakes. But it is incomplete and begins with the 31st folio which contains the 52nd śloka in the Pūrvasandeśa.

There are several manuscripts for the shorter recension in this Library, but Appendix I was prepared from Ms. No. 5114 which is the best among them. It is a palm leaf manuscript of size 9¼″ × 1¼″. 67 folios. 8 lines per page and 35 letters per line. Malayalam script. It is in very good condition and is very legibly written. Presented to the Library by R. Govinda Pisharoti, Kailasapuram, Kaduthuruthi, N. Travancore.

॥ श्रीः ॥

महाकविकालिदासप्रणीतो

मेघसन्देशः ।

ऋषिपुत्रपरमेश्वरकृत-
सुमनोरमणीव्याख्यया सहितः ।

गणपतिरभिमतमनिशं दिशतु महान् मह्यमसुसमासहितः ।
हरिहरमदनवराहाः सेवन्ते यं सदैव सहृदयिताः ॥

अहाय जह्नुतनयेव मदीयमुच्चै-
राशु निरस्यतु तमस्ततिरक्षराणाम् ।
नानाचराचरविधानगिरेव यस्या
व्याख्यां विचक्षणमतिर्विदधाति वेधाः ॥

सुमनोरमणीव्याख्या मेघदूतस्य रच्यते ।
नादृश्या न विमानार्हा यथाप्यन्वर्थविश्रुता ॥

अत्र खलु कविरतिमात्रं कामिजनावस्थां प्रतिपादयितुं देवस्यापि कस्यचिदतिसक्त्या विरहासहस्य बुद्धिभ्रंशादचेतनं प्रत्यचेतनं मेघं दूतीकर्तुं प्रयासः प्रादुरासीदिति सञ्जातसंज्ञेन प्रबन्धेन प्रतिपादयन् पीठिकामारचयति — कश्चिदिति द्वाभ्याम् —

कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

---

१. Dk. Jn. Ml. St. स्वाधिकारात्प्रमत्तः ।

ननु ग्रन्थारम्भे मङ्गलाचरणं कुर्वन्तो दृश्यन्ते कवयः, किमत्र तदनपेक्षं प्रस्तूयते ? उच्यते । अत्राप्यविघ्नपरिसमाप्त्यादिकार्यदर्शनाद् अनुमानसिद्धमेव मङ्गलाचरणम्, ग्रन्थनिवेशन(मात्र ?)मेव केवलं न कृतम्; तदवश्यकर्तव्यत्वद्योतनायैव क्रियते न तु चिकीर्षितशेषतया, इतरथापि तत्सिद्धेः । कश्चित्तु ग्रन्थनिवेशलिप्सया भित्त्वा कश्चिच्छब्दमंशाभ्यां समानाधिकृताभ्यां जीवपरमात्मनोरैक्याभिधानमातिष्ठते । तत्तावदीदृशेष्वद्वैतासम्बन्धेषु ग्रन्थेषु सकलरूपनिरूपणस्यैव कर्तुं योग्यत्वान्नाद्रियामहे । चित्पदस्य च ज्ञानवाचिनो जीवाभिधायित्वमदृष्टचरम् । तस्माद् ग्रन्थनिवेशं विना मङ्गलविषयमनोवाक्कायव्यापारसद्भाव एवात्रास्थेयः । यदि त्ववश्यं ग्रन्थनिवेशश्रद्धा भवति, तथापि न 'कश्चित्' पदमत्र भिद्यताम्, जनकतनयारामपदाभ्यामेव निरतिशयमङ्गलसिद्धेः । यथोक्तं रघुवंशे —

"राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥" इति ॥

अयमत्र पदानामन्वयक्रमः । **कश्चिद्यक्षो रामगिर्याश्रमेषु वसतिं चक्रे** । कुतः ? **भर्तुः शापेनास्तंगमितमहिमा** । तदपि कुतः ? **स्वाधिकारप्रमत्त** इति । अर्थक्रमस्त्वत्र हेतुहेतुमद्भावावस्थिते वाक्ये अन्वयप्रातिलोम्येन भवति । स प्रदर्श्यते । कुबेरानुचरा हि यक्षास्तेनैकैकत्र कर्मणि नियुक्ताः । तेषु कश्चित् कदाचित् स्वाधिकारात् प्रमत्तः । प्रमादात् स्वव्यापारं न कृतवान् । प्रमादपदेनावधीरणादेर्बुद्धिपूर्वस्य निमित्तस्य व्युदासः । ततोऽनेनापराधेन सञ्जातकोपः स्वामी तमेनं शापेन निग्रहवचनेन यद्‌यमितरयक्षवदस्मदाज्ञाधिकारमधिष्ठातुमलसः मुच्यतां तदन्यतमत्वापादकेन महिम्नापि, नह्यतथाचरणमतथाभावन विना शोभत इत्येवं रूपेणास्तङ्गमितमहिमानमभिभावितदिव्यभावं मनुष्यतुल्यशक्तिमतनोत् । अपराधस्याबुद्धिपूर्वकृतत्वान्नात्र धर्मविनाशनावकाशः इति स्वामिनोऽभिप्रायः । एवमनुचरे मुक्तशापो वैश्रवणस्तत्कृतप्रणमनाद्यनुनयथापितकोपः कालावयवभूतेषु षट्स्वप्यृतुषु तर्हि सकृत्सकृदुपभोगोऽस्तु मा भूदावृत्तिः इति शापं वर्षभोग्यमतनुत । इदं विशेषणं 'शापान्तो मे भुजगशयनात्' इत्यत्रोपयुज्यते । स तु शापो दिव्यभावापगमफलितेन कान्ताविरहेणातिसक्त्या विरहासहस्य गुरुर्दुर्वहो बभूव । इदं विशेषणं प्रबन्धबीजत्वेन कृतम् ।

ये तु कान्ताविरह एवात्र शापविषय इत्याहुः तेषां मतं 'शापादुपलतनुः' 'शापान्मतङ्गजत्वं प्राप्तः', 'शापेन शृङ्खलीभूतः' इत्यादिप्रयोगेषूपलत्वादिवत् शापेनास्तङ्गमितम-

हिमेत्यत्रापि महिमास्तमयस्यैव विषयत्वप्रतीतेर्विरहस्य च कान्ताविरहगुरुणेत्येवमुच्यमानस्य गौरवहेतुत्वमात्रावगमाच्चोपेक्षणीयम् । णिच्प्रत्ययादपि शापो महिमानमस्तं प्रापयतीत्यस्मिन्नर्थे वर्तमानादेष एव विषयो भवति नान्यः । यच्चात्र पदानामाकाङ्क्षाक्रमेणान्वयप्रदर्शनं कृतम् इदमपि महिमास्तमयमेव शापविषयमवगमयति । तथाहि — कश्चिद्यक्षो रामगिर्याश्रमेषु वसतिं चक्र इत्येतदनन्तरस्य तावत् कुत इत्यस्यायमर्थः कस्माद्यक्षो दिव्यस्सन् रामगिर्याश्रमेषु भूमौ वसतिं चक्र इति । तदुत्तरवाक्यस्यापि शापेनास्तङ्गमितमहिमत्वात् निग्रहवचनतिरस्कारितदिव्यभावत्वादित्यर्थः । कुतोऽयं महिमास्तमयविषयशापावकाश इति द्वितीयकुतश्शब्दयोजना । उत्तरवाक्यस्यापि स्वाधिकारात् महिमवत्पुरुषानुष्ठेयाद् व्यापारात प्रमत्तत्वादिति सम्बन्धः । अतोऽन्वयानुसम्बन्धेन शक्यावगमोऽयं विषयविशेषः शापस्य कथमन्यथा कर्तुं शक्यते ।

अथापनीतदिव्यभावो भुवं प्राप्तोऽन्तर्धानाशक्तश्च यक्षो मनुजदृश्यत्वपरिजिहीर्षया तं वर्षं रामस्य चिरवृत्तत्वाज्जनशून्येषु रामगिर्याश्रमेषु वसतिं चक्रे । यक्ष इति देवयोनिविशेषकथनं 'गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम्' इत्यादावुपयुज्यते । रामगिर्याश्रमेष्वित्येतत् 'स्थानादस्मात्' इति मार्गकथने 'तव सहचरो रामगिर्याश्रमस्थः' इत्यत्र चोपयोगि भवति ।

प्रबन्धोपोद्घातभूते त्वस्मिन् श्लोके यक्षस्य नामविशेषानभिधानं वक्ष्यमाणवाक्येषु 'भर्तुर्मित्रं प्रियमविधवे', 'तव सहचरो रामगिर्याश्रमस्थः' इत्यादिषु नाम्नो विशेषणयोगानिवेशासम्भवात् कृतमिति मन्तव्यम् । कश्चित्तु नामविशेषानभिधानं रसानुपयोगात् कृतमिति व्याकृतवान् । तदस्ति तावद्वक्ष्यमाणानुपयोगः । अस्मिन्नपि वाक्ये निक्षिप्यमाणं देवदत्तादिनामपदं न श्रोतृजनचमत्कारं जनयेदि- (त्युपुचयत्वेन ? त्यभ्युच्चयत्वेन) कृतमिति मन्तव्यम् । अत्र 'ददर्श' 'दध्यौ' 'व्याजहार' 'ययाचे' इतिवद् 'उवास' इत्येवमपि शक्यसमापने वाक्ये यदिदं विभज्य धात्वर्थस्य प्रत्ययार्थभूतक्रियायां कर्मत्वकथनं तदनेनैवाश्रमाधिकरणेन वासेन धर्ममपि साधयेयमिति धात्वर्थान्यकरणबुद्धिर्नैव तस्य कदाचिदप्यासीत्, कालयापनमेव तूद्देश्यमभूदिति द्योतयितुं कृतम् । यत्तूत्तरश्लोके मासेष्वतीतेष्वित्यनभिधाय मासान् नीत्वेति केचित, तन्न तथा मन्तव्यम् । 'वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु' इत्येतद्वाक्यवशादाश्रमबहुत्वस्यैवावगमात् इति ।

कीदृशेषु वसतिं चक्र इत्यत आह — जनकतनयेति । रामलक्ष्मणयोः स्थानेन पुण्यत्वमप्युपलक्षयति । ततः पावनत्वातिशयादयोध्यागतसरयूसलिल-

समानि तत्रत्योदकानीत्युक्तं भवति । अनेन विशेषणेन येषु (व)सन्नियमकेन स्नानमात्रेणापि कृतेनाभ्युदयः शक्यसम्पादः तेषु तदप्यकृत्वा वसतिमेव कृतवानिति द्योत्यते । स्निग्धच्छायातरुषु स्निग्धच्छायाभूयिष्ठास्तरवो येषां ते तथोक्ताः । अनेन वासोपयोगितया रम्यत्वं वदति ।

यत्तु कान्ताविरहगुरुणेत्यस्य कान्ताविरहोपदेशाचार्येणेति व्याख्यानम् तद्विरहस्य शापविषयत्वोपजीवनेन कृतत्वात्तन्निरासेनैव निरस्तं भवति । यत् पुनः 'स्वाधिकारप्रमत्तः' इत्यत्राधिकारविशेषानभिधानं रसानुपयोगात् कृतमित्युक्तं तन्नामविशेषानभिधानं रसानुपयोगादितिवदभ्युच्चयत्वेन नेतव्यम् । यत् पुनरयं ग्रन्थः – "अनेनैव कान्तातिसक्तिमूलत्वमपि शापस्यावगम्यते, अन्यथा तद्विरहविषयत्वानुपपत्तेः शापस्य" इति, सोऽपि विरहस्य शापविषयत्वाभावात् प्रलापमात्रमेव । 'शापेनास्तङ्गमितमहिमा' इत्यत्र त्वक्षरार्थः सम्यगुक्तः । अन्तर्धानं प्रापितो दिव्यज्ञानादिमहिमा यस्य स तथोक्तः इति । महिमान्तर्धानस्य शापविषयत्वानङ्गीकार एव दोषः । यत् पुनर्भर्तृपदनिक्षेपस्य प्रयोजनमुक्तं – "भर्तुरिति निग्रहानुग्रहेऽपि शक्तस्यैतावता क्रोधनिवृत्तिर्महान् लाभ इति द्योत्यते" इति तदप्ययुक्तमेव । निग्रहविशेषनियामकेन यथापराधदण्डत्वेन गुणेनान्वितस्य वैश्रवणस्य निग्रहान्तरेच्छासम्भवात् ।

यत्तु "महात्मनोऽपि यक्षस्य महिलासङ्गातिशयादनर्थपरम्परापतिता । अतो विषयेष्वतिसक्तिरनर्थाय, 'विनोदमात्रमेवेदमिति यस्यावधारणा विटवृत्तं स जानाती'त्युक्तया नीत्या वर्तमानो न क्वचिदवसीदति इति ज्ञाप्यते" इत्यादिप्रयोजनकथनं तेन कृतम् । तत्सकलं ग्राम्यमेव । असाधारणप्रयोजनासम्भवे काव्यमात्रसम्बन्धिनां प्रयोजनानां विद्यमानत्वात् । ननु कथमनेन प्रबन्धाक्षरानुपात्तोऽयं प्रयोजनविशेषो विज्ञाप्यते । श्रूयताम् । अत्र हि कश्चिदतिसक्त्या विरहासहः कामार्त्या महद्व्यसनमाप्तवानित्येतावदुपदिश्यते न तु पुरुषविशेषः प्रतिपाद्यते, नाप्यन्ते व्यसननिवृत्तिः । अत एतावतोऽभिधानादेषोऽर्थो गम्यते । यः खलु काममनुसरति न तेनातिसक्ततया विरहासहेन भवितव्यमिति । विशेषानभिधानस्य खल्वेष महिमा भवति यदुच्यमानेऽर्थे तात्पर्याभावबोधनं नाम । भवति च प्रेक्षावद्वचनानां प्रवृत्तिनिवृत्तिपरत्वनियमः । अतोऽनादृतपुरुषविशेषादतिसक्तिकृततावन्मात्रकथनाद् गम्यत एव तत्त्यागपरत्वं ग्रन्थस्य ।

अपि च —

'एकप्रघट्टको यस्त्वेककृतो भवति सूक्तिसमुदायः ।
सङ्घातः स निगदितो वृन्दावनमेघदूतादिः ॥"

इति हि लक्षणकाराः पठन्ति । अत्रैकप्रघट्टकत्वमित्येकपुरुषार्थप्रतिपादकत्वमुच्यते । ततश्च कामेतिकर्तव्यतापर एवैष प्रबन्धः । तस्माद्युक्तमुक्तम् अतिसक्तिं कामिनामत्यन्तहेयां प्रतिपादयितुमिति ॥ १ ॥

'आश्रमेषु वसतिं चक्रे' इत्यनेन तद्देशोचितं व्यापारं विहाय कालयापनमेव तस्योद्देश्यमभूदित्युक्तम् । तदेतद्व्यापारस्य कालयापनैकविषयत्वप्रदर्शनेन समर्थयन्नाषाढादौ मेघस्य दृष्टिपथप्राप्तिं विरहिणां बुद्धिभ्रंशनिदानभूतामाह —

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

तस्मिन्निति । तस्मिन्नद्रौ रामगिरौ । तच्छब्दोऽत्रोपसर्जनीभूतमपि गिरिं स्वशब्दसाहित्यादक्लेशेनैव परामृशेत्, यथा 'राजपुरुषो गतः, स राजा तत्रैव तिष्ठति' इत्यत्रासमस्तेन राजशब्देन स्वप्रधाने राजन्यभिहिते तच्छब्दोऽपि प्रधानवस्तुपरामर्शी मुख्यवृत्त्यैव तत्सामानाधिकरण्यं लभते न वृत्त्यन्तरं कल्प्यते, तद्वदिहापि अद्राविति गिरा स्वप्रधाने निर्दिष्टे तस्मिन्निति तस्यैव परामर्शो नानुपपन्नः । ननु तत्रापि तच्छब्दः पुरुषे गतिस्थितियौगपद्यविरोधादवर्तमान उपसर्जनभूते राजनि लक्षणया वर्तत इति चेत् न । राजपदप्रयोगदर्शनात् । नहि तच्छब्देनैव राजन्यभिहिते सति 'गङ्गायां घोषः' इति वाक्ये तीरपदमिव राजपदं प्रयुज्यते । (पाठस्थे ? प्रयुक्ते) कर्तृविशेषवाचि पदमीदृशेषु सर्वत्रैव । तस्मान्न तावदस्मिन् वाक्ये लक्षणया तच्छब्दो राजनि वर्तते । नापि 'सिंहो देवदत्तः' इति वाक्ये सिंहत्वलक्षितव्यक्तिगतशौर्यगुणयोगाद् देवदत्ते सिंहशब्द इव गौण्या वृत्त्या वर्तितुमर्हति । तच्छब्दस्य बुद्धिसन्निहितवस्तुमात्रगामित्वेनानियतवाच्यस्य वाच्यगतगुणाव्यवस्थया गुणविशेषप्रत्यायकत्वाशक्तः क्रियासम्बन्धपरत्वाच्च वाक्यस्य न गुणसम्बन्धविवक्षा सम्भवति । तस्मात् पूर्वमुपसर्जनस्यापि यस्य स्वपदेन प्राधान्यमाविष्क्रियते तच्छब्दप्रवृत्तिवेलायां तस्मिन् मुख्यवृत्तिरेव तत्समानाधिकरणस्तच्छब्दोऽपि । अत एवाह भगवान् पतञ्जलिः 'अथ शब्दानुशासनम् । केषां शब्दानाम्?' इति । कश्चित्तु 'शब्दानुशासनम्' इति 'तवास्य नीलोत्पलचारुचक्षुषो मुखस्य तद्रेणुसमानगन्धिनः' इति च शास्त्रे काव्ये च प्रयोगदर्शनात् समासे गुणभूतस्यापि परामर्शः क्रियते इति क्लेशकृतोऽयं परामर्श इति व्याचष्टे । तद्व्याख्यानं

---

1. VI. प्रशमदिवसे ।

स्वशब्दसाहित्यकृतं विशेषमनवधाय कृतमित्युदाहृतवाक्यद्वयानुसन्धानादेव सुज्ञेयमिति नादर्तव्यम् ।

स कतिचिन्मासान्नीत्वा आषाढस्य प्रथमदिवसे तस्मिन्नद्रौ मेघं ददर्श-त्यन्वयः । न त्वद्रौ कतिचिन्मासान्नीत्वेति कर्तुरधिकरणमद्रिः स इत्याश्रमेषु वसन्नद्रौ मासान्नीत्वेति सम्बन्धः सम्भवति, देशभेदप्रतीतेः । स्यादेतत् । अद्र्याश्रमपदयोरेकार्थवर्तित्वान्नानुपपत्तिरिति । तदयुक्तम् । एवं हि रामगिर्याश्रमेष्विति कर्मधारयो भवेत् । ततश्च गिरेरेकत्वादाश्रमपदाद् बहुवचनानुपपत्तिः । अपि च एकार्थत्वाभ्युपगमे सति स तस्मिन्नद्रौ मासान्नीत्वेत्यस्य आश्रमेषु वर्तमानः आश्रमे मासान्नीत्वेत्यर्थो दर्शितः स्यात् । तच्चायुक्तम्, तेष्विति बहुवचनान्ततच्छब्दस्यैव तत्र प्रयोगार्हत्वात् । अतः तस्मिन् इति कर्तुर्गिरिविशेषिताश्रमाधिकरणत्वे सिद्धे दर्शनकर्मणो मेघस्यैवाधिकरणमद्रिः, न कर्तुः । अत्राश्रमाणां मनुष्योचितोपत्यकादेशत्वेन मेघाधिकरणत्वाभावादद्रावाश्लिष्टसानुमित्युक्तम् । उपरितने हि देशे सिद्धनिवासादप्यूर्ध्वभागे गिरेः शृङ्गस्थाने समेत्य तिष्ठति । यथोक्तं 'अद्रेः शृङ्गं हरति' इति 'उन्मुखीभिः सिद्धाङ्गनाभिः' इति च । कतिचिन्मासान्नीत्वेति— अनेन तस्य कालनयनैकव्यापारत्वमुच्यते । ननु कालस्य केनचिदप्यनेयत्वात् कथं मासनयनमस्य व्यापारः । नेयमनुपपत्तिः । कालपरिच्छेदकानां सूर्यपरिवर्तनानां प्रहरमुहूर्तादिगणनक्रमेण त्रिंशत्त्वसम्पादनस्यैव मासनयनशब्देन विवक्षितत्वात् । माससंख्यानभिधानमप्युच्यमानेऽर्थे तात्पर्याभावात् कृतम् । ग्रीष्मद्वितीयमासे कश्चिदाषाढः । आश्लिष्टसानुमिति सानुदेशनिविष्टमिति यावत् । कश्चिदत्र सुहृदालिङ्गनसमाधिरित्याह । तदयुक्तम् । कविबुद्धौ गिरिमेघयोरचेतनत्वेन(?)सुहृद्भावात् । 'आपृच्छस्व प्रियसखमालिङ्ग्य' इति तु यक्षबुद्ध्या वक्ष्यति । अस्य तु मेघदर्शनस्य यक्षकृतस्योत्तरश्लोके तद्बुद्धिभ्रमनिदानत्वेन वक्ष्यमाणत्वात् पूर्वावस्थामपि तस्य तद्दर्शनदशासु तत्प्रत्यासन्नामेव दर्शयति — **अबलाविप्रयुक्तः कामी कनकवलयभ्रंशरिक्तप्रकोष्ठ** इति । अत्र 'अबलाविप्रयुक्तः', 'कामी' इति विशेषणद्वये(न) नापूर्वमुच्यते । 'कान्ताविरहगुरुणा' इत्यनेनैवोक्तत्वात् । कथं तर्हि । तत् तृतीयेन विशेषणेन तनुत्वमवस्थान्तरं वक्तुं अनूद्यते । प्रियावियोगेन कारणेन तत्सङ्कल्पानिरतः खल्वसाविति ततस्तदायासवासनया 'मनश्शरीरयोस्तापः परस्परमभिव्रजेद्' इत्यनया स्थित्या कनकवलयभ्रंशकारणभूतं तनुत्वं, प्रतिसारणाकरणोक्तं विषयान्तराभिलाषाभावं, रिक्तप्रकोष्ठवेषाभिव्यञ्जितं लज्जाभावञ्चावासवानित्यन्तेन विशेषणेनोच्यते । ईदृशः स मेघं

ददर्शेति सम्बन्धः । वप्रेत्यादि । सानुनि वप्रशब्दः । 'वप्रः पितरि ना न स्त्री क्षेत्रे रोधसि सानुनि' इति वैजयन्ती । 'तिर्यग्दन्तप्रहारस्तु गजः परिणतो मतः' इत्यमरः । वप्रक्रीडायां दन्तेन तिर्यक्प्रहरता गजेनोपमेयमित्यर्थः । 'दिङ्नागानां पथि परिहरन्' इत्यत्रैतदुपयुज्यते । कालविशेषोपादानेनैव नीलत्वं मेघस्य सिध्यतीति भावः ॥ २ ॥

अथास्य बुद्धिभ्रमकारितं तद्दूतीकरणप्रयासं मेघदर्शनस्य विरहितस्य बुद्धिभ्रमनिदानत्वं च पूर्वोत्तरार्धाभ्यां दर्शयति—

तस्य स्थित्वा कथमपि पुरः केतकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

तस्येति । तस्य मूर्धवर्तिसानुप्रदेशनिविष्टस्येत्यर्थः । **पुरः** समीप इति यावत् । **स्थित्वेति** । अन्तरालदेशव्यापिनीं गतिक्रियां निमित्तीकृत्येत्यर्थात् सिध्यति । **कथमपीति** । अनेन महिमास्तमया(दा)काशगमनाशक्त्या यस्तस्य पादचारक्लेशस्सोऽनूद्यते । **राजराजस्यानुचर** इति । अनेन कन्नवस्थाने पूर्वावस्थास्मारकवाक्यनिक्षेपेण कृतेनास्य विरहासहत्वकृतमेवैतज्जाड्यं न स्वाभाविकमिति द्योत्यते । **दध्यौ** । अत्र कर्मणो बहुत्वादप्रयोगः । अत एवाह — **चिरमिति** । अतः स्वागतवचनादयः स्वव्यापारा मेघविषया उत्तरश्लोकैः सिध्यन्तः सर्वेऽत्र कर्म भवन्ति । स्वसमानविषयबुद्धिपूर्वकत्वाच्चैतत्प्रवृत्तेः । उन्मादिनामपि हि बुद्धिपूर्विकैव प्रवृत्तिः । अनुबन्धा(नुपे ? नवे)क्षणमेव तेषां विशेषः । यत् पुनः 'अस्य प्रियामिति शेषः' इति व्याख्याति तदयुक्तम् ; ध्यानविषयीकृतस्यार्थान्तरस्योत्तरश्लोक एव दर्शयिष्यमाणत्वात् , अस्य सार्वकालीनत्वेन स्थित्या(न)न्तर्याभावाच्च । तथा च वक्ष्यति 'अङ्गेनाङ्गं सङ्कल्पैर्विशति' इति । अस्य तत्पुरःस्थित्यादेर्व्यापारस्य बुद्धिभ्रमकारित्वं द्योतयन्नाह — **केतकाधानहेतोरिति** । अचेतनत्वेन स्वापेक्षितसम्पादनस्याहेतोरिति यावत् । शक्यते हि विरुद्धलक्षणयानपेक्षितार्थविषयशक्तिसम्भवकथनेनापेक्षितविषयशक्त्यभावज्ञापनम् । निद्रासमर्थोऽयं भोजनसमर्थोऽयमित्यादौ कार्यान्तरशक्त्यभावपरत्वदर्शनात् । यत्त्वस्य पदस्य 'विरहिविरोधिनस्सतः' इति व्याख्यानं तल्लक्षणाविशेषात् 'धूमज्योति'रिति विवरणविरो(धा)च्च नाङ्गीकर्तव्यम् । **अन्तर्बाष्पः**

---

१. Dk. Jn. Ml. St. कौतुकाधानहेतोः

अश्रुप्रवृत्तौ सत्यामसौ मां चपलमेव जानीयादिति मत्वा यत्नेनान्तर्निरुध्यमानाश्रुः। मेघालोक इति नीलघनविलोकने सतीत्यर्थः। सुखिनोपीति प्रियतमासान्निध्येनेति सिध्यति। दूरसंस्थ इत्युक्तत्वात् अन्यथावृत्ति दुःखस्पर्शि भवति। अवस्थान्तरे दुःखहेतुस्मरणेनेति भावः। वर्षासु गर्जनभयाद्विशेषेण कण्ठाश्लेषाभिलाषी दयिताजनः। यथोक्तं रघुवंशे—

"पूर्वानुभूतं स्मरता च रात्रौ
कम्पोत्तरं भीरु तवोपगूढम्।
गुहाविसारिण्यतिवाहितानि
मया कथञ्चिद्घनगर्जितानि॥"

इति। अतस्तदभिप्रायेणोक्तं कण्ठाश्लेषप्रणयिनि जन इति। दध्याविति पूर्वक्रिया॥

अथ ध्याननिर्णीतिष्वर्थेषु तावत्साध्यं तदुपायं च तद्बुद्धिविषयं पूर्वार्धेन दर्शयन्नुपायसिद्ध्यनुकूलामुत्तरक्रियामुत्तरार्धेन दर्शयति—

प्रत्यासन्ने नभसि[1] दयिताजीवितालम्बनार्थी[2]
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्।
स प्रत्यग्रैः कुटच[3]कुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार॥ ४॥

प्रत्यासन्न इति। आद्यपादेन साध्यप्रदर्शनं यदा नभसः श्रावणस्य वर्षाख्यमासस्य प्रत्यासत्तिः प्राप्तिर्भविष्यति तदा पूर्वतमाशाबन्धात्मकमालम्बनं न पर्याप्तं भविष्यतीति मत्वा दयिताजीवितस्य दृढमवष्टम्भमिच्छन्नित्यर्थः। द्वितीयपादेनोपायप्रदर्शनम्। स्वकुशलप्रवृत्तिप्रत्यायनमुपायः। कुशलशब्देन जीवनं विवक्षितम्। वीर्यप्राणधारणात्मकं व्यापारं हारयिष्यन्नित्यर्थः। एष हि कामिनोर्विरहे सति जीवनावष्टम्भः यदितरेतरजीवनवार्ताश्रवणम्। यथाह—

"केदारस्येव कोदारः सोदकस्य निरूदकः।
उपस्नेहेन जीवामि जीवन्तीं यच्छृणोमि ताम्।"

इति। जीमूतेनेति — एष चेत् प्रावृषेण्यो जीमूतो वार्ताहरो भूत्वा रक्षां विधास्यति कोऽत्र प्रावृड्भयावकाश इति भावः। प्रत्यग्रैः अभिनवैः। 'कुटचो गिरिमल्लिके'त्यमरः।

---

१. Dk. मनसि
२. Ms. Sd. Sv. ०लम्बनार्थं; Dk. ०लम्बनार्थी
३. All other com. except Dk. read कुटज

कल्पितार्घाय कल्पितोऽर्घः पूजा यस्येति विग्रहः । प्रीतिप्रमुखवचनं प्रियसुहृदागमनेन प्रीतौ सत्यां प्रमुखे भवं वचनमित्यर्थः ॥ ४ ॥

जीमूतेन स्वजीवनवार्तां हारयिष्यन्नित्ययोग्यान्वयार्थपदसमभिव्याहारेणैवं सूचितं विरोधं विवृण्वन्नुत्तरक्रियां दर्शयति—धूमज्योतिरिति—

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः[1] क्व पटुकरणैः प्राणिभिः प्रापणीयाः[2] ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रैणयकृपणा[3]श्चेतनाचेतनेषु ॥ ५ ॥

धूमज्योतिरिति । अनेन मेघ(स्याप ? स्योपा)दानकारणकथनेन शरीरमेव तावदस्य प्राणिशरीरविलक्षणं, दूरे चैतन्यसम्भव इति विवक्षितम् । सन्निपातः संश्लेषः । असमवायिकारणमेतत् । कार्यवाचिमेघपदसामानाधिकरण्यं तु लक्षणया भवति । अत्र संश्लेषकर्तुर्निमित्तकारणस्यावचनेऽप्यन्ते प्रेरणस्वभावस्य मरुतः कीर्तनान्निमित्तकारणमपि स एवेति सिध्यति । सन्देशार्था इति कर्मधारयः । पटुकरणैः तत्तत्कार्यसमर्थज्ञानकर्मेन्द्रियैः । अत्र(ा)क्षेपार्थकक्वशब्दद्वयवता पूर्वार्धेन तादृशस्य सन्देशप्रापणस्येदृशस्य च मेघस्य साध्यसाधनसम्बन्धो नैव भवतीति साध्यसाधननिषेधात्मकः पादद्वयलक्षित एकोऽर्थः कथ्यते इति मन्तव्यम् । इत्यपरिगणयन् इदमयोग्यमित्यनिरूपयन्नित्यर्थः । लक्षणे सम्बन्धः न हेतौ, निरूपणाभावस्य प्रवृत्तिहेतुत्वाभावात् । स्वसमानविषयबुद्धिपूर्वकत्वनियमाच्चे(तः ? तन)प्रवृत्तेः । न हि भ्रान्तप्रवृत्तावपि प्रवृत्तिविषयगततात्त्विकरूपापरिज्ञानमेव प्रवृत्तिहेतुः, किन्तु तत्पूर्वकमभिलषितसंपादनसामर्थ्यपरिज्ञानमेव इति सङ्कलितं सर्वैरपि परीक्षकैः । यत्तु प्राभाकरैरभावात्मनो विवेकाग्रहस्य ग्रहणस्मरणविषयस्य प्रवृत्तिहेतुत्वमाश्रितमिति, तदपि न; तैरपि विवेकाग्रहसहकृतस्य निरन्तरभानस्यैव प्रवृत्तिहेतुत्वाभ्युपगमात् । इयांस्तु विशेषः, यत् ज्ञानैक्यं नाभ्युपगम्यत इति । तत्र च बहु पराक्रान्तं सर्वैरपि परीक्षकैर्लब्धलक्षाश्चैते बभूवुः । अस्माभिरपि 'न्यायसमुच्चये' सर्वं तदुद्योतितम् । तस्मात् प्रवृत्तिविरोधिनोऽसामर्थ्यज्ञानस्य स्वयमनधिकरणस्तत्समर्थोऽयमिति कृत्वा ... . वाक्यार्थः सम्पद्यते । ननु विषयेन्द्रियदोष ... ... रित्यत आह—औत्सुक्यादिति । रागदूषितान्तःकरणत्वादित्यर्थः । गुह्यकः यक्षेष्वेव केचन जात्युत्कृष्टाः निधिपालनादौ नियुक्ता माणिभद्रादयो गुह्यकाः,

---

१. Dk. सन्देशार्थः.

२. Dk. प्रापणीयः.

३. Ml. Ms. Sd. St. Sv. Vs. प्रकृतिकृपणाः.

तेषामन्यतम इत्यर्थः । अत्युत्सुकस्यापि कथमचेतनविषया प्रवृत्तिः क्षुत्तृष्णाद्यभिभूतेष्वदृष्टपूर्वा सम्भाव्यते इत्यत आह—कामार्ता इति । अयमेव क्षुधार्तादिभ्यः कामार्तानां भेदः यदचेतनेष्वपि प्रणयकृपणाः (यान्ता? याच्ञा)लोलुपाः ॥ ५ ॥

अथ याच्ञाप्रकारं दर्शयन् यक्षो भूत्वाह—जातं वंश इति—

जातं वंशे भुवनविदिते पुष्कलावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥

त्वां पुष्कलावर्तकानामादिमेघानां वंशे भुवनविदिते त्रैलोक्यप्रसिद्धे । चराचरप्राणभूतानामपां दानेनेति सिध्यति । जातं पूर्वपुण्यवशाल्लब्धोत्पत्तिम्, अत एव मघोनः इन्द्रस्य प्रकृतिपुरुषं तदीयायास्त्रिलोकीपालनधुरो वोढारं, कामरूपं इच्छाधीनशरीरसन्निवेशम् । इदं तु न प्रशंसामात्रपरं, 'पुष्पमेघीकृतात्मा' 'तिर्यगायामशोभी' 'गत्वा सद्यः कलभतनुताम्'इति वक्ष्यमाणोपयोग्यपि भवतीति मन्तव्यम् । जानामीति त्वां (गुणोत्कृष्टं) उद्दिश्य (क्रियाया?) विशेषणगामित्वनियमात् । तेनेति । यत् त्वामेव गुणोत्कृष्टं जानामि तेन त्वय्येवाहमर्थित्वं प्रार्थयितृत्वं गत इति सम्बन्धः । विधिवशाद् दूरबन्धुरहमिति । दैवप्रातिकूल्याद् भार्यावियुक्तः सन्नित्यर्थः । अनेनार्थित्वप्राप्तिहेतुभूतामात्मन आपन्नावस्थां दर्शयता यदमुमर्थमधिकृत्य मदनुग्रहे भवतः क्षमं तत्किमप्यत्र याच्ञाविषयतया वि(व)क्षितं इति सामान्येन विवक्षितमप्यावेदितं भवति । विधिवशादिति दैवविरोधमेव वियोगे मूलकारणं वदता योऽत्र मुख्यप्रतीकारः सङ्गमनं नाम स तावदशक्यकरणमेवेत्यप्युक्तमेव भवति । अत्र भार्याया बन्धुशब्देनोपादानम् ।

"धर्मे चार्थे च कामे च भार्या पुंसः सहायिनी ।
विदेशगमने चास्य सैव विश्वासकारिणी ॥
न हि भार्यासमं मित्रं"

इति भारतवचनानुसारेण कृतमिति मन्तव्यम् । नन्वत्र याच्यमानार्थस्य तल्लभ्यत्वानिर्णय एवा 'अर्थित्वं त्वयि गतः' इत्यत्र हेतुतया वक्तव्यः, तल्लाभश्च देशकालाद्यपेक्षया कदाचिन्निर्गुणादपि पुरुषाद्भवति गुणाढ्यान्न भवति, तत् किमनेन गुणवत्त्वा(व)ग(मनेऽमेन) याच्ञासिद्धौ हेतुतयाभिहिते(ने)त्याशंक्यानुब(द्ध?न्ध)सामञ्जस्याय गुणवत्यैव

१. Ml. Sd. VI. Vs. पुष्करावर्तकानाम्.
२. VI. बन्ध्या.

याच्ञा(याल्मिकेतव्या ? यां हेतुरभ्युपेतव्या) न सिद्धिरित्याह — याच्ञेति । मोघा लब्धकामेत्युभयत्रापि अपिशब्दो द्रष्टव्यः । मेघेतरे नान्योन्यतुल्ये लब्धकामेतरे च तथा इति द्योतयितुं नपुंसकलिङ्गप्रयोगः ।

'देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक्प्रिये ।' इत्यमरः ॥ ६ ॥

कस्तर्हि मयानुष्ठेयो व्यापारोऽस्यामापदीति विशेषजिज्ञासायामखिलसन्तप्तजन-रक्षणपरमधर्मपरेण त्वया मे प्रिया विरहदहनदन्दह्यमानदेहा मत्सन्देशपीयूषवर्षैकाधीन-जीवना तथा जीवयितव्येति विवक्षितमर्थविशेषं पूर्वार्धेन दर्शयन् जिगमिषितदेशमलकां जिगमिषोत्पादनाय प्रशंसति — सन्तप्तानामिति —

सन्तप्तानां त्वमसि शरणं तत् पयोद ! प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

तापेन तप्यमानेषु न विशेषविषयः भवतः प्रतीकारविधानसामर्थ्यमिति सन्त-प्तानामित्यविशेषोक्तेरभिप्रायः । अमुमेवाभिप्रायं द्योतयन् यौगिकेन पदेन सम्बोधनं करोति — **पयोदेति** ।

'पानीयं प्राणिनां प्राणा विश्वमेव हि तन्मयम् ।'

इति प्रशस्यमानस्य पयसो दानेन सर्वेषां प्राणप्रद इत्यर्थः । **मे सन्देशं प्रियाया हरे**त्यन्वयः । दयिताविश्लेषहेतोरदृष्टकारणस्य पूर्वत्रैव विधिवशादिति दर्शितत्वाद् दृष्टकारणमत्र दर्शयति — **धनपतिक्रोधविश्लेषितस्येति** । अनेन तद्भव्यस्तद्देश-वास्तव्योऽहं, विश्लेषणक्रियाया(मिति ? मपि) ममैव कर्मीभावोऽभूत्, सा तु मद्गृह एव वर्तत इति त्रयमप्येतदर्थादावेदितं भवति । शब्दादावे(द)नं तूक्तिचातुर्यभङ्ग-भयात् सौहृदफल्गुत्वप्रतीतिभयाच्च न कृतमिति मन्तव्यम् । अत्र क्रोधशब्देन तत्कार्य-भूतः शापो लक्षणया विवक्षितः । विश्लेषितशब्देन तत्कारणभूतो महिमास्तमय इति प्रथमश्लोकानुसारेण द्रष्टव्यम् । ततश्च 'शापस्यान्ते विगलितशुचा' 'शापान्तो मे भुजगशयनाद्' इत्यन्ते शापपदानुवादोऽ(दृशम ?)प्युप(प)न्नो भवति । एवं धनपति-राजधानीवासिन्याः प्रियाया हरेत्येतावतोऽर्थस्य पूर्वार्धेनैव लब्धत्वेन गमनविधाना-सम्भवात् तदनुवादेनालकाप्रशंसापर उत्तरार्धः । या ते गन्तव्या नगरी सा यक्षे-श्वराणां वसतिरलका नाम इति तृतीयपादे वचनव्यक्तिः । माणिभद्रादीनुपान्तेश्व-रानपेक्ष्य बहुवचनप्रयोगः । अनेन परिकरसमृद्ध्या धनपतिदेश्या बहवः सन्ति

तत्रेति स्तुतिः । नामशब्दो रमणीयताप्रसिद्धिं स्मारयति । अस्ति खल्वियमपरा सर्वकालभाविनी पुण्यानुबन्धिनी च रमणीयता तस्यामिति चतुर्थपादः ॥ ७ ॥

आस्तामिदं प्राप्यदेशस्य रमणीयत्वम् । मार्ग एव तावत् त्वदनुग्रहीता प्रोषितानां वनिताः निजनयनकुवलयानां त्वां पात्रीकरिष्यन्तीत्याह— त्वामारूढमिति —

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः ।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥

पवनपदवीमाकाशं **आरूढम्** । अलकाभिगमनायेति शेषः । पर्वतादुत्थाय गगने दृष्टिविषयतां प्राप्तमित्यर्थः । **उद्गृहीतालकान्ताः** प्रियविरहान्नयनप्रदेशे लम्बमानानलकानुद्गृह्येत्यर्थः । प्रशब्दः ईक्षणभूयस्त्वं तन्मूलभूतमादरं च द्योतयति । **पथिकवनिताः** विरहिणां दाराः **प्रत्यया**द्विश्वासात्, (स?स्व)भर्त्रागमन इति सिद्ध्यति । **आश्वसन्त्यः** प्राणानां धारणे बुद्धिं कुर्वन्त्यः । विश्वासहेतुभूता व्याप्तिस्तृतीयपादेन प्रदर्श्यते । क्षेपे किंशब्दः । **सन्नद्धे** प्रोषितानां (त?स्व)रामुत्पादयितुमिति 'यो वृन्दानि' इति वक्ष्यमाणवाक्यात् सिद्ध्यति । **विरहविधुरां** विरहक्लिष्टाम् । 'व्यथ भयचलनयोः' इत्यस्माद्धातोः 'व्यथेः सम्प्रसारणं धः किच्च' इति विधुरेति रूपसिद्धिः । उपेक्षानिषेधेनोपादाननिश्चयो विवक्ष्यते । नन्वन्योऽपि सर्वो जनस्त्वद्विध एव, तत् कथमन्यागमनमत्सन्नाहयोर्व्याप्तिसिद्धिरित्यत आह — **न स्यादन्योऽप्ययमिव जन** इति । अन्यः सर्वो मत्साधर्म्यं वहतीत्येतत्तु नैव सम्भाव्यते इत्यर्थः । किंधर्मा भवानित्यपेक्षायामात्मानं धर्मविशेषेण गमनाभावहेतुभूतेन युक्तं दर्शयति **यो**ऽस्मि **पराधीनवृत्ति**रिति । केचित्तु— अन्योऽपि **यः** पुमान् पराधीनवृत्तिः स्वात्मवैधर्म्येणोदाह्रियते इत्याहुः । तत्र तावद्व्यवहितान्वयो भवति, अपिशब्दोऽपि न सम्बन्ध्येत । साधर्म्ये हि गुणक्रियासामान्यैरपिशब्दप्रयोगो भवति, न वैधर्म्ये । 'रामः शुक्लः कृष्णोऽपि कृष्णः', 'रामः शेते कृष्णोऽप्यास्ते', 'प्रथमो रामो ब्रह्मः द्वितीयतृतीयावपि क्षत्रियौ' इत्यसम्भवात् । यत् पुनरत्र स क इति (त?श)ब्दाध्याहरणं क्रियते तदपि नास्मत्पक्षे भवति ॥ ८ ॥

---

१. Dk. Ml. Ps. Sd. प्रत्ययादाश्वसत्यः.
२. Dk. Ml. Sd. Vl. Vs. ॰प्यहमिव.

अथ सपदि निमित्तद्वयानुगुण्यं पश्यंस्तद्द्वयं तस्य फलद्वयं च दर्शयति — मन्दं मन्दमिति द्वाभ्याम्—

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते[1] सगन्धः।
गर्भाधानक्षम[2]परिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगाः[3] खे भवन्तं बलाकाः॥ ९॥

अनुकूलः वार्ष्टिकः **वामः** वामभागस्थितः। चातकशब्दस्य वामतः प्रशस्तत्वं '**योगयात्रा**'यामुक्तं —

'वामाः प्रशस्ताः गृहगौलिका च
पुंसंज्ञिका ये च पतत्रिणोऽन्ये।'

इति। '**महायात्रा**'यामपि श्रवणव्यतिरिक्तेषु तस्य प्रशस्तत्वमुक्तमेव।

"न तु भाद्रपदे ग्राह्याः सूकराश्च वृकादयः।
शरद्यजागलीक्रौञ्चाः श्रावणे हस्तिचातकाः॥"

इति। चशब्दः सम्बन्धार्थः। द्वाभ्यामपि क्रियाभ्यामानुगुण्यकरणं नामैका क्रिया लक्षयितव्या। वायुश्चानुगुण्यं करोतीति। **सगन्धो** बन्धुः। एतत्फलस्य मेघगामित्वकल्पनायां बीजभूतमिदं विशेषणम्। एवमुत्पत्तिक्रमेण निमित्तद्वयं दर्शयित्वा फलद्वयं चोत्पत्तिक्रमेण (निमित्तद्वय?) उत्तराभ्यामर्धाभ्यां कथयति। यथाशब्दबलात् तथाशब्दो द्रष्टव्यः। यथेदृशनिमित्तद्वयं भवति तथा नूनं भवन्तं बलाकाः सेविष्यन्ते। तां चावश्यमव्यापन्नामेव द्रक्ष्यसीत्येकोऽयमर्धत्रयोक्तो वाक्यार्थः। अत्र प्रथमेन निमित्तेनोद्देश्यसिद्धौ सूचितायां द्वितीयं फलान्तरं सूचयत् प्रयोज्यकर्त्रा बान्धवसम्बन्धविशेषात्तद्वाभ्येव फलं सूचयेदिति भावः। **गर्भाधानक्षमपरिचयात्** गर्भाधानसिद्धये पर्याप्ताद्विस्रम्भाल्लोकप्रसिद्धतया विद्यमानाद्धेतोः, न तु मयूरादिसुहृदन्तरसाधारणात् स्वागतसम्भाषणादिमात्रपर्यवसायिनः परिचयाद्धेतोरित्यर्थः। **आबद्धमालाः** पङ्क्तीकृताः **खे** गन्तव्ये मार्गे सर्वत्रैवेत्यर्थः। अत्रालङ्कारः समाधिः॥ ९॥

---

१. Ms. Sd. Sv. Vs. चातकस्ते सगर्वः; Vl. चातकस्तोयगृध्नुः.

२. Vl. ०स्थिरपरिचयात्; Jn. Vs. ०क्षणपरिचयात्.

३. Jn. Ml. Vl. Vs. नयनसुभगं.

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशप्राणमप्यङ्गनानां
सद्यःपातप्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥

तामिति । दिवसगणनातत्पराम् [1]। अनेन शापसमयावसान एव नैराश्या-द्व्यापत्तिसम्भावना भवतीति निमित्तगम्यैवाव्यापत्तिः समर्थ्यते । एकपत्नीं पतिव्रताम् । एक एव पतिर्यस्या इति बहुव्रीहिः । 'विभाषा सपूर्वस्य' इति नकारः । अनेन 'धर्मो रक्षति' इति वचनप्रामाण्यादप्यव्यापत्तिरेव निश्चीयत इत्युच्यते । अविहतगतिः अन्त-रायैरविच्छिन्नगमनः । ननु स्वभावतो मृदुहृदया आपत्तिदशाः सोढुमक्षमा वनिताः, तत् कथं दिवसगणनातत्परामित्यादिनाव्यापत्तिसमर्थनं क्रियते । आह, आशाबन्ध इति । आशाबन्धोऽङ्गनानां हृदयमपि रुणद्धि इत्यन्वयः । वियोगवेदनायाः व्यापत्तिं कारयन्त्याः प्रतिबन्धोऽयमाशाबन्धः । अतस्तदभाव एव सा स्वकार्यमारभत इत्यर्थः । अङ्गनानां हृदय(स्य ?)म(पीत्य)पिशब्दसूचितं विशेषमाह — कुसुमसदृश-प्राणमिति । प्राणशब्दो बले वर्तते । 'प्राणो वायौ बले स्थैर्ये पुंसि भूम्न्यसुवाचकः,' इति केशवः । विप्रयोगे सद्यःपातप्रणयीति सम्बन्धः ॥ १० ॥

अथ सहायसम्पादनं मेघस्य स्वायत्तमेवेति मत्वा तत्रोपायमुपदिशति— कर्तुमिति

कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां[3]
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

यन्महीं भूमण्डलम् । उच्छिलीन्ध्रामुद्भूतकन्दलां अत एवावन्ध्यां कर्तुं प्रभवति वृष्टिद्वारेति सिध्यति । तत् तथाविधम् । ते गर्जितं श्रुत्वा मानसोत्काः वर्षोद्वेगान्मानसं सरो गन्तुमुत्सुका राजहंसा आकैलासात् स्वप्राप्यदेशं यावत् भवतः सहायाश्च सम्पत्स्यन्त इति सम्बन्धः । बिसेत्यादि । तव भरणीयाश्च मानेन भविष्यन्तीत्यर्थः । राजहंसशब्देन जात्यौत्कृष्ट्यं वदति । अतो राजहंससहा-यशब्दाभ्यां 'एको न गच्छेदध्वानं' इति, 'न स्थातव्यं न गन्तव्यं कदाचिदसता

१. All other com. except Dk. and Ps. read. सदृशं प्रायशो ह्यङ्गनानां.
२. All other com. except Dk. Ps. and Vl. read सद्यःपाति प्रणयि.
३. Dk. °मुत्सिलिन्ध्रां; Ju. St. Vl. °मुच्छिलिन्ध्रां; Vs. °मुच्छिलीन्ध्रातपत्रां.

सह' इति च निषेधद्वयं नातिक्रान्तं भवेदित्युक्तं भवति । भवच्छब्दनिर्देशेन तेषामपि श्लाघ्योऽयं सम्बन्ध इति द्योत्यते । भवतो राजहंसा इत्यत्रेयमपि विवक्षा — ते लोहितचञ्चुचरणाः सिताश्च, त्वं तु नीलतरः; अतस्तैः सहितः परभागलाभात् विशेषदर्शनीयो भविष्यसीति । नभसीति । अनेन तेषां नभोव्यापित्वात् त्वन्मार्गेऽपि सुलभास्ते इत्युच्यते । श्रवणसुभगमित्यत्र श्रोत्रवतां सर्वेषामिति शेषः । वर्णाव्यभिचारादिति (तेः ? हेतोः) । ततश्चानेन विशेषणेन प्रस्थानसमये तेषामाशीर्वादानपि श्रोष्यस्येवेति द्योत्येत ॥ ११ ॥

एवं 'जातं वंशे' इत्यादिभिः षड्भिः श्लोकैः सन्देशहरणप्रार्थनापुरस्सरं प्रवृत्तिसिद्ध्यनुरूपाण्यलङ्कारमणीयवादीन्यर्थान्तराणि दर्शितानि । अथ यात्राङ्गभूतं प्रथमानुष्ठेयमर्थमाह — आपृच्छस्वेति —

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवता यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥

आपृच्छस्व गमनायानुज्ञानं गृहाणेत्यर्थः । अत्र कारणमाह — प्रियसखं इति । युक्तरूपं चानेन भवतः सख्यमित्याह — तुङ्गमिति । 'यद्यद्विभूतिमद्' इति वचनादाकृत्यैव लोकोत्तरत्वसूचकमित्यर्थः । आलिङ्ग्येति । आलिङ्गनं हि सख्युः सम्भावनमिति भावः । इतश्च युक्तमेवानेन सख्यमित्याह — वन्द्यैरिति । यथा त्वमिन्द्रेण सङ्गतस्तथा स उपेन्द्रेण इति साम्यमनेनोच्यते । सखित्वमेव व्यनक्ति — काले काले इति । प्रतिसंवत्सरमित्यर्थः । यस्य स्नेहव्यक्तिरिति षष्ठी सप्तमीं लक्षयति । यस्मिन्नमुष्मिन् स्वविषयस्य स्नेहस्य व्यक्तिराविर्भाव इत्यर्थः । विरहशब्देन तद्दुःखं लक्ष्यते । बाष्पमम्बुधूमम् । 'बाष्पाश्रुण्यम्बुधूमेऽपि' इति वैजयन्ती । ननु यदि बाष्पशब्देन जलधूमो विवक्षितः कथं तर्हि तन्मोचनेन स्नेहव्यक्तिर्भवेत् , अश्रुमोचनस्य हि तया व्याप्तिरवधृता । अस्तु तर्ह्यश्रुविवक्षेति चेन्न, तस्य पर्वतेष्वविद्यमानत्वात् । स्यादेतत् । अस्ति तावत्सुहृत्सङ्गमकालजनितोष्णबाष्पमुक्तेः स्नेहव्यक्त्या व्याप्तिः । असा(विति ? वपि) मेघसङ्गमे तथाविधबाष्पं मुञ्चत्येव । अतोऽसत्यप्यर्थैक्ये स्नेहव्यक्तिरुपचाराच्छक्या वर्णयितुमिति तच्च न घटते । अत्र आपृच्छनं कारयितुं

1. All other com. except Dk. Ps. and Vl. read भवतो.

सखित्वोपपादनं क्रियते । अतो यथार्थमेव वक्तव्यम् । न ह्युपचारवादेन कश्चित् प्रवर्तते निवर्तते वा । अतो (यथा?) नैव ज्ञायते कात्र गतिरिति । अत्र ब्रूमः । न तावदुपचारवादोऽयं येन विवक्षितसिद्धिर्न स्यात् । एष खलु स्वव्यवहारोपयोगिनां मेघगिरिसरित्प्रभृतीनां पुलिङ्गादिशब्दवाच्यानामर्थानामस्माकमिव चेतनत्वपुंस्त्वादिकं भ्रान्त्याभ्युपगच्छति इति 'जातं वंशे' इति श्लोके कविनैव दर्शितम् । अतोऽत्र बाष्पशब्दवाच्यस्याम्बुधूमस्य गिरिनिष्ठस्य तदश्रुत्वाभिधानमपि न दोषाय भवति । एवं च 'विहगश्रेणिकाञ्चीगुणायाः', 'दर्शितावर्तनाभेः', 'प्रालेयास्रं', 'कमलनयनात्' 'करुधि', 'सलिलवसनं', 'मुक्तरोधोनितम्बं', 'शफरोद्वर्तनप्रेक्षितानि', 'विद्युत्कलत्रः', 'विद्युदुन्मेषदृष्टिम्' इत्यादीन्यपि सङ्गच्छन्त एव ॥ १२ ॥

ननु यदिदं प्रस्थानाङ्गमनुज्ञाग्रहणं अस्य खलु 'चिरं न तत्र स्थातव्यमनुज्ञातेन भूभुवा' इति वचनात् तदविदूरप्राक्कालनियमोऽप्यस्त्येव । अतो (यो?)ऽत्र सन्देशश्रवणे वृत्तकर्णोऽयं तूष्णीमास्ते इति मत्वा सन्देशं विवक्षन् मार्गज्ञानेऽप्यस्य मा भूत् तत्र तत्र नरान्तरापेक्षा, मार्गमप्यहमेव सम्यक्कथयामि, तत्र चोपयोगक्रमानुसारेण सन्देशं पृष्ठीकृत्य मार्गं तावत् कथयामीत्याह — मार्गमिति —

मार्गं मत्तः शृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद! श्रोष्यति श्राव्यबन्धम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥ १३ ॥

मार्गम् । कथयामि तावत्त इति शेषः । योऽत्र कथनाङ्गभूतो मनोव्यापारः तं प्रथमत एव साधु निर्वर्त्याधुना प्राग्व्यापार एवावस्थितोऽहमिति । शतृप्रत्ययेन लाघवं द्योत्यते । त्वत्प्रयाणानुरूपं इति । आनुरूप्यमुत्तरार्धेन प्रदर्श्यते । श्राव्यबन्धं श्रवणसुखावहपदग्रथनम् । पदं न्यस्य विश्रम्येति यावत् । यत्र यस्मिन् मार्गे खेदोऽध्वश्रमः क्षयः सलिलविच्छेदः ॥ १३ ॥

१. Ml. Ps. Vl. Vs. तावच्छृणु.
२. Vl. प्रयाणानुकूलम् .
३. Ml. Vl. Vs. श्रोत्रपेयम् .

अथ मार्गं प्रतिपादयन् प्रास्थानिकेतिकर्तव्यताप्रतिपादनपुरस्सरं जिगमिषित-देशानुगुणां दिशं तावदादिशति —

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥ १४ ॥

अद्रेः शृङ्गमिति । प्रास्थानिकवेगातिशयात् त्वद्रूपं विशेषतो ज्ञातुमसमर्थाः प्रबलपवननीयमानगिरिशृङ्गात्मतां भ्रान्त्या मन्यमानास्त्वद्वेगातिशयादेव स्वयमपसर्तुमलब्धावसराः स्वनिवास एव गिरिसानुष्ववस्थितास्तत्पतनभयादतिचकितनयना उन्मुखा उपरि यथा त्वां सिद्धाङ्गनाः पश्येयुः तथाऽस्मात् स्थानात् खमुदङ्मुख उत्पतेति वाक्यार्थः । अत्र पुंसामपि समाने संशयेऽङ्गनाग्रहणं मुग्धपदविशेषणं च रसौपयिकतया कृतमिति मन्तव्यम् । यत् खलु साध्यं मन्दोत्साहं प्रक्रम्यते तत् प्रायशो दुःसाधं भवति, नायं प्रवृत्तिशूर इत्यवज्ञातश्च कर्ता भवति । अतस्तत्परिहारायादौ सातिशयवेगः सम्पादनीय इतीतिकर्तव्यतामभिदधतोऽभिप्रायः । सरसनिचुलात् सलिलेन वेतसेन च सहितात् । अनेन शीतल ···। दिङ्नागानां दिग्गजानां वप्रक्रीडार्थं प्रतिपर्वतं स्वैरं चरतामिति सिध्यति । स्थूलहस्तावलेपान् स्थूलैः हस्तैरेवावलेपाः प्रहाराः गजप्रेक्षणीये त्वयि प्रतिगजभिया सम्भावितास्तानित्यर्थः ॥१४॥

अथ पुरस्तादुत्पद्यमानमिन्द्रधनुः पश्यंस्तदभिधानपुरस्सरं तेनास्य यात्राकाले भवित्रीं शोभामावेदयंस्तत्तिरोधानात्प्रागेव गन्तव्यमित्याह—

रत्नछायाव्यतिकर इव प्रेक्षणीयं पुरस्ता-
द्वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥

रत्नच्छायेति । वल्मीकाग्रादपि धनष उत्पत्तिर्ज्योतिश्शास्त्रे ··· ।

१. DK. वहात ।

२. VI. गोपवेषास्य ।

"जलमध्येऽनावृष्टिर्भुवि सस्यवधस्तरूत्थिते व्याधिः ।
वल्मीके शस्त्रभयं निशि सचिववधाय धनुरैन्द्रम् ॥"

इति । बर्हेणेति, बर्हग्रथितं चूडाभरणमुच्यते । गोपवेषस्य विष्णोः इति व्रजे पशुपालनं कुर्वतोऽनुपनीतावस्थस्येत्यर्थः । राजधान्यां वसतो राजवेषं बिभ्रतः किरीटाद्याभरणानामेव पुराणेषु श्रवणात् । अत्र तु कृष्णे विष्णुपदप्रयोगात् गोपवेषपदप्रयोगाच्च विष्णुरेवायं कृष्णो न तु विष्णोरंशावतार इति द्योत्यते । तथा च श्रीभागवते श्लोकः—

"एतेंऽशांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥"

इति । ननु

'चापमैन्द्रमनुलोममखण्डं
प्रोज्वलद्बहलमायतमिष्टम् ।'

इति निमित्तशास्त्रवशाद्यात्रायामिन्द्रधनुःखण्डदर्शनं दुर्निमित्तमेव भवति, तत् किमित्येतत्तिरोधानात् प्रागेव गन्तव्यमिति प्रतीतिमुत्पादयितुमाहेति व्याख्यायते । उच्यते अखण्डं चापमित्युक्ते सखण्डोऽन्तराले क्वचन किञ्चिद्विच्छेदवाची च तदा खण्डशब्दो, न विच्छिन्नवाची । धनुःखण्डमित्युक्ते चैकदेश एव प्रतीयते नावयवी, विच्छिन्नद्रव्यवाची च खण्डशब्दः 'मोदकखण्डमस्मै प्रयच्छ' इतिवत् । अवयवश्च निमित्तशास्त्रे न विहितो नापि प्रतिषिद्धः । कृष्णौपम्यसम्पादनादादर्तव्यश्च भवतीति युक्तमेवेदं शीघ्रगमनबुद्ध्युत्पादनाभिप्रायकथनम् । उदङ्मुख इति यदुक्तं तत् प्रायिकम् ॥ १५॥

कारणवशाद्दिगन्तरमप्यचिरेणैव गन्तव्यं भवतीत्याह—त्वय्यायत्तमिति—

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यः सीरोत्कषणसुरभिक्षेत्रमारुह्य मालं
किञ्चित् पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥

१. All other com: except Dk. and Ps. read भ्रूविकारानभिज्ञैः ।

कृषिफलं सस्यसम्पत्तिः देवमातृकत्वात्त्वदायत्तमित्यस्माद्धेतोः **जनपदवधूलोचनैः पीयमानः** सन् प्रभूतया वृष्ट्या सद्यस्त्वत्प्राप्तिसमय एव । **सीरोत्कषणेन सुरभि क्षेत्रं** केदारं **यथा** भवति तथा । **किञ्चित् पश्चात्** पश्चिमस्यां दिशि स्थितमुन्नतत्वान्मालाख्यया प्रसिद्धं देशमारुह्य **भूय एव** भूयोऽपि **उत्तरेण** दिग्भागेन **व्रज** इति वाक्यार्थः । **भ्रूविलासानभिज्ञैरिति** नागरिकवधूलोचनान्ये(वै)तदभिज्ञानीति भावः । **कस्तर्हि** तदीक्षितानामस्माकमनुभावोऽत आह — **प्रीतिस्निग्धैरिति** । स्निग्धत्वेन गुणेन स्वाव्यभिचरितां प्रीतिं सूचयद्भिरित्यर्थः । भ्रूविलासातिशायी खल्वेष गुण इति भावः । **लघुगतिरिति** अक्लिष्टगमन इत्यर्थः । अनेन पूर्वाङ्गीकृतो वेग आदिकर्मण्येव कर्तव्यः, न गतिमात्रेण सम्बन्धनीय इत्युच्यते ॥ १६ ॥

अथ तदनुरूपं विश्रमस्थानमाह—त्वामिति—

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १७ ॥

इतः पूर्वं वृष्ट्यभावादवश्यंभाविनि गिरिवनदाहे त्वत्प्राप्तिसमकालदृश्यमाने सन्तप्तानां शरणभूतो भवान् वेगवद्वर्षेण तदुपशमनं तावदनुक्तोऽपि करिष्यत्येव । तथा त्वयोपकृतः सन् **आम्रकूटो** गिरिः **साधु** सादरं **मूर्ध्ना वक्ष्यति** वहनेन प्रत्युपकरिष्यतीत्यर्थः । **अध्वश्रमपरिगतं** प्रत्युपकारयोग्यावस्थमित्यर्थः । सुखदप्रदेशवाची **सानुशब्दः** । 'षणु दाने' इति धातोः सनोति ददाति सुखमिति सानुः । त्वया प्रथममुपकृतो वहनेन प्रत्युपकरिष्यतीत्युक्तमेवार्थं समर्थयन्नाह — **न क्षुद्रोऽपीति** । (क्षुद्रोऽपि) नीचोऽपीत्यर्थः । **प्रथमसुकृतापेक्षया** पूर्वोपकारं निरूप्य न **विमुखो भवतीत्यन्वयः** । **तथोच्च** इति । तथाशब्देन उन्नतेरपि वादासिद्धिं दर्शयति । **किं पुनरिति** । स तु न पूर्वोपकारमपेक्षते, त्वमिव प्रथमोपकारमपि कुर्यादेव । प्रत्युपकारमपि न संश्रयादिक्षुद्रप्रयोजनार्थिने करिष्यति ? प्राणैरपि करिष्यत्येव । न च **प्राप्ते मित्रे** मित्रं प्राप्यापि करिष्यतीत्यर्थः । प्रथमसुकृतमिदं वनोपप्लवशमनाविधानं सर्वपर्वतगामित्वेन द्रष्टव्यम् । अत एव 'दग्धारण्येषु' इत्यनन्तरे विन्ध्ये 'तच्चेद्वायौ' इत्यन्तिमे हिमवति च दर्शितम् ॥ १७ ॥

---

१. Dk. °द्रवोपप्लवम् ।

अयं च तस्यापरो लाभस्त्वत्सङ्गमात् प्र(भृ)ति यावत् त्वत्सङ्गमनमनुवर्तमानस्त्वया तेन चाऽचिन्तितपूर्वो भविष्यति, अहो सत्सङ्गमस्य महिमेत्याह— छन्नोपान्त इति –

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः सर्पवेणीसवर्णे[१]।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १८ ॥

परिणतफलद्योतिभिः पक्वैः फलैः शोभमाना ये तैः काननाम्रैः छन्नोपान्तः प्रावृतपर्यन्तः सन् अचलः सर्पवेणीसवर्णे मेचकरुचौ त्वयि शिखरमारूढे नूनममरमिथुनप्रेक्षणीयां अवस्थां यास्यति। कस्तदाऽमरमिथुनप्रेक्षणीयत्वावकाशोऽत आह— मध्ये श्यामः शेषविस्तारपाण्डुरिति। किमत आह— भुवः स्तन इवेति। तादृशे बृहति स्तने स्त्रीपुंसयोर्द्वयोरप्यभिलाषो भवतीति मिथुनपदं प्रयुक्तम्। महीतलवासिना-(वस्मा ?)मस्मादाधिकं प्रयोजनं किञ्चिदस्ति इति द्योतयितुममरपदविशेषणं कृतम्। सर्पवेणीशब्दे वेणशिब्दः केशसंकुचितरूपे मुख्यवृत्तिः, सर्पसंकुचितरूपं सादृश्याद्वदति। सङ्कोचश्च वृत्ताकार एव भवति सर्पाणाम्। अतो वेष्टितविग्रहेण सर्पेण समानवर्णत्वर्थः सिद्धो भवति ॥ १८ ॥

अथ मालदेशे गिरौ च कृतयातिवृष्ट्या विच्छिन्नतोयस्यास्य नदीपर्वतान्तराले तोयार्थिजनदृश्यत्वं मा भूदिति मत्वा शीघ्रगत्या तद्देशातिक्रमणं विदधाति— स्थित्वेति—

स्थित्वा तस्मिन्[२] वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गात्[३] द्रुततरगतिस्तत्परं वर्त्म तीर्णः।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ १९ ॥

वनचरेति। अनेन म्लेच्छजनाश्रयसम्भूतस्स गिरिः, अतस्तत्रत्यवनवृत्तान्तदिदृक्षया न दृष्टिर्देयेत्युच्यते। अत एवाह मुहूर्तमिति। यावता श्रमापगमस्तावदेव स्थातव्यमित्यर्थः। तोयोत्सर्गादिति पञ्चम्यन्तः पाठः। तोयोत्सर्गाद्धेतोः द्रुततरगतिर्भूत्वा तत्परं वर्त्म तीर्णः सन् विन्ध्यपादे विशीर्णां रेवां द्रक्ष्यसीत्यस्मिन्

१. All other com. except Dk. and Ps. read स्निग्धवेणीसवर्णे।
२. Jn. तस्मिन् स्थित्वा।
३. Dk. Jn. Ml. Ps. Vl. तोयोत्सर्गद्रुत०।

वाक्ये तीर्णपदं यावत् तोयोत्सर्गादिति पदमनुसृतमिति मन्तव्यम् । कश्चित्तु 'तोयोत्सर्गेण कृतेन गलितगौरवतया शीघ्रतरगमनः' इति तोयोत्सर्गस्य द्रुततरगतिसिद्धिमेव प्रयोजनमभिहितवान् । तदयुक्तम् । 'अद्रेःशृङ्गं' इत्यत्र तोयपूर्णस्यापि स्वरूपाच्छादनक्षमवेगसम्पादनशक्तेरुक्तत्वात् । किञ्च अनन्त(र)भावितोयादानविधिविरुद्धं चैतद्व्याख्यानम् । तथाहि पूर्वमुभयत्र वृष्टिं विहितवता यक्षेण स्वेनैव कारितस्य तोयोत्सर्गस्यानेन श्लोकेन द्रुततरगतिलाभे प्रयोजने कथिते सत्युत्तरश्लोके द्रुतत्वविरुद्धं तोयादानविधानं न घटते । न च वाच्यं तोयमादायेति । तोयादानं प्रत्यनुमतिरेवात्र क्रियते न विधिरिति, विध्यभावे'ऽन्तस्सार'मित्यादानप्रशंसानन्वयप्रसङ्गात् । तस्माद्वदान्यताप्रसिद्धिभङ्गापादकं रिक्तावस्थायामर्थिनः दृश्यत्वं परिहर्तुं द्रुतगत्यादिविशिष्टनदीप्राप्तिविधानमेवैतत् , न तु शीघ्रतरगतिविधानमात्रपरम् इति । द्रक्ष्यसीत्यनेन दर्शनीयतरत्वं तस्याः सूचयति । कीदृशं तस्या दर्शनीयतरत्वमत आह— उपलविषमे विन्ध्यपादे विशीर्णाम् । 'पादाः पर्यन्तपर्वताः' इत्यमरः । उक्तरूपानुरूपमुत्प्रेक्षते— भक्तिच्छेदैरिति ॥ १९ ॥

तस्यास्तिक्तैर्मदगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन ! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २० ॥

तस्या इति । तिक्तैः सुगन्धिभिः ।

'कटुतिक्तकषायास्तु सौरभ्येऽपि प्रकीर्तिताः ।'

इत्यमरः । मदैः मदजलैः वासितं आमोदितं, अनेन करिमज्जनाय पर्याप्ततोया सा नदीत्यपि सिध्यति । वान्तवृष्टिः निश्शेषिततोयः । अनेन बह्वादेयमिति विवक्षितम् । प्रतिहतरयत्वेनादानसौकर्यं वदति— आदायेति, यथाशक्ति इति शेषः । अत एवाह— अन्तःसारं त्वां तुलयितुं न शक्ष्यतीति । गच्छेरिति । 'द्रुततरगतिः' इत्यत्रोक्तरयार्थो नातः परमनुष्ठेयः । नित्याभ्यस्तं गतिमात्रमेव कर्तव्यमिति भावः । आदानं विहितं प्रशंसति — अन्तःसारमिति । स्वाभ्यन्तरप्रदेशे तोयाख्यनिजधनपूर्णम् ।

'सारो बले स्थिरांशेऽर्थे पुमान् न्याय्ये वरेऽर्थवत् ।'

इति वैजयन्ती । तुलयितुं तोलनं कृत्वा लघुरयमित्यवज्ञां कर्तुमित्यर्थः । अनिल इति । स हि तोलनप्रियस्त्वत्समानदेशश्च, अतस्तस्यावज्ञा अवश्यपरिहर्तव्येत्युच्यते

न शक्ष्यतीति । अनेन प्राप्तिपूर्वकत्वात् प्रतिषेधस्य सोऽनिलस्त्वच्चालने स्वशक्तिमाखिलां विनियोक्ष्यति, अकृतार्थश्च भविष्यति, स्वयमेवाशक्तोऽशक्यारम्भी चेत्यवज्ञातश्च भविष्यतीति विवक्षितम् । शक्ष्यतीत्यत्र कारणमाह — रिक्त इति द्रव्यहीन इत्यर्थः । सर्व इति गुणान्तरपरिपूर्णोऽपि इति विवक्षितम् । पूर्णता गौरवायेत्यत्र सर्वस्यापीति षष्ठ्यन्ततया विपरीतः सर्वशब्दोऽनुषक्तव्यः । गुणान्तरहीनोऽपीत्यर्थः । हिशब्दो हेतौ । यस्मादेवं रिक्तत्वपूर्णत्वयोर्लघुत्वगुरुत्वव्याप्तिर्लोके दृश्यते तस्मादन्तस्सारं तोयपूर्णं त्वां तुलयितुं न शक्ष्यतीत्यर्थः । अत्र —

"कृतशुद्धेः क्रमात् पीततोयादेः पथ्यभोजिनः ।
वातादिभिर्न बाधा स्यादिन्द्रियैरिव योगिनः ॥"

इत्यायुश्शास्त्रोक्तार्थसमाधिरनुसन्धातव्यः । वान्तवृष्टिरित्यत्र शुद्धित्रयसमाधिः । तोयमादायेति पेयादिक्रमसमाधिः । तोयविशेषणाभ्यां दोषेषु बहुलता उपशामकैः दोषाविरोधिभिश्चौषधैः संस्कृतत्वं पेयादीनां व्यज्यते । अन्तस्सार इति तैलघृतमधुसंस्कृतात्मानमित्यावेदयति । अनिलस्तुलयितुं न शक्ष्यतीत्यनेन दोषत्रयमेवमभिभवितुं (न) शक्ष्यतीति प्रतीतिः स्यात् ॥ २० ॥

अतःपरं विन्ध्याटवीप्रवेशाः । तत्रत्यास्तिर्यञ्चस्त्वद्दत्तसलिलसेकोत्पन्नतृणकुसुमाद्युपयुज्यमानाः पथिकानां सूचयन्तश्च सुखेभ्यस्त्वत्प्रशंसावचसां प्रवर्तका भविष्यन्तीत्यस्माद्धेतोस्तेष्वपि वर्षः कर्तव्य एवेत्याह — नीपमिति —

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २१ ॥

सारङ्गशब्दवाच्याः षट्पदहरिणगजा यथाक्रमं नीपं कन्दलीश्च दृष्ट्वोर्वीगन्धं चाघ्राय जललवमुचस्ते मार्गं पथिकानां सूचयिष्यन्ति सूचयन्तः प्रशंसावाचःप्रवर्तका भविष्यन्तीति वाक्यार्थः । लवपदेनातिव्ययो निषिध्यते । अनुकच्छमिति कदम्बकन्दलीस्थानमुक्तम् । दग्धारण्येष्वित्युर्वीगन्धस्थानमिति विवेकः । अर्धरूढैः केसरैर्हरितकापिशं असमप्रोत्पन्नैर्दलैः श्यामरक्तम् । अनेनाविर्भूतप्रथममुकुला इति कन्दलीविशेषणेन च तदुपजीविनामार्त्यतिशयकृतस्त्वरातिशयो ध्वन्यते । यद्यपि —

१. Dk. Ml. St. जग्धारण्येषु ।

'सारङ्गः शबलो वर्णश्चातकः षट्पदो मृगः ।'

इत्यत्र सारङ्गशब्दस्य गजवाचित्वं न दृष्टं तथापि 'त्वन्निष्यन्दोच्छ्वसिते'ति 'करीव सिक्त'मिति च गजानां जलसिक्तमहीगन्धप्रियत्वं वदता कविनात्राप्युर्वीगन्धाघ्राणनेन गजा एव सारङ्गशब्देनोक्ता इति मन्तव्यम् । न चाभिधानग्रन्थविरोधोऽप्यस्ति । तत्कर्तॄणां लोकैकप्रमाणकानामर्थेयत्ताविवक्षाभावात् ॥ २१ ॥

अतः प्रतिपर्वतं विश्रमं कुर्वतोऽस्य तत्र तत्र कमपि कालक्षेपं सपदि बुद्धा-बुपागतं यथाशक्ति परिहरणीयोऽयं विलम्ब इति बुद्धिमुत्पादयितुं कथयति — उत्पश्यामीति —

उत्पश्यामि द्रुतमपि सखे ! मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥ २२ ॥

ते पर्वते पर्वते कमपि कालक्षेपमुत्पश्यामि निरूपयामि । नैतत् त्वय्यविश्वा-साद् अस्माभिरुच्यत इत्याह — मत्प्रियार्थं द्रुततरं यियासोरपीति । कोऽयं कालक्षेपरसम्भावितस्तमाह — शुक्लापाङ्गैः तत्तत्पर्वतस्थैः मयूरैः हर्षात् सजलनयनैः केकाः स्वागतीकृत्य केकाशब्दान् स्वागतशब्दस्थाने कृत्वा प्रत्युद्यातः अभ्युद्गतः । सजलनयनैरित्यादिना मनोवाक्कर्मभिः सम्भावना दर्शिता । एवम्भूतैः सुहृद्भिः सह ककुभैरर्जुनैः सुरभिते देशे विश्रम्य परस्परवार्ताश्रवणकथनप्रवृत्तो भवान् कथमिवाशु गन्तुं व्यवस्येत्, अवश्यं भवेदेवं कालक्षेप इत्यर्थः । एतादृशेषु विलम्बेषु प्रिय-सुहृत् खलु भवान् अस्माकमित्ययमेवाश्रय इत्याह — सखे! इति ॥ २२ ॥

अतीतविन्ध्यस्य तव दशार्णाख्या जनपदा भविष्यन्तीत्याह— पाण्डुच्छायेति—

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २३ ॥

त्वय्यासन्न इत्येतत् दशार्णविशेषणानां हेतुभूतमादौ कर्तव्यम् । जललव-मोक्तरि त्वयि समागत इत्यर्थः । सूचिभिन्नैः सूच्याकारेष्वग्रेषु विकसितैः नीडं

पक्षिगृहं गृहबलिभुजश्चटकाख्याः पक्षिविशेषाः, 'गृहबलिभुक् नीलकण्ठश्च' इति चटकाभिधाने हलायुधः । हंसानां जम्बुप्रियत्वात् कतिपयदिनावस्थानमुक्तम् । अनेन तद्देशस्था हंसा भवतः प्रास्थानिकगर्जनस्य श्रवणादेव न गच्छेयुः । त्वयि तद्देशं गतवति त्वया सहैव गच्छेयुरिति सहायाधिक्यसम्पत्तिरुच्यते ॥ २३ ॥

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमतिमहत्[1] कामुकत्वस्य लब्धा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु[2] यत् तत्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्म्याः[3] ॥ २४ ॥

तेषामिति । राजधानीमिति सम्बन्धः । लक्षणशब्दो नामपर्यायः । सद्य इति अतिमहतः फलस्य सद्यो लाभे महत्त्वलु सुखमिति भावः । लब्धा लप्स्यत इति कर्मणि लुटि रूपम् । लप्स्यमानं फलं दर्शयति — तीरेति । यद्यस्माद्वेत्रवत्या नद्यास्तत्पयोमुखं पास्यसि । मुखं विशिनष्टि—तीरोपान्तस्तनितसुभगं सभ्रूभङ्गं स्वाद्विति च । स्तनितशब्देन सीत्कार उक्तः । इव शब्दः एवकारार्थः । पास्यस्येवेत्यन्वयः । चलोर्म्या इति विशेषणं सभ्रूभङ्गत्वं वक्तुमुक्तम् ॥ २४ ॥

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्सम्पर्कात् पुलकितमिव[4] प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २५ ॥

विश्रामहेतोः विश्रमार्थम् । न चास्य त्वय्यनादरः शङ्कितव्य इत्याह — त्वत्सम्पर्कादिति । इवशब्द एवकारार्थे । नायमाम्रकूटवन्म्लेच्छजनाश्रयो गिरिः, अतस्तत्रत्यजनवृत्तान्तदिदृक्षया दृष्टिदानं कार्यमेवेति द्योतयन् विशिनष्टि— य इति । अत्रत्यानां नागराणां यौवनान्युद्दामानीति यो वेश्यारतिपरिमलमुद्गिरद्भिः शिलावेश्मभिः लोके प्रथयति । पथिकजनद्वारा लोकप्रसिद्धः ॥ २५ ॥

---

१. Jn. फलमपि महत्; all other com. except Ps. read फलमविकलम् ।
२. Jn. स्वादु यत्र; Vl. Vs. स्वादुयुक्तम् ।
३. Ml. Vl. Vs. चलोर्मि ।
४. Ps. पुलकितमिवाप्रौढपुष्पैः ।

विश्रान्तः सन् व्रज वननदीतीरजानां निषिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ॥ २६ ॥

एवं रम्यतरेऽपि गिरौ नातिविलम्बः कार्यः इत्यनेनोच्यते । अनेनासन्नसेचकत्व-मुक्तम् । यूथिकाशब्दस्सकलपुष्पलतोपलक्षणम् । नवजलकणैरिति वदता यावता तासां तापशान्तिर्भवति तावानेव सलिलव्ययः कर्तव्य इत्युक्तमित्यर्थः । एवं व्रजता त्वया यस्तत्र वनक्रीडाप्रवृत्तवनिताकटाक्षलक्ष्यभावश्शक्यसम्पादस्सोऽपि तत्प्रीतिकरेण व्यापा-रेण सम्पादनीय एवेत्युत्तरार्धेनोच्यते । क्लमशब्दस्य नित्यसापेक्षत्वात्समासः । अथवा रुजेत्यपि 'वष्टि भागुरिः' इति टाबन्तत्वाद् वृत्तिस्थमेव भवतु । अनेन तासां छायाश्रद्धा दर्शिता । छायादानात् क्षणपरिचित इति । असौ बुद्धिपूर्वमेव छायां ददाति न च गत्यनुनिष्पन्नैवेयं छायेति यथा ताः स्त्रियो मन्वीरन् तथा तरणिकिरणसरणिं निरुध्य क्षणं क्षणमवस्थाय तन्मनश्चक्षुषां चाटूक्तीनां च विषयो भव इत्यर्थः । आत-पदुःखस्य छायासुखस्य च मुखे सद्योऽभिव्यक्तिर्भवति इति मुखपदं निक्षिप्तम् । यूथिकाजालकानि निषिञ्चन् पुष्पफललवनं कुर्वतीनां स्त्रीणां मुखानां क्षणपरिचि-तस्सन् व्रजेति वाक्यार्थः ॥ २६ ॥

अथ दिगन्तरस्थोज्जयिनीमार्गमुपदेष्टुमुपक्रमते— वक्र इति—

वक्रः पन्थास्तव[3] भवतु च प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा[4] च भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितः[5] स्याः ॥ २७ ॥

उत्तराशां प्रस्थितस्य तवोज्जयिनीगमने वक्रः पन्थाः स्यात् । तथा भवतु, उज्जयिनीसौधोत्सङ्गप्रणयविमुखश्च मा भूः । तत्र त्वं श्रद्धालुरेव स्याः" इत्यर्थः ।

---

१. Sv. Vl. नगनदी; Ms. Sd. नवनदी ।

२. Ml. Vs. तीरजातानि सिञ्चन् ।

३. All other com. except Dk. and Ps. read यदपि भवतः for तव भवतु च ।

४. All other com. except Dk. and Jn. read मा स्म भूः ।

५. All other com. except Dk. and Vl. read वञ्चितोऽसि ।

किं तर्हि तद्गमनयत्नस्य फलं, तदाह — विद्युद्दामेति । विद्युद्दाम्नः स्फुरणेन चकितानि कृत्वेत्यर्थः । वञ्चितः स्याः इति व्यर्थोत्पत्तिः स्या इति ॥ २७ ॥

कस्तर्हि तं गामी मार्ग इत्यत आह — वीचीति—

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरस्संनिपत्य[1]
स्त्रीणामाद्यं प्रणयवचनं[2] विभ्रमो हि प्रियेषु ॥ २८ ॥

वीचिक्षोभेण स्तनिता शब्दं कुर्वती विहगश्रेणिरेव काञ्चीगुणो यस्याः । त्वद्गतमनस्कतया मार्गवर्तिषूपलादिषु सम्भूतेन स्खलितेन सुभगमनुरागद्योतकत्वान्मनोहरं यथा भवति तथा संसर्पन्त्याः । दर्शितावर्तनाभेरित्यपि कर्मधारयपूर्वो बहुव्रीहिः । एवंभूतायाः निर्विन्ध्याया रसाभ्यन्तरो भव । निर्विन्ध्यासम्भोगरस आभ्यन्तरे आत्मनि यस्य इत्येको निर्विन्ध्योदकमाभ्यन्तरे इत्यपरः । पथीत्ययत्नलभ्यत्वं वदति । सन्निपत्य त्वमेव तामुपेत्य । ननु प्रणयसूचकवाङ्मिश्रणरहितायां तस्यां कुतः सम्भोगप्रसक्तिरित्यत आह — स्त्रीणामिति । आद्यं श्रेष्ठं रसावहमिति यावत् । प्रणयवचनं प्रणयद्योतकवाङ्मिश्रणं विभ्रम एव, न ताल्वादिव्यापारः । हिशब्दोऽस्मिन्नर्थे रहसि विजनविवादं द्योतयति ॥ २८ ॥

अथ सिन्धुर्नाम नदी भविष्यति । सापि त्वया सम्भावनीयैवेत्याह—वेणीति—

वेणीभूतप्रतनुसलिला[3] तामतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिश्शीर्णपर्णैः[4] ।
सौभाग्यं ते सुभग! विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ २९ ॥

तामतीतस्य निर्विन्ध्यामतिक्रान्तस्य वेणीभूतं वेणीकृतं प्रतनु अत्यल्पं सलिलं यस्याः सा इति प्रथमान्तः पाठः । तटरुहेभ्यस्तेभ्यो भ्रष्टैः शीर्णैः पक्वैः पर्णैः पाण्डुच्छाया

---

१. Ms· Sd. Vs· रसाभ्यन्तरम् ।
२. Sd. प्रणयि वचनम् ।
३. Dk· St· ०सलिला सा त्वतीतस्य; Ml· ०सलिलासावतीतस्य ।
४. All other com· read जीर्ण for शीर्ण ।

सिन्धुसंज्ञा नदी भविष्यतीति शेषः । अनया त्वद्विरहसम्भूतयावस्थया ते सौभाग्यं लोके व्यञ्जयन्ती सा कार्श्यं पाण्डुत्वं च येन विधिना त्यजति स त्वयैवोपपाद्यः । न तस्या वाङ्मिश्रणं प्रतीक्षितव्यमित्येवकारार्थः ॥ २९ ॥

अतःपरमवन्तिविषयाः, तत्र खलु त्वत्प्राप्यो देश इत्याह — प्राप्येति —

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर[1] पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव[2] दिवः कान्तिमत्खण्डमेकम् ॥ ३० ॥

(उदयनेति ।) उदयनो वत्सराजः । तत्र (अवन्त्यां) वृद्धा अपि रसिका एवेत्यनेनोच्यते । पूर्वोद्दिष्टां 'मा च भूरुज्जयिन्याः' इत्यत्रोक्तामुज्जयिनीं विशालां विशालापरपर्यायां श्रीविशालां श्रीमतीम् । श्रीमत्त्वमुक्तं विवृणोति — स्वल्पीभूत इति । रचितानां विश्वजिदादीनां स्वर्गाख्ये फले स्वल्पीभूते भुक्तप्राये तत्र पूर्ववदवस्थानाशक्त्या भुवङ्गतानां शेषैः पुण्यैः तेषामेवादत्तफलैरंशैर्निमित्तभूतैः तत्फलोपभोगार्थमिति यावत् । कृतं धात्रा अकल्पितं दिवः खण्डमिवास्यार्थस्यानागमितत्वदोषं परिहरन्नाह— इव इति । अरमणीयतायां तु न कियानपि भोग इत्याह — कान्तिमदिति ॥ ३० ॥

अनेन स्वर्गौपम्यकथनेन दुःखासम्भिन्नं तत्र सुखमित्युक्तम्, तदेव क्वचिद्विषये दर्शयति — दीर्घीकुर्वन्निति —

दीर्घीकुर्वन् पटुमदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
सिप्रावातः[3] प्रियतम इव प्रार्थनाचाटुकारः ॥ ३१ ॥

यत्र स्त्रीणां सुरतग्लानिं प्रत्यूषेषु सिप्रानदीसम्भूतो वातो हरतीत्यन्वयः । पटुना प्रचुरेण मकरन्दास्वादभुवा मदेन कलं सारसानां कूजितं दीर्घीकुर्वन् अविरतं श्रावयन् । स्फुटितेति । विकसितपङ्कजानामामोदसम्पर्कसुरभिः अङ्गानुकूलः सुखस्पर्शः ।

---

1. Jn. Ps. उपचर for अनुसर ।
2. Jn. Ms. Ps. कृतमिव for हृतमिव ।
3. Ml. Ps. Vs. शिप्रावातः ।

एभिर्विशेषणैः श्रोत्रघ्राणत्वचां प्रीतिकरत्वमुक्तम् । प्रार्थनाचाटुकारः प्रियतम इवेति । प्रियतमो हि सुरतक्लान्तायां कान्तायां सत्यां चाटूक्तिभिः तस्या रागमुत्पादयतीति प्रसिद्धमेव ॥ ३१ ॥

अथ 'सौधोत्सङ्गप्रणयविमुखो मा भूः' इत्यनेन रमणीयतामस्तुतेषु हर्म्येषु मार्गश्रममपनीय भुक्तिमुक्तिसाधनं महाकालाख्यं महादेवपुरं गच्छेरित्याह — जालोद्गीर्णैरिति द्वाभ्याम् —

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-[1]
बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः[2] ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नान्तरात्मा[3]
खेदं नीत्वा[4] ललितवनितापादरागाङ्कितेषु ॥ ३२ ॥

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडाविरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३३ ॥

अध्वखिन्नान्तरात्मा अस्याः हर्म्येषु खेदं नीत्वा चण्डेश्वरस्य अम्बिकापतेर्धाम भवनं यायाः इति सम्बन्धः । जालोद्गीर्णैः गवाक्षनिष्क्रान्तैः केशकलापं संस्कर्तुं कल्पितैः धूपैः, 'धूपोऽसौ गन्धवासितः' इति वैजयन्ती । उपचितवपुः वर्धितशोभम् । अनेन गिरिशिखरनिवासादभ्यधिकगुणोऽस्या हर्म्येषु निवास इत्युच्यते । गिरिलभ्यं सुहृत्समागमसुखमप्यस्त्येवेत्याह — बन्धुप्रीत्येति । 'ककुभसुरभौ' इत्युक्तं गिरिगुणं हर्म्याणां दर्शयति कुसुमसुरभिष्वित्यनेन । भर्तुः कण्ठच्छविरिति निरूप्य भगवदनुचरैः भूतगणैः सादरं दृश्यमानः । पुण्यं पापहरं श्रेयस्साधनं च । त्रिभुवनगुरोः त्रिलोकीस्वामिनः सृष्टिस्थितिसंहारकर्तुरिति यावत् । पुण्यत्वेन विशेषितं धाम रमणीयत्वेनापि विशिनष्टि — धूतोद्यानमिति । अनेन जलकुसुमानामुद्यानकुसुमानां युवत्यङ्गरागाणां च परिमलवाहिना वायुना हर्षितविश्वजनमित्युक्तं भवति ॥ ३२-३३ ॥

---

१. Sv. धूमैः for धूपैः ।
२. Dk. Jn. ०नृत्तोपहारः ।
३. Dk. Ml. अध्वखेदं नयेथाः for अध्वखिन्नान्तरात्मा ।
४. Dk. पश्यन् लक्ष्मीं, Ml. लक्ष्मीं पश्यन् for खेदं नीत्वा ।

पूर्वश्लोके पूर्वोत्तरार्धाभ्यां धाम्नः पुण्यत्वं रमणीयत्वं चोक्तम् । तत्र पूर्वार्धानुरोधेन श्रेयस्सम्पादनप्रकारं तावदाह — अप्यन्यस्मिन्निति —

अप्यन्यस्मिन् जलधर! महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन् संध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३४ ॥

अन्यस्मिन् काले महाकालमासाद्यापीति । यद्यन्यस्मिन् काले गतिवशात् प्राप्तिः स्यात् तथापीत्यर्थः । ते त्वया तावत् स्थातव्यं प्रतिपालयितव्यं यावद्भानुर्नयनविषयमत्येति[1] । किं मया लभ्यते तदाह—कुर्वन्निति । शूलिनः सन्ध्याबलिपटहतां कुर्वन् आमन्द्राणां गम्भीरतराणां गर्जितानां फलं तत्सद्भावप्रयोजनमविकलं समग्रं लप्स्यसे सायंसन्ध्याबलिसेवा महाफलेति शैवागमप्रसिद्धिः । तां दर्शयति — श्लाघनीयामिति ॥ ३४ ॥

उत्तरार्धानुरोधेन सुखसम्पादनप्रकारमप्याह— पादन्यासेति—

पादन्यासक्वणितरशनास्तत्र लीलावधूतैः
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दून्
आमोक्ष्यन्ति त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥ ३५ ॥

तत्र सन्ध्याबलिकाले महाकालनाथपरिचारिका वेश्या नवेषु नखपदेषु सुखस्पर्शान् वर्षप्रथमबिन्दून् त्वत्तः प्राप्य त्वयि कटाक्षान् आमोक्ष्यन्ति । वर्षबिन्दून् वेश्यां प्रापय्य तत्कटाक्षविषयत्वं सम्पादयितव्यमित्यर्थः । पादन्यासेन प्रदक्षिणक्रियार्थेन क्वणितरशना वाचालमेखलाः, कारणसाम्यान्नूपुरक्वणनमपि सिध्यति । लीलावधूतैश्चामरैः क्लान्तहस्ता इति । अनेन तासां लघुद्रव्यसाधनयापि लीलया क्लमो भवतीति ललितत्वातिशय उच्यते । वलयकङ्कणक्वणनमपि सिध्येत् । रत्नच्छायया खचिता रूषिता वलयः शिल्परेखा येषां तैः । भूषणक्वणनकथनेन क्लमकथनेन च रतिसमाधिः स्फुरति इति ॥ ३५ ॥

अथ शरीरेणैव स्वेन भगवदाराधनप्रकारमाह— पश्चादिति—

---

1. Ms. Sd. Sv. Vl. अभ्येति for मत्येति ।

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्तारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगः स्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३६ ॥

पश्चात् सन्ध्योत्सवानन्तरं पशुपतेर्नृत्तारम्भे सन्ध्यारागरूषितस्त्वं मण्डलेन वर्तुलेनाकारेण तस्य उच्चैरुन्नतं भुजतरुवनमभिलीनः अवतीर्णो भूत्वा आर्द्रनागाजिनेच्छां हर पूरय इति वाक्यार्थः । एवं कृते भवानी च परितुष्टा भवेदित्याह — शान्तेति । नृत्ते आरभ्यमाणे सत्यार्द्रनागजिनेच्छा तस्य सम्भवति । एतत्सिद्ध्यर्थमिदमत्रोपाख्यानं द्रष्टव्यम्— पुरा खलु भगवान् गजरूपिणमसुरं विचित्रेण पराक्रमेण निहत्य तच्चर्म रुधिरार्द्रमेवोत्क्षिप्य रक्तावसिक्ततनुर्भवान्या च भयविह्वलयोद्वीक्ष्यमाणः शौर्यमत्तो ननर्त इति ॥ ३६ ॥

अथ महाकालमतीत्य नगरीशेषवर्तिनोऽपि तस्य रामाकटाक्षविषयत्वसम्पादनप्रकारमाह — गच्छन्तीनामिति —

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः ॥ ३७ ॥

तत्र विदिशायां नरपतिपथे तमोभिः रुद्धालोके अवलोकनमालोकः । रमणवसतिं गच्छन्तीनां योषितां सौदामिन्योर्वीं दर्शयेत्यर्थः । कनकनिकषस्निग्धयेति । रूक्षया चेद् दृष्टिप्रतिघातादुर्वीदर्शनमेव न सिध्येदिति भावः । तोयोत्सर्गस्तनिताभ्यां मुखरश्च मा भूरिति विद्युद्विधिप्रसक्तयोः प्रतिषेधान्मुखरशब्देनोद्वेगविषयत्वं लक्ष्यते । विक्लवास्ता इति । विधौ निषेधे चायमेव हेतुः । अस्मदादिवत् तमसि गन्तुं तोयोत्सर्गस्तनितादीनि च सोढुं नैव खलु तासां शक्तिरस्तीत्यर्थः ॥३७॥

एवं साधितधर्मकामेनापि त्वया विद्युत्खेदनिवृत्तये सिप्रावातप्रवृत्तिनिरीक्षणाय च सा रात्रिः समस्ता तत्रैव नेतव्या, गन्तव्यं चापरेद्युरित्याह — तां कस्यांचिदिति

---

१. All other com. except Dk. read नृत्यारम्भे ।
२. All other com. read सौदामन्या ।
३. All other com. except Dk. and Jn. read मा स्म भूः ।

तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ३८ ॥

सुप्तपारावतायां 'सुखसुप्तं न बोधयेद्' इति निषेधातिक्रमो मा भूदित्यर्थः । अध्वशेषमिति । अनेन त्वरातिशयोत्पादनायाध्वनो गतप्रायत्वं स्मारयति ।

"सुहृदर्थं प्रतिश्रुत्य ये तु पश्चान्न कुर्वते ।
तेषां पापेन लिप्येयं नायास्ये यद्यहं पुनः ॥"

इत्यादीतिहासवेदिनं भवन्तं प्रति पुनरुक्तमेव वाहयेदिति विधानं कृतमित्याह— मन्दायन्त इति ॥ ३८ ॥

तस्मिन् दिवसे दिवसान्तरेषु वा यदा सूर्योदये यात्रा सम्भवति तदैवं कर्तव्यमित्याह—तस्मिन् काल इति—

तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलनयनात्[1] सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ३९ ॥

तस्मिन् काले भानोर्वर्त्म नलिनीप्राप्तिमार्गमाशु त्यजेत्यन्वयः । आशुत्यागे कारणमाह — खण्डितानां योषितां नयनसलिलं प्रणयिभिः शान्तिं नेयमित्यनया लोकयात्रया सोऽपि भानुर्नलिन्याः स्वप्रेयस्याः प्रालेयास्रं कमलनयनात् हर्तुं प्रमार्ष्टुं प्रत्यावृत्त उपागतस्त्वयि कररुधि हस्तरोधके स्यादेवानल्पाभ्यसूय इति ॥ ३९ ॥

अथ गम्भीरा नाम नदी भविष्यति, सापि निर्विन्ध्यावद्विभ्रमान्दर्शयिष्यत्येव । तत्र गम्भीरहृदयत्वाद् बहुकालसाध्योऽस्या रागोत्पादनेनानुभव इति मत्वा तामप्यनादृत्य सहसैव न गन्तव्यम्, दर्शनसमकालमेव तस्या मनसि तव प्रवेशनिश्चयादित्याह — गम्भीरेति—

---

1. All other com. except Sv. and Vs. read कमलवदनात् ।

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ ४० ॥

निर्विन्ध्यावद् गम्भीरायाः सरितोऽपि प्रसन्ने चेतसि पयसि ते छायात्मा प्रतिबिम्बरूपो देहः प्रकृतिसुभगो (प्रवेशं) लप्स्यते प्राप्स्यति । चेतःस्थानगतमान्तरं पयोऽस्याश्चेत इति मन्यते । इवशब्द एवकारार्थः, लप्स्यत एवेति सम्बन्धनीयः । चेतसि नैव भवतीति भावः । तस्मादस्याः शफरोद्वर्तनप्रेक्षितानि स्खलितगत्यादीनि च द्रष्टव्यम् । त्वं धैर्यात् दुष्करत्वबुद्धिजन्यात् मोघीकर्तुं नार्हसीति ॥ ४० ॥

अथ कृतगम्भीरासम्भोगस्यास्य तत्सकाशान्निष्क्रमणमशक्यमेव भवेदिति मत्वा तत्रावधानमुत्पादयितुं तदशक्यतां तावत् स्मारयति — तस्याः किञ्चिदिति—

तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं[1] मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमिव सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां[2] को विहातुं समर्थः ॥ ४१ ॥

प्रियतमे त्वयि दृष्टिपथमुपसरति रिरंसावशेन स्रंसमानत्वादीषत्करेण विधृतमिव संसक्तवेतसशाखं सलिलवसनं मुक्तरोधोनितम्बं विमुक्तं तीररूपं श्रोणीचक्रं यथा भवति तथा हृत्वा लम्बमानस्य तया सह क्रीडाविशेषैर्विलम्बं कुर्वतस्ते कथमिव प्रस्थानं भावीत्यशक्यतामुक्त्वा लोकप्रसिद्ध्या समर्थयते ज्ञातास्वाद इति । स्त्रीभोगरसाभिज्ञ इत्यर्थः । विवृतजघनां प्रकटितश्रोणीचक्रपुरोभागाम् । नितम्बशब्दस्यात्र 'पश्चान्नितम्बः स्त्रीकट्याः' इत्यमरसिंहोक्तोऽर्थो नाङ्गीकार्यः ।

'नितम्बः पश्चिमश्रोणीविभागे कटके कटौ'

इति वैजयन्त्या कटिप्रदेशमात्रवाचित्वमुक्तम्, तदेव गृहीतव्यम् । पश्चिमभागवाचित्वे विवृतजघनामिति पुरोभागवाचिना जघनपदेनानुवादासम्भवात् को विहातुं समर्थ इति नात्र विद्वदविद्वद्विभागो वृद्धयुवतिविभागो वा दृश्यत इत्यर्थः । विहातुमिति

---

१. Dk. Ml. Ps. Vl. अपि for इव ।
२. Ms. Sd. Sv. St. Vs. विपुलजघनां, Vl पुलिनजघनाम् ।

स्ववशां रहसि समीपवर्तिनीमनुरागिणीं परिहर्तुमिति द्योत्यते । तस्मात्तर्हि पूर्वमुक्तं मोघीकर्तुं नार्हतीति तत्राह — सखे इति । अस्ति खलु प्रस्थाननिर्वाहकमत्र सखित्वं मत्समानदुःखत्वं नामैकं वस्त्वित्यर्थः । तदुक्तं कुमारसम्भवे—

"दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने"

इति ॥ ४१ ॥

अथ देवागिरिप्रदेशयायिनस्तवाप्युज्जयिनीवासिनामिव रतिश्रमापनोदी वायुर्भविष्यतीत्याह — त्वन्निष्यन्देति —

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रस्तनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४२ ॥

त्वत्तो निष्यन्देन वर्षेणोच्छ्वसिताया वसुधाया गन्धेन सम्पर्कात् सुरभिः, अत एव स्रोतोरन्ध्रस्तनितेन नासेन्द्रियद्वारवर्तिना शब्देन सुभगं मनोहरं यथा भवति तथा दन्तिभिः पीयमानः, प्रावृषेण्यत्वात् शीतो वायुः नीचैः शनैः शनैः ते वास्यति ।

'स्रोतोऽम्बुनिर्गमद्वार इन्द्रियेऽप्सु जलस्रुतौ'

इति वैजयन्ती । देवपूर्वं गिरिमुपजिगमिषोरिति । स्ववाचके गिरिशब्दे देवशब्दः पूर्वो भागो यस्य तं उपजिगमिषोः । तद्देशवर्तिनां मनुष्याणामुपकारक एवायं वायुरित्याह—काननोदुम्बराणां परिणमयिता उपभोगक्षमामवस्थां जनयन् इति ॥४२॥

तत्र भगवदाराधनेन महान् पुण्यपूरः सम्पादनीय इत्याह — तत्र स्कन्दमिति —

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पैः साधु स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृतो वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ॥ ४३ ॥

---

१. All other com. read ध्वनित for स्तनित ।

२. Jn. मधुरं for सुभगं ।

३. Jn. Ps. वातः ।

४. All other com. except Ps. read पुष्पासारैः for पुष्पैः साधु ।

५. Sd. वसूनां ।

तत्र देवगिरौ नियतवसतिं नित्यसन्निहितं स्कन्दं भवान् पुष्पमेघो भूत्वा व्योमगङ्गाजलेन आर्द्रैः प्रोक्षितैः साधु भक्त्या स्नपयतु स्थगयतु। एवं तदनुरूपमाराधनप्रकारमुक्त्वा तत्र भक्तिमुत्पादयितुं देवं प्रशंसति—रक्षेति। नवशशिभृता महादेवेन तारकाद्युपप्लुतानां वासवीनां चमूनां रक्षाहेतोः देव्यां सम्भृतमाहृतं पुनर्देव्या तत्सोढुमक्षमया भूतधात्र्यां पृथिव्यां तया चाक्षमया हुतवहमुखे। कर्मधारयोऽयम्, मुखं हि देवानामग्निः। तेन चाक्षमेण गङ्गायाम्, तया शरवणे कृत्तिकासु च सम्भृतम्। अत्यादित्यं अतिक्रान्तद्वादशादित्यं, तेजःपुञ्जं हि तदित्यर्थः। मध्यवर्तिनो वह्नेरुपादानेन पूर्वापरस्थानान्युपात्तानि भवेयुरिति मत्वोक्तं हुतवहमुख इति। अम्बिकायां तेजस आधाने भगवतः शरीरकर्तृत्वं स्थानान्तरेषु मानसमिति द्रष्टव्यम्॥ ४३॥

पुनरपि तदाराधनप्रकारमाह—ज्योतिर्लेखेति—

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलक्षेपि[1] कर्णे करोति।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः॥ ४४॥

ज्योतीरूपा लेखा एव वलयान्यस्येति लेखावलयि, अत एव कुवलयदलक्षेपि तन्निन्दाकारि गलितं स्वयमेव भ्रष्टं यस्य बर्हं भवानी पुत्रप्रेम्णा कर्णे करोति अवतंसं कल्पयति। पुत्रप्रेम्णेत्यत्र लिङ्गं यस्य बर्हमिति। मयूरान्तरे बर्हानङ्गीकारात् पुत्रस्नेह एव कारणं न बर्हस्नेह इति सिध्यति। तं पावकेरग्न्यपत्यस्य मयूरं हरशशिरुचा विशेषतः शुक्लापाङ्गं अद्रिग्रहणगुरुभिः अद्रिणा गुहाभिः स्वीकरणात् प्रतिशब्देन महद्भिः गर्जितैः पश्चात् नर्तयेथाः। हरभवानीसम्बन्धकथनेन तावप्यनेन कर्मणा प्रीतौ स्यातामिति विवक्षितम्॥ ४४॥

आराध्यैनं शरवणभवं[2] देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद् वीणिभिर्मुक्तमार्गः।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम्॥ ४५॥

---

१. Jn, Ml. कुवलयदलप्रापि, Vl. कुवलयपदप्रापि, St. कुवलयदलस्पर्धि।
२. Vl. भुवं for भवं।

आराध्येति । पूर्वोक्तं हुतवहपदं स्थानान्तराणामप्युपलक्षणमिति द्योतय-न्नाह—शरवणभवमिति । वीणिभिः वीणावद्भिः जलभयहेतुरिदं विशेषणम् । आर्द्र-तन्त्रीका वीणाः न स्वनन्तीति । (व्यालम्बेथाः यज्ञार्थं पशूनां आलम्भेन) तच्चर्मराशेर्जातां चर्मण्वतीसंज्ञां रन्तिदेवस्य राज्ञः कीर्तिं (मानयिष्यन् व्यालम्बेथाः)। अनेन माननी-यत्वमुक्तम् ॥ ८५ ॥

त्वत्सम्माननकाले त्वामेव निमित्तीकृत्य देवा अपि तां मानयिष्यन्तीत्याह — त्वय्यादातुमिति—

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचोरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात् प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ४६ ॥

शार्ङ्गिणो वर्णचोरे नीलतरे त्वयि जलमादातुमवनते तस्याः सिन्धोः पृथुमपि प्रवाहं दूरभावात् तनुं स्वल्पमिव लक्ष्यमाणं भुवो मुक्तागुणमिव गगन-गतयः प्रेक्षिष्यन्ते । प्रशब्देन दीर्घकालादरनैरन्तर्याणि सूचितानि । स्थूलमध्येन्द्र-नीलं स्थूलो मध्यस्थः इन्द्रनीलमणिर्यस्य स तथोक्तम् ॥ ४६ ॥

अथ दशपुरं नाम नगरं भविष्यति । तत्र भवतो भूयाननुभव इत्याह— तामुत्तीर्येति—

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ४७ ॥

परिचयोऽभ्यासः । ऊर्ध्ववर्तिविषयनिरीक्षणात् पक्ष्मोत्क्षेपः, कृष्णेन शारा प्रभा, कृष्णशारप्रभा, उपरि विलसन्ती सा येषामिति विग्रहः । कृष्णशब्दोऽत्र गुण-वाची ; प्रभाशब्दः सितप्रभां वदति ; शारशब्दो वर्णद्वयसाङ्कर्यमाह । कुन्दपुष्पस्यो-परि क्षेपः कुन्दक्षेपः तस्मिन् सत्यनुगच्छतीति कुन्दक्षेपानुगः, ततः कर्मधारयः, ततः षष्ठीसमासः, तां मुष्णातीति कुन्दक्षेपानुगमधुकरश्रीमुट् तेषां कौतूहलानां कुतूहलकार्याणां वीक्षणविशेषाणां आत्मबिम्बं स्वशरीरं पात्रीकुर्वन् । स्निग्धनीलत्वा-दिभिः स्वगुणैस्तासां कुतूहलोत्पादनमत्र कृअर्थः ॥ ४७ ॥

अथ ब्रह्मावर्तः तन्मध्यवर्ति कुरुक्षेत्रं च पुण्यदेशौ भविष्यतः । तत्र पुण्यत्व-तारतम्यं त्वरातिशयं च निरूप्य व्यापारविशेषं विदधाति—ब्रह्मावर्तमिति –

ब्रह्मावर्तं जनपदमथ[१] छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्[२]मुखानि ॥ ४८ ॥

"सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥"

इति **मनुः** । तत्र **छायया गाहमानः** सन् भारतं युद्धमिहातीतमिति कैश्चिल्लिङ्गैः सूचयन्तं तन्मध्यदेशं कुरुक्षेत्रं शरीरेणैव **भजेथाः** । अत्र छायया गाहनबुद्धिः कर्तव्येत्यर्थसिद्धं छायागाहनं विदधतोऽभिप्रायः । तदिति पुण्यत्वप्रसिद्धं स्मारयति । अस्य पुण्यत्वातिशये भूमण्डलवासिनामनुमतिं दर्शयति— **राजन्यानामिति** । **धारापातै**रिति शराणामक्षय्यत्वं पर्यायमुक्तत्वमयत्नमुक्तत्वं चोच्यते । **त्वमिवे**ति सहायानपेक्षत्वं वदति । **कमलानी**ति म्रियमाणानां मुखविकासमाह ॥ ४८ ॥

या तु ब्रह्मावर्तस्योत्तरसीमा नदी सरस्वती नाम तस्यामाप्लवनमपि कर्तव्यमेवेत्याह— **हित्वा हालामिति** —

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुस्नेहात्[३] समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगम[४]मपां सौम्य ! सारस्वतीना-
मन्तःशुद्धस्त्वमसि भविता वर्णमात्रेण कृष्णः ॥ ४९ ॥

लाङ्गली बलभद्रः । **रेवती** तद्भार्या । लोचनप्रतिबिम्बे लोचनशब्दः । **बन्धुस्नेहात् समरविमुखः** युधिष्ठिरदुर्योधनयोस्तुल्यबलात् स्नेहात् भारतसमराद्विमुखो भगवाननन्तः सनियमकं **याः सिषेवे तासां सारस्वतीनामपामन्तरभिगमं कृत्वा**

१. All other com. except Dk. Jn. and Ml. read अधः for अथ.।
२. Vl. अभ्याषिञ्चत् for अभ्यवर्षत्।
३. All other com. except Dk. and Jn. read बन्धुप्रीत्या।
४. Jn. अधिगमं।

त्वं शुद्धो भविता । श्रीरामकृष्णव्यासादिवद्वर्णमात्रेण कृष्ण इत्यर्थः । जलादानमर्थ-सिद्धं भवतीति मत्वा प्लवनमेवोक्तम् ॥ ४९ ॥

ततो गच्छतस्तव तत्समा तदधिका वा गङ्गानदी पथि भविष्यतीत्याह — तस्माद्गच्छेरिति —

तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रे भ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५० ॥

हिमवत्पादः कनखलः । शैलराजो हिमवान् । जह्नोः कन्यां गङ्गाम् । अवतरणकार्यमुक्तं सगरेति । न च हिमवानप्यस्या जन्मभूमिरिति द्योतयितुं महादेव-जटामप्यावासभूमिं गौरीसपत्नीत्वमुत्प्रेक्ष्य तदनुरूपेणोक्तिप्रकारेण दर्शयति — गौरी-वक्त्रेति । तया त्वाश्रयत्वेन कृतस्य जटाग्रहणस्य केशग्रहणशब्दोपादानात् चुम्बना-र्थकेश(ग्रहण)प्रतीतिः स्यादिति भावः । इन्दुलग्नोर्मिहस्तेति । भर्तुर्यद्दयितं भूषणादि तदपीतरसमक्षमपरा स्वहस्ते करोतीत्येतदपि सपत्नीहेलनमेव इत्यभिप्रायः ॥ ५० ॥

अथ तदीयसलिलोपादाने त्वत्स्थितिप्रकारविशेषेण तस्या अपि शोभाविशेषस्त्वया सम्पादयितुं शक्य इत्याह — तस्या इति —

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि छाययासौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥ ५१ ॥

त्वं व्योम्न्येव स्थित्वा तिरश्चीनः पश्चार्धलम्बी च भूत्वा चेत् तस्या अम्भः पातुं तर्कयेस्तर्हि सपदि स्रोतसि संसर्पन्त्या कार्त्स्न्येन व्याप्नुवन्त्या भवतः छायया सा गङ्गा अस्थाने कनखलदेशेऽप्युपगतेव यमुनासङ्गं अभिरामा स्यादित्यर्थः । अवगाह्य पाने क्रियमाणे छाया न स्यादिति कृत्वा व्योम्न्यवस्थान-मुक्तम् । तिर्यगवस्थानाभिधानं तु शरीरेण नदीव्याप्तिसिद्धये कृतम् । न खल्वति-

१. Dk. गौरीं वक्त्रे भ्रुकुटिरचनां; all other com. except Ps. read गौरीवक्त्रभ्रुकुटिरचनां ।

२. Sd. Sv. Vl. Vs पूर्वार्धलम्बी ।

३. Ml. Ps. Sl. Vs. छाययासौ ।

पृथ्व्यः प्रपातदेशे नद्यः, अतस्तिर्यगवस्थानेनैव नदीव्याप्तिः सिद्ध्येदेव, न तु विशेषेण देहदैर्घ्यसम्पादनापेक्षा स्यादिति भावः । पातुमित्यनेन मुखस्य तावत् सलिलदेशं यावल्लम्बनमुक्तं भवतीति मत्वा कायान्तरस्यापि तादृक्त्वसिद्धये पश्चार्धलम्बीत्युक्तम् । सलिलप्रान्तयोर्मेघकोट्योश्च बह्वविच्छेदे सति छायैवेयमिति निश्चयाद्यमुनाबुद्धिर्न स्यादिति भावः । सुरगज इवेति । सोऽपि व्योमचारी कदाचित् स्नानेच्छाभावे तामनवगाह्य व्योम्न्येव स्थित्वा पिबेन् मार्गवशात्तिरश्चीनश्च भवेत् । लम्बितकर-चरणत्वमप्यस्त्येव ॥ ५१ ॥

अथ ततो गत्वा विश्रमाय हिमवच्छिखरावस्थितस्य भवतोऽचलान्तराल्लभ्यः कोऽपि शोभाविशेषो भविष्यतीत्याह —

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रां त्रिणयनवृषोत्खातपङ्कोपमेयाम् ॥ ५२ ॥

तस्या गङ्गाया एव प्रभवं उत्पत्तिस्थानम् अचलं हिमवन्तं प्राप्य तस्य शृङ्गे अध्वश्रमविनयने तच्छमनकारिणि निषण्णः त्रिणयनवृषोत्खातेन पङ्केन उप-मेयामुपमातुं योग्यां शुभ्रां शोभां वक्ष्यसि धारयिष्यसि । मृगनाभिगन्धैः सुरभित-शिलत्वं तच्छृङ्गस्याध्वश्रमविनायकत्वोक्तिशेषत्वेनोक्तम् । तुषारगौरत्वमत्रेस्त्रिणयनवृषत्वो-क्तिबीजम् ॥ ५२ ॥

एवं विश्रमार्थेषु मार्गवर्तिषु गिरिषु यत्तत्प्रथमप्राप्ते गिरावासारेण वनोपप्लव-शमनविधानं कृतं त्वय्यारण्येष्विति द्वितीये चोक्तं तत् सर्वगामि इति द्योतयितुमन्तिमे-ऽपि करोति — तं चेदिति —

तं चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥ ५३ ॥

तं हिमवन्तं वायौ सरति वीजति सरलाख्यस्य वृक्षस्य स्कन्धे वृक्षान्तरशाखा-सङ्घट्टेन समुत्पन्नः दवाग्निः बाधेत चेत । असंशये संशयवचनमिदम् । ततश्चेदं

वचनम् 'आसारप्रशमितवनोपप्लवम्' इत्यत्र वनोपप्लवस्यापाक्षिकत्वोक्तिविरुद्धं न भवति । एवं दवाग्निं वारिधारासहस्रैः, सर्वस्वव्ययेनापीति यावत् , अलं सम्यक् शमयितुमर्हसीति । उल्काक्षपितचमरीवालभार इति वृक्षेभ्यः पतद्भिरुल्काभिर्विनाशिताश्चमरीमृगाणां पुच्छरोमनिवहा यस्य स इत्यर्थः । अनेन चामररक्षणात् तस्य शैलराजत्वमपि त्वदधीनमेवेत्युच्यते । इदमस्मिन्नर्थे सर्वस्वव्ययाभिधानं सतामितोऽधिकस्य कृत्यस्याभावात् कृतमित्याह — आपन्नार्तीति ॥ ५३ ॥

तस्मिन् गिरौ शरभास्सन्ति; ते गजारातयो गजपरिमाणवर्णशालिनं त्वामुत्पतनेन प्रहरिष्यन्ति । तत्र तत्प्रहारास्तावत् उत्पतनयोग्यादूगनाध्वन ऊर्ध्वगमनेन प्रागेव परिहर्तव्या इत्यमुं वाक्यमन्तर्भाव्य ये तु मुक्ताध्वानमपि भवन्तं लङ्घयेयुः, लङ्घितुमुत्पतेयुरिति यावत् , तान् दुष्टसत्वांस्तुमुलेन करकावृष्टिपातेनावकीर्णान् विवशान् कुर्वीथाः इत्याह — ये संरम्भेति —

ये संरम्भोत्पतनरभसाः[2] स्वाङ्गभङ्गाय तस्मिन्
[3]मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान् कुर्वीथास्तुमुलकरकावृष्टिपाता[4]वकीर्णान्
केषां[5] न स्युः परिभवफला[6] निष्फलारम्भयत्नाः ॥ ५४ ॥

संरम्भरभसशब्दाभ्यामेकस्यामेव तीव्रक्रियाया आन्तरं बाह्यं च पर्वद्वयमुच्यते । यथाह दिवाकरः —

"आवेग एव विषये प्रतिघातिनि रोषवान् ।
अनुबन्धी च भूयोऽपि संरम्भत्वं प्रपद्यते ॥

सर्वात्ययानपेक्षी यस्त्वरावान् लङ्घितक्रमः ।
अशक्यः सोढुमन्यैश्च व्यापारो रभसः स्मृतः ॥"

इति ।

१. B व्ययेनेति ।

२. Vl. ये त्वां मुक्तध्वनिमसहमाः कायभङ्गाय ।

३. Vl. दर्पोत्सेकादुपरि शरभाः लङ्घयिष्यन्त्यलङ्घ्यम् ।

४. Sd. Sv. Vl. Vs. वृष्टिहासावतीर्णान् ।

५. All other com. except Jn. and Ps. read के वा न स्युः ।

६. All other com. except Dk. and Ps. read परिभवपदं ।

ततश्च संरम्भेण रोषानिर्बन्धयुक्तेनावेगेन युक्तं यदुत्पतनं तत्र रभसाख्येनानुबन्धानपेक्षणादिधर्मविशेषेण युक्ता इत्यर्थः । ईदृशानां पराक्रमः स्वाङ्गभङ्गायैव भवेत न त्वदङ्गभङ्गायेति दर्शितं स्वाङ्गभङ्गायेति ।

'शरभस्तु गजारातिरुत्पादश्चाष्टपादवान् ।'

इत्यमरः । केचित्तु मुक्त्वा ध्वानमिति पठन्ति । तदा नदित्वेत्यर्थः । स तु वा स्वाङ्गभङ्गायेत्यत्र हेत्वभावप्रसङ्गान्नाङ्गीकार्यः[१] । केषामित्यादि । आरभ्यत इत्यारम्भः क्रियानिष्फलशब्देन पापफलत्वमुच्यते । पापफलक्रियाविषया यत्नाः स्वयमेव सर्वेषामपि कर्तॄणां परिभवदायिन एव । निमित्तमात्रमेव तत्र प्रतिकर्तारो भवन्तीत्यर्थः ॥ ५४ ॥

तत्रापि भगवत्सेवावकाशः कश्चिदस्ति, न परं कैलास एवेत्याह— तत्र व्यक्तमिति —

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत् सिद्धैरुपहृतबलिं[२] भक्तिनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः[३]
कल्पिष्यन्ते[४] स्थिरगुणपदप्राप्तये[५] श्रद्दधानाः ॥ ५५ ॥

तत्र परोक्षं निवसतः शिवस्य चरणन्यासं लोकानुग्रहार्थं दृषदि व्यक्तं भक्त्या नमस्कृत्य प्रदक्षिणं कुर्वित्यर्थः । देवार्चनेषु क्रियातोऽपि भक्तेरेव प्राधान्यमिति दर्शयन्नाह— यस्मिन् दृष्ट इति । श्रद्दधाना भक्तियुक्ताः पुरुषाः यस्मिंश्चरणन्यासे दृष्टे विनापि क्रियान्तरं तं दृष्ट्वेत्यर्थः, स्थिरगुणपदप्राप्तये अनश्वरानन्दशिवलोकप्राप्तये कल्पिष्यन्ते । क्लृपिधातोरलंशब्दसमानार्थत्वाच्चतुर्थी । 'सुरगणपदप्राप्तये' इति केचित् पठन्ति । तदयुक्तं, तत्र निवसतो दिव्यजनस्य स्वर्गकामनासम्भवात् करणविगमानपेक्षत्वाच्च पापोद्धूतेर्हेतुतयाभिधानं चास्मिन् पाठे व्यर्थं स्यात् । स्वर्गस्य हि ज्योतिष्टोमादिरेव कारणं न पापात्यन्तनाशः ॥ ५५ ॥

१. B. हेत्वभावात् for हेत्वभावप्रसङ्गात् ।
२. Dk. Ml. उपचितबलिं for उपहृतबलिम् ।
३. Ms. Sd. दूरं for ऊर्ध्वम् ।
४. Ms. Sd. Sv. सङ्कल्पन्ते, Vl. कल्पन्तेऽस्य
५. All other com. read गण for गुण ।

अथ गर्जितमपि त्वया भगवन्नृत्तशेषतया मुखकृत्ये विनियोक्तव्यमित्याह — शब्दायन्त इति—

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादी ते मुरव इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समस्तः ॥ ५६ ॥

कीचकास्तावत् स्वरन्ध्रनिविष्टैरनिलैः पूर्यमाणा मधुरं शब्दायन्ते तानप्रदानं कुर्वन्ति । संरक्ताभिः रक्तकण्ठीभिः किन्नरीभिः त्रिपुरविजयः, पराक्रमान्तराणामप्युपलक्षणमेतत्, गीयते च । एवं स्थिते ते ध्वनिरपि मुरव इव कन्दरेषु निर्ह्रादी यदि स्यात् तत्र पशुपतेः सङ्गीतार्थः, कर्मधारयोऽयम्, समस्तः परिपूर्णः स्यात् ।

'नृत्तं गीतं च वाद्यं च त्रयं सङ्गीतमुच्यते ।'

इति हलायुधः ॥ ५६ ॥

ततः कैलासं गन्तुमृजुं सहायानुगुणं मार्गमुपदिशति — प्रालेयाद्रेरिति —

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिविमथनाभ्युद्यतस्येव विष्णोः ॥ ५७ ॥

प्रालेयाद्रेरुपतटं ये विशेषा गिर्यन्तरेष्वविद्यमानाः पदार्थास्तान् सर्वानतिक्रम्य त्वरावशादुपेक्ष्य यत्तत्र क्रौञ्चगिरिमध्यस्थं रन्ध्रं भृगुपतिना शरेणैकेन निर्मितम्,

१. Ml. संसक्ताभिः ।
२. Ml. निर्ह्रादस्ते ।
३. Jn. Ml. Vl. Vs. मुरज ।
४. Ml. कन्दरीषु, Vl. कन्दरासु ।
५. Dk. पशुपतेर्नृत्यतस्तत्र पूर्णः ।
६. All other com. except Dk. Jn. and Vl. read समग्रः ।
७. Jn. अनुपतेः, Vl. अभिसरेः for अनुसरेः ।
८. Jn. बलिनियमनेऽभ्युद्यतस्य; all other com. except Dk. and Ps. read बलिनियमनाभ्युद्यतस्य ।

अत एव तद्यशसो देवलोकगमनाय मार्गभूतं हंसद्वारमिति प्रसिद्धं, तेन रन्ध्रेण दक्षिणोत्तरायतेन आयामशोभी भूत्वा उदीचीं दिशं तिर्यगनुसरेः इत्यर्थः । यदिदमुदग्गमनं तत् पूर्वापरायते शैले सति तिर्यग्गमनं भवतीति भावः । इत्थं गच्छन् भवान् त्रिविक्रमपदेनोपमेयो भविष्यति । महदिदं प्रयोजनं देहभाजामित्याह — श्यामः पाद इति ॥ ५७ ॥

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ॥ ५८ ॥

क्रौञ्चरन्ध्रमुखान्निर्गत्य किञ्चिदूर्ध्वं गत्वा निकटवर्तिनः कैलासस्यातिथिश्च स्याः । अवसितो मार्गोपदेश इति द्योतयितुं वाक्यार्थसमुच्चये चकारः । अतिथित्वकथनेन तत्पूज्यत्वमस्य सूचयति । कैलासं विशिनष्टि — त्रिदशवनितादर्पणस्य नैर्मल्यातिशयात् त्रिदशवनितानां स्वसौन्दर्यनिरीक्षणार्थं दर्पणभूतस्य, अत एव मनोज्ञत्वाद्दशमुखेन महेश्वरमपि विस्मृत्य तं लङ्कां नेतुमिच्छता शिथिलीकृतप्रस्थसन्धेः । एवं मनोज्ञतया प्रशंसा कृता । अथ महत्त्वेनापि प्रशंसति — शृङ्गोच्छ्रायैरिति । उच्छ्रितैः शृङ्गैरित्यर्थः । हिमवच्छृङ्गान्तरातिशायि महत्त्वं वैशद्यं चास्य धवलबहलमहेश्वराट्टहासत्वेनोत्प्रेक्ष्य सम्भावयति — राशीभूत इति । अट्टशब्दोऽतिशयवाची ॥ ५८ ॥

तस्य महेश्वराश्रयत्वेन दवाग्न्युपप्लवाभावेऽपि त्वया बलदेवसादृश्यं भवेदिति भवन्तं प्रत्युपकार्यत्वं महदस्त्येवेत्याह — उत्पश्यामीति —

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य ।

1. Ms. Sd. St. Sv. प्रतिदिशं, Vl. प्रतिनिशं।
2. B. दर्शयति।
3. B omits this word.
4. A omits this word.
5. All other com. except Dk. Jn. and Ps. read दशन for रदन।

[1]शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ५९ ॥

भिन्नमञ्जनं भिन्नाञ्जनं, स्निग्धस्य भिन्नाञ्जनस्याभेवाभा यस्य स तथोक्तः । सद्यः कृत्तो यो द्विरदस्य रदनच्छेदो दन्तखण्डः तद्वद्गौरस्तथोक्तः । ईदृशे त्वयि तादृशस्य तटगते सति मेचके वाससि हलभृतोंऽसन्यस्ते सतीव भक्तैः दिव्यजनैः स्तिमितनयनप्रेक्षणीयां तस्याद्रेर्भवित्रीं शोभामुत्पश्यामीति ॥ ५९ ॥

अथ शिवयोः पाक्षिकं कमपि सेवावकाशं तत्कालोचितं सेवाप्रकारं च दर्शयति — हित्वा तस्मिन्निति —

[2]हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता
क्रीडाशैले यदि तु[3] विचरेत्[4] पादचारेण गौरी ।
[5]भङ्गीभक्त्या विरचितवपुः [6]स्तम्भितान्तर्जलौघः
[7]सोपानत्वं कुरु [8]मणितटारोहणाय[9]ग्रयायी ॥ ६० ॥

तस्मिन् कैलासे क्रीडाशैलप्रदेशे करस्याव्यवहितस्पर्शसिद्धये भुजगवलयं हित्वा शम्भुना दत्तहस्ता यदि तु गौरी पादचारेण विचरेत् तर्हि त्वमग्रयायी भूत्वा मणितटारोहणाय स्वशरीरेण सोपानत्वं कुरु । भङ्गीभक्त्या विरचितवपुः । भङ्गीशब्देन सोपानोचितसन्निवेश उच्यते, भक्तिशब्देन विभागः ; भङ्ग्यर्हेण विभागेन विरचितशरीर इत्यर्थः । स्तम्भितान्तर्जलौघः स्वाभ्यन्तरप्रदेशावस्थितं जलौघं स्तम्भयित्वेत्यर्थः ॥ ६० ॥

अथ तत्र यात्राप्रत्यूहं देहपीडां चावश्यंभाविनीं कामप्युत्प्रेक्ष्य केन तावदुपायेन प्रतिहर्तव्याविस्याह — तत्रेति —

---

१. Jn. Vl. लीलां for शोभाम् ।
२. Jn. St. Sv. तस्मिन् हित्वा, Vl. हित्वा नीलम् ।
३. All other com. read च ।
४. Dk. Jn. Vl. विहरेत् ।
५. Ps. भृङ्गी भक्त्या ।
६. Vl. स्तम्भितान्तर्जलोऽस्याः ।
७. Dk. सोपानं त्वम् ।
८. Vl. सुखपदस्पर्शमारोहणेषु ।
९. Jn. अग्रचारी for अग्रयायी ।

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।
ताभ्यो मोक्षस्तव यदि सखे! घर्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥ ६१ ॥

यन्त्रधारागृहत्वं नेष्यन्तीति यात्राप्रत्यूह उच्यते। वलयेत्यादिना देहपीडां वदति। वलयप्रत्युप्तेन कुलिशाख्येन रत्नेन यदुद्घट्टनं तेनोद्गीर्णतोयं कृत्वेति तत्काल-विशेषणमेतत्। उद्घट्टनशब्देन स्वदेहे सर्वत्रैव सूक्ष्मसुषिरनिर्माणमुच्यते। अनयोः रापदोः परिहारोपाय उत्तरार्धेनोच्यते। आषाढमास्येव तस्य तद्देशप्राप्त्यसम्भवाद् घर्मलब्धेत्युक्तम्। लप्स्यमानस्येत्यर्थः। 'धातुसम्बन्धे प्रत्ययाः' इति भूतकालनिर्देशः। ताभ्यस्तव मोक्षो यदि न स्यादिति। एको भवान् बह्वयस्ता इति बलाबलविशेष-स्तद्धेतुको मोक्षाभावश्च यदि ते बुद्धौ स्यादित्यर्थः। क्रीडालोला इति। त्वद्ग्रहण-क्रीडाप्रसक्ता इत्यर्थः। श्रवणपरुषैरिति पारुष्यमेव सम्पाद्यं न बाधकत्वमिति विव-क्षितम्। गर्जितैरित्यशनिस्पर्शरहितैः केवलैरित्यर्थः। किं बहुना। न ताः प्रति पीडा काचिदपि कर्तव्या, भयमात्रोत्पादनेन त्वद्ग्रहणक्रीडाभिसन्धिभङ्ग एव कर्तव्य इत्याह— भाययेस्ता इति ॥ ६१ ॥

यत्तत् 'प्रालेयाद्रेः' इत्यत्र रम्यपदार्थानुभवातिक्रमणमुक्तं तदत्र न कर्तव्य-मित्याह — हेमाम्भोजेति —

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामात् क्षणमुखपटप्रीतिमैरावतस्य।
धुन्वन् कल्पद्रुमकिसलयान्यंशुकानि स्ववातै-
र्नानाचेष्टैर्जलद! ललितैर्निर्विशेस्तं नगेन्द्रम् ॥ ६२ ॥

१. Vl. जनितसलिलोद्गारमन्तःप्रवेशात्; Vs. कुलिशवलय for वलयकुलिश।
२. Jn. यदि तव।
३. Jn. Vs. भीषयेस्ताः; Ms. Sd. Sv. भापयेस्ताः।
४. Jn. कामम्।
५. Jn. Vl. ऐरावणस्य।
६. Vl. धुन्वन् वातैः सजलपृषतैः कल्पवृक्षांशुकानि।
छायाभिन्नः स्फटिकविशदं निर्विशेः पर्वतं तम्॥
७. Ml. Sd. St. Sv. अंशुकानीव वातैः।

हेमाम्भोजप्रसवीति सलिलस्य गुणातिशयं दर्शयति । कामाद्यथेच्छम् । ऐरावतस्येत्यनेनाभ्रमातङ्गत्वान्मानसविहारिषु सुरगजेषु स एव त्वया सम्भावनीयः, तस्यैव च शुक्लवर्णस्य त्वं मुखपटीभवितुं योग्य इत्युच्यते । क्षणशब्देन चिरावस्थाने सति मत्तस्य तस्य यादृच्छिकेन पीवरकरघट्टनेन भङ्गोऽपि सम्भवतीति ध्वन्यते । स्वबातैर्विशेषभूतैर्नानाचेष्टैः ललितैरिति विलासप्राधान्यं द्योतयितुमेवमभिधानं कृतं न तु ललितानामेव करणत्वशक्त्या इति मन्तव्यम् ॥ ६२ ॥

या खलु तद्वर्तिन्यलका नाम तस्यास्त्वां प्रति न लक्षणं वक्तव्यं, प्रत्यब्दमनुभूतचरत्वात् प्रत्यभिज्ञाविषयैव भविष्यतीत्याह — तस्योत्सङ्ग इति--

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमानै-
र्मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६३ ॥

या वः काले वर्षासूच्चैर्विमानैः सलिलोद्गारं वर्षधारायुक्तं अभ्रवृन्दं वहति । कथमिव ? कामिनी मुक्ताजालग्रथितमलकमिव । तामलकां तस्योत्सङ्गे प्रणयिनीमिव शोभमानां दृष्ट्वा न पुनर्न ज्ञास्यसे ; कामचारित्वेन प्राप्तिसम्भवात् ज्ञास्यस एवेत्यर्थः । उत्सङ्गवर्तिन्या कामिन्या साम्यं वक्तुमुक्तं स्रस्तेति ॥ ६३ ॥

॥ पूर्वसन्देशः समाप्तः ॥

Jn. Ml. Vl. उच्चैर्विमाना for उच्चैर्विमानैः ।

अथ उत्तरसन्देशः ।

अथ 'गन्तव्या ते वसतिरलका नाम' इति नामशब्दाभिहिताया रमणीयताप्रसिद्धेर्याथार्थ्यं दर्शयन् पुरं तावद्वर्णयति — विद्युत्वन्तमिति—

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहत[1]मुरवाः स्निग्ध[2]पर्जन्यघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ १ ॥

तैस्तैरुक्तैरनुक्तैश्च विशेषैः रमणीयत्वद्योतकैः व्यावर्तकधर्मैस्त्वां तुलयितुं त्वत्साम्यं सम्पादयितुमलं पर्याप्ता भवन्तीति ॥ १ ॥

यत्र षण्णामप्यृतूनां नित्य[3]सन्निधानाद् वध्वः सदैव सर्वर्तुकुसुमालङ्कृता भवन्तीत्याह —

हस्ते लीलाकमलम[4]लका बा[5]लकुन्दानुविद्धा
नीता लोध्रप्रसवरजसा पाण्डुताम[6]ननश्रीः ।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ २ ॥

[7]पाण्डुतां नीता लब्धपरभागा चूडापाशे केशकलापे । त्वदुपगमशब्देन यत्कुसुममात्रसम्पत्तये वर्षर्तोः ऋत्वन्तराणामिव नित्यसन्निधानं तदनूद्यते न तु तादात्विको मेघस्य तद्देशसम्बन्ध इति मन्तव्यम् । भवतिक्रिया च सर्वत्रैव द्रष्टव्या । अलकसम्बन्धे बहुवचनान्ता कर्तव्या ॥ २ ॥

एवं प्रासादेषु स्त्रीषु च वर्णितासु तत्र ताभिः सह यक्षाणां मधुपानप्रकारान्तरमाह —

---

१. All other com. except Dk. and Ps. read मुरजाः ।

२. All other com. except. Dk. Jn. and Ps. read गम्भीर for पर्जन्य ।

३. B. सन्निधौ for सन्निधानात् ।

४. Ms. Sd. Sv. Vl. अलकं, Jn. Ml. अलके for अलका ।

५. Dk. बालकुन्दानुवेधो, Jn. Vl. Vs. बालकुन्दानुविद्धं ।

६. Dk. Ml. आनने श्रीः for आननश्रीः ।

७. B. पाण्डुतालब्धपरभागा ।

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमखचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूति
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ३ ॥

यस्यां नगर्यां पुष्करेषु वाद्यमुखेषु आहतेषु सत्सु सितमणिमयानि अत एव ज्योतिश्छायाकुसुमैः खचितानि रूषितानि हर्म्यस्थलानि एत्य उत्तमस्त्रीसहायाः, अत एव रतिफलं तत्प्रवर्तकं कल्पवृक्षप्रसूति मधु आसेवन्ते । त्वद्गम्भीरेति । तव गम्भीरा ध्वनिर्येषामिति विग्रहः । शनकैरित्यारम्भकालभावी स्वभाव उक्तः ॥ ३ ॥

अथ मधुप्रयुक्ते रत्यारम्भे तासां लज्जारागगर्भौत्क्यसाध्वससम्मिश्रांश्चेष्टाविशेषान् युवजनानुरागोद्दीपकान् दर्शयति —

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ४ ॥

प्रियेषु क्षौममाक्षिपत्सु ह्रीमूढानां बिम्बाधराणां चुम्बनविमर्दाभिव्यञ्जितबिम्बसादृश्याधरमणिविद्योतितमुखपङ्कजानां स्त्रीणां दीपनिर्वापणोद्देशेन प्रेरिता चूर्णमुष्टिः रत्नप्रदीपानभिमुखं प्राप्यापि रत्नमयत्वादेव निर्वापणाभावाद् यत्र विफलप्रेरणा भवति इत्यर्थः । रागादिति पदं मध्यवर्ति कर्तृविशेषणेन कर्मविशेषणेन च

१. Ml. Ms. Sd. रचितानि, Dk, Jn. Vl. Vs. रचनानि ।
२. Ps. प्रसूतिं, all other com. read प्रसूतं ।
३. Jn. मधुरं for शनकैः ।
४. Ps. उच्छ्वसन for उच्छ्वसित ।
५. Ms. Sd. Sv. Vl. Vs. यक्षाङ्गनानां ।
६. St. Vl. वासः कामात् for क्षौमं रागात् ।
७. Dk विद्युद्दीप्रान् for अर्चिस्तुङ्गान् ।
८. Vl. प्रेरणश्चूर्णमुष्टिः ।

सम्बध्यते । रागाद्धेतोरनिभृताः प्रियासु तत्तदङ्गोचितं किमपि किमपि कुर्वाणाः करा येषामिति विग्रहः । रागाद्धेतोः नीवीबन्धे यदुच्छ्वसितं तेन शिथिलमिति च ॥ ४ ॥

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमे-[1]
रालेख्यानां सलिलकणिकादोषमुत्पाद्य सद्यः ।[2]
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यन्त्रजालै-[3]
र्धूपोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ५ ॥[4]

सततगतिना नेत्रा प्रापकेणान्तरा नीताः त्वादृशाः त्वत्सयूथ्याः जलमुचो यद्विमानाग्रभूमेः आलेख्यानां चित्राणां सलिलकणिकाभिः दोषकणिकां प्रमादादुत्पाद्य शङ्कास्पृष्टा इव चिरावस्थाने सति जानीयुरेतेऽस्मत्कृतं दोषमिति शङ्कमाना इव सद्यः तत्रत्येषु लीलाव्यग्रेषु सत्सु धूपोद्गारानुकृतिनिपुणाः पश्यतां जनानां धूपोद्गारबुद्धिमेव जनयन्तो यन्त्रजालैः निष्पतन्ति । न तु यथागतं जालानां बहुछिद्रत्वात्[5] । जर्जराः विशीर्णाङ्गाश्च भविष्यन्ति ।

ननु कोऽनेन श्लोकेन पुरवर्णनोपयुक्तोऽर्थः कथ्यते । न तावच्चित्रवत्त्वं सचित्रा इत्युक्तत्वात्, नापि तुङ्गत्वं अभ्रंलिहाग्रत्वकथनात्, न च धूपगवाक्षसद्भावः तस्योज्जयिन्यां मनुष्यालयेऽप्युक्तत्वात्; अतो मेघजनवृत्तान्तकथनमात्रमनर्थकमेतत् । अत्रोच्यते — सत्यं, नैष पुरवर्णनोपयुक्तः श्लोकः; किन्तु चतुर्भिः श्लोकैः पुरसौन्दर्यं तत्रत्यानां स्त्रीणां सर्वर्तुकुसुमालङ्कृतत्वं, ताभिः सह यक्षाणां मधुपानप्रवृत्तिमनन्तरभाविनि रत्यारम्भे तासां लज्जादिभावविशेषांश्च दर्शयित्वाऽनेन श्लोकेन मेघान्तरव्यापाराभिधायकेन तथापि तत्रैतत् सर्वं प्रत्यक्षमेवानुभवितुं निष्क्रमणप्रवेशावीषत्करावेवेत्युच्यते । तस्मात्

'पर्यायोक्तं विना वाच्यवाचकत्वे वचस्तु यत्'

इति यदुच्यते सोऽत्रालङ्कार इति मन्तव्यम् ॥ ५ ॥

---

१. Dk. Jn. Ml. Vl. Vs. भूमीः for भूमेः ।
२. Jn. Sv. स्वजलकणिकादोषमुत्पाद्य; Ps. Vl. Vs. नवजलकणैर्दोषमुत्पाद्य ।
३. Jn. Vl. Vs. यत्र जालैः; Ml. जालमार्गैः ।
४. All other com. except Ps. and Vs. read धूम for धूप ।
५. B. छिद्रत्वात् ।

अथ विनैव पुरुषव्यापारं सुरतग्लानिविनयनप्रकारमाह —

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गिताना-
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ६ ॥

यत्र स्त्रीणां सुरतजनितामङ्गग्लानिं निशीथे चन्द्रकान्ता **व्यालुम्पन्ति** । **कीदृशाः?** वितानाधोभागे तन्तुजालावलम्बाः तन्तुषु प्रोतास्तथा **स्वमहिमसिद्धेन** त्वत्संरोधापगमेन नित्यविशदैः हरशिरश्चन्द्रस्य पादैः किरणैः **स्फुटजललवस्यन्दिनश्च** । **स्त्रीजनमपि** विशिनष्टि — प्रियतमानां भुजैः सञ्जातोच्छ्वासा **यथा भवन्ति तथा** । **दृढमालिङ्गितानां** भुजानां कठिनत्वेन [illegible] स्वाभाविकमबलात्वं **रागवशान्नैव स्मरन्ति** पुरुषा इति ध्वन्यते । प्रियतमशब्देन ता अपि स्वाशक्तिं नैव **स्मरन्तीति द्योत्यते** । **निशीथशब्दो** रात्रिमात्रं लक्षयति । निशायामिति वा पाठः ॥ ६ ॥

'हस्ते लीलाकमलम्' इत्यत्रालङ्कारेण सुन्दरीजनवर्णना कृता । अथ **स्वाभाविकेन गुणेन वर्णयन्** पुरवर्णनामवसाययति —

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ७ ॥

यत्र धनपतिसखं अत एव तस्मिन् देशे साक्षात् प्रत्यक्षमेव वर्तमानं **देवं मत्वा निरूप्य भयात्** मन्मथः चापं प्रायो न वहति । नैव वहतीत्यर्थः । अत **एव विभ्रमैरेवेत्येवकारः** । षट्पदज्यमिति । अनेन ज्याभूताः षट्पदा अपि **सर्वर्तुकुसुमालंकृते तस्मिन् देशे स्वानुभवपरा** एव भवन्ति, न ज्याभावक्लेशमनुभवन्तीति **ध्वन्यते । किं तर्हि** तत्र रागोत्पत्तिकारणम् । तदाह — **सभ्रूभङ्गेति । तस्य** मन्मथस्य

१. Ms. Sd. Sv. Vl. Vs. भुजालिङ्गनोच्छ्वासितानां ।

२. Jn. इन्दुपादैर्निशीथे; Sd. प्रेरिताश्चन्द्रपादैः; St. द्योतिताश्चन्द्रपादैः; Vl. द्योतिताश्चन्द्रपादैः; Vs. च्योतिताश्चन्द्रपादैः ।

३. B. हरशिरश्चन्द्रपादैः ।

४. B. लीलाकमलमित्यलङ्कारेण ।

५. Dk. त्वामपि प्रेक्ष्य कामः for मन्मथः षट्पदज्यं ।

६. Jn. St. Sv. सभ्रूभङ्गं प्रहितनयनैः ।

कामिलक्षेष्वारम्भः शरप्रयोगव्यापारः चतुरवनिताविभ्रमैरेव सिद्धः सिद्ध्यतीत्यर्थः । विभ्रमाणां धनुश्शरप्रत्यादेशकत्वं दर्शयंस्तान् विशिनष्टि—सभ्रूभङ्गेति ॥ ७ ॥

अथ स्वभवनाभिज्ञानमाह—

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योद्याने कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥ ८ ॥

तत्रेति । तथाविधायामलकायामित्यर्थः । अनेन तथाविधत्वं तावदस्मदगारस्याप्यस्तीति सामान्यलक्षणमुक्तं भवति । विशेषलक्षणमुच्यते—धनपतिगृहादुत्तरेणास्मदीयमगारमिति । अदूरत्वमनेन प्रत्ययेनोच्यते । अदूरत्वकथनेन सौन्दर्येऽप्यल्पान्तरत्वमुक्तं भवति । परिवारजनानां पर्यन्तभवनानां च राजकुलेषु तथा दर्शनात् । एवं दिगन्तरव्यावृत्तिरुक्ता । भवनान्तरव्यावर्तकानि लक्षणानि उच्यन्ते । सुरपतेर्धनुरिव चारुणा, रत्नमयेनेति यावत्, तोरणेन द्वारि स्थितेन दूराल्लक्ष्यम् । तथा चास्योद्याने मे कान्तया कृतकतनयत्वेन वर्धितः प्रायेणेदानीं हस्तप्राप्यस्तबकनमितो बालो मन्दारजातीयो वृक्षो भवति । देवतरुविशेषवाची मन्दारशब्दः ॥ ८ ॥

वापी चास्मिन् मरतकशिलाबद्धसोपानमार्गा
हैमैः स्फीता कमलमुकुलैर्दीर्घवैडूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ ९ ॥

१. Dk. Ml. Ps. Vs. गृहान् for गृहात् ।
२. Dk. Jn. Ps. Vl. त्वदमरधनुश्चारुणा ।
३. Ml. Vl. यस्योपान्ते ।
४. Jn. वर्धितः कान्तया ।
५. A. जनानां for भवनानां ।
६. Sd. Ml. Vs. बद्धा, Vl. स्यूता for स्फीता ।
७. Ml. Ms. Sd. Sv. St. Vl. स्निग्धवैदूर्यनालैः ।
८. Ps. तीरे for तोये ।
९. Dk. नाध्यास्यन्ति ।

वापी चास्मिन् उद्याने अस्तीति शेषः। मरतकशिलाभिः **बद्धसोपानमार्गः यस्या इति** विग्रहः। मुकुलबाहुल्यकथनेन भूप्रदेशस्य सलिलस्य च गुणातिशयोऽन्वहमभिनवकुसुमसद्भावश्च सूचितः। नालदैर्घ्यकथनेनागाधतोयत्वमुक्तम्। दीर्घत्ववैडूर्यत्वयोरवगमः तोयस्वच्छत्वाद् भवति। तोयस्वच्छत्वस्य वर्षतावप्यनपायं **दर्शयति यस्यास्तोय** इति ॥ ९ ॥

तस्यास्तीरे विहित[1]शिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टन[2]प्रेक्षणीयः।
मद्गेहिन्याः प्रिय इति सखे! चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरित[3]तटितं त्वां तमेव स्मरामि ॥ १० ॥

तस्यास्तीरे क्रीडाशैलोऽप्यस्तीति शेषः। शैलं विशिनष्टि—**पेशलैः** चारुभिः **इन्द्रनीलैर्विहितशिखरः**। सर्वावयवोपलक्षणार्थः शिखरशब्दः। कनकमयीभिः **कदलीभिः वेष्टनेन** हेतुना परभागलाभात् प्रेक्षणीयश्च भवति। एवं पूर्वार्धेन शैलसन्निवेशमुक्त्वा तं प्रत्यात्मनः शोकसद्भावमसावप्यवसरे मयानुग्राह्य एवेति तस्य बुद्धिमुत्पादयितुमाह---**मद्गेहिन्या** इति। **सखे!** असौ मया सह स्वैरविहारलोलुपाया **मद्गेहिन्याः प्रियः** सन् अद्य मद्विरहास्वस्थया तयोपेक्षितः शोच्यामवस्थां **गतः**। अतः कारणादुपान्तस्फुरिततटितं नीलरुचं त्वां प्रेक्ष्योद्बुद्धसंस्कारोऽहं **कातरेण चेतसा तमेव स्मरामि**। न तु चेतो विषयान्तरं नेतुं शक्नोमीत्यर्थः ॥ १० ॥

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहल[4]च्छद्मनास्याः ॥ ११ ॥

अत्रोद्याने रक्ताशोकः केसरश्चस्त इति शेषः। अशोकं विशिनष्टि—**चलकिसलयः** मृदुपवनचलितपल्लवतया नयनवल्लभः। अनेन तत्र चण्डमरुतामनवतारः सूचितः। केसरं विशिनष्टि—**कान्तः**। सोऽपि न पश्यतां जनानां नयननिकरमन्यतो नेतुमनुमन्यत इत्यर्थः। उद्यानगतयोरनयोर्देशविशेषं दर्शयति—**प्रत्यासन्ना-**

१. Vl. निचित for विहित।
२. Sv. वेष्टित for वेष्टन।
३. Jn. Sd. St. स्फुटिततटितं।
४. Jn. दौहृद, Vl. Vs. दोहद।

विति। अथ तयोरेतत्संवत्सरव्यापि कुसुमराहित्यमप्यभिज्ञानतया दर्शयति—एक इति। तयोरेकः पूर्वो मया सह वर्तमानायास्तव सख्या मद्भार्याया इति यावत्, वामपादमुन्निहितालक्तकार्द्रं दोहलच्छद्मनाभिलषति। अन्यो द्वितीयोऽस्या मत्सहिताया एवेत्यर्थः, वदनमदिरां दोहलच्छद्मना काङ्क्षति। पुष्पोद्गमसिद्ध्यर्थमित्युभयत्रापि सिद्ध्यति। अत्र छद्मनेति निर्देशान्नैतत् पारमार्थिकं तयोरपि पुंस्त्वाविशेषादस्मदभिप्राय एव अभिप्रायः सम्भवति। तादात्विकः पुष्पोद्गमोऽपि तदानन्दपुलकोद्गमतया सम्भावित एवेति व्यज्यते ॥ ११ ॥

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
मूले बद्धा[1] मणिभिरनतिप्रौढवंशप्रकाशैः।
तालैः शिञ्जद्वलयसुभगैर्[2]नर्तितः कान्तया[3] मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ॥ १२ ॥

तयोर्मध्ये अनतिप्रौढवंशप्रकाशैः बालवेणुनिभैः मणिभिः मरतकैः मूले बद्धा कृतवेदिका उपरि स्फटिकफलका काञ्चनी वासयष्टिः अस्तीति शेषः। यस्यासौ वासयष्टिस्तमाह— तालैरिति करतालैरित्यर्थः। वः सुहृदिति सोऽवश्यं त्वदभिगमनं नृत्तेन सम्भावयिष्यतीति ध्वन्यते॥ १२ ॥

एवं बहूनि लक्षणान्युक्त्वा तैर्लक्षणीयत्वमगारस्याह—

एभिः साधो! हृदयनिहितैर्लक्षणैर्लक्षयेथा[4]
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥ १३ ॥

हृदयनिहितैरिति काले स्मर्तुं मुहुर्मुहुरनुसन्धातव्यानीत्यर्थः। द्वारोपान्ते द्वारपालस्थाने लिखितवपुषौ चित्रार्पितशरीरौ शङ्खपद्मौ च दृष्ट्वा। निधिद्वयाधिदेवतापरौ शङ्खपद्मशब्दौ। इदं तु यक्षभवनत्वमात्रावगमकं लक्षणं न विशेषलक्षणान्तर्भूतमिति लक्षणान्तरेभ्यः पृथक्कृतमिति मन्तव्यम्। अथ भवनान्तरव्यावृत्तं

---

१. Vl. नद्धा।
२. Dk. Ml. St. शिञ्जावलयसुभगैः।
३. Jn. कान्तया नर्तितः।
४. Vl. लक्षणीयं for लक्षयेथाः।

स्वभवनवर्त्ति सकलपदार्थगामि तत्कालसम्भावितलक्षणमाह — **क्षामच्छाय-मिति** ॥ १३ ॥

अथास्य स्वभार्यादर्शनोपयुक्ताः प्रवृत्तीरुपदिशति —

गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ १४ ॥

सद्यः सम्यगवगमनानन्तरमेव [illegible] प्राप्तुं **कलभतनुतां गत्वा** गजप्रेक्षणीयो भवान् शिशुर्भूत्वेत्यर्थः । पूर्वोक्ते क्रीडाशैले **निषण्णः** निषद्य श्रममपनीय तत्सम्भावनां च कृत्वेत्यर्थः । [illegible] प्राप्य विद्युदुन्मेषात्मिकां **दृष्टिमल्पाल्पभासं** ईषदुन्मीलितां कर्तुं [illegible] **अन्तर्भवनपतितां कर्तुमर्हसि** । अल्पत्वपरिमाणं दर्शितं खद्योतालीनि[illegible] इति । सानुशब्देनैव रम्यत्व उक्ते रम्यत्वविशेषणमाधिक्यं बोधयितुं [illegible] ॥ १४ ॥

अथान्तर्भवनपतितायां दृष्ट्यां [illegible] दृश्यते तां मत्प्रेयसीं जानीया इत्युत्तरश्लोकपूर्वार्धसमासेन [illegible] —

तन्वी श्यामा शिखरदशना[4] पक्वबिम्बाधरोष्ठी
मध्येक्षामा चकितहरिणीप्रेक्षणा[5] निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये[6] सृष्टिराद्येव धातुः ॥ १५ ॥

तां जानीयाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।

१. Dk. रत्नसानौ ।

२. A. अल्पावभासं ।

३. A. उत्कलिकां for उन्मीलितां ।

४. Dk. Jn. Ml. Ms. St. शिखरिदशना. Pd. अशिखरदशन[illegible]

५. Vl. प्रेक्षणी ।

६. Jn. विषया ।

तन्वी तनुतरा **श्यामा** न शुक्ला कृष्णा वा **शिखरदशना** ।

'पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुः ।'

इति हलायुधः । शिखराख्यमाणिक्यवदस्थूलस्निग्धारुणदन्ती । अधररागवशादारुण्यसिद्धिः । पक्वबिम्बसदृशावधरोष्ठौ यस्या इति विग्रहः । **मध्येक्षामा** अलुक्समासोऽयम् । अलसशब्देन मान्द्यमुच्यते । एवं रागातिशयात् कांश्चिदवयवान् वर्णयित्वा शेषावयववर्णनामेकयोक्त्या करोति—**युवतिविषये** युवतिजनमधिकृत्य **धातुराद्या** उत्तरसृष्टौ दृष्टान्तसम्मता **सृष्टिरिव** वर्तमाना इति । अनेन धातुस्तदङ्गसृष्टेर्नार्यन्तरसृष्ट्युपयोगित्वोत्प्रेक्षणेन लक्षणकृतां तावत् धातृसम्मतानिर्दोषलक्ष्यदर्शनापेक्षिणां तदङ्गसौष्ठवदर्शनमेव तथात्वविधौ तद्विपर्यये निषेधे वा शरणमित्युक्तं भवति । अस्ति हि विपर्यये निषेधः —

'अतिदीर्घा भृशं ह्रस्वा अतिस्थूला भृशं कृशा ।
अतिगौरा भृशं काली षडेताः वर्जिताः स्त्रियः ॥''

इति । अस्ति च तथात्वविधिः —

'श्लक्ष्णैः स्निग्धैः सितैर्दन्तैः शोभनत्वं च गच्छति ।'

इत्यादि । तस्याः स्वजीवितत्वकथनेन तदपाये स्वापायनिश्चयमाह—**मयि दूरीभूते सहचरे दूरीभूते चक्रवाकीमिव** वर्तमानामिति । दूरीभूतपदं सप्तम्यन्तेन द्वयेनापि सम्बन्धनीयम् । गाढोत्कण्ठेत्यनन्तरमेवानुर्वादितुमिदं दृष्टान्तदानम् । **एकामिति** । इदमपि लक्षणकथनमेव । ईदृशी खल्वाकृतिः सदृशेन केनचित् पुरुषेण सद्वितीयैव सदा भवति । अत एकत्वमपि तद्राहित्यात्मकं दृश्यमानं मत्कलत्रत्वमेव ज्ञापयति इति भावः ॥

एवं तस्याः सहजं लक्षणमुक्त्वा तत्कालसम्भावितमपि क्षामच्छायमितिवल्लक्षणमाह—

गाढोत्कण्ठा विरहदिवसेष्वेषु गच्छत्सु बाला
जाता मन्ये शिशिरमथिता पद्मिनीवान्यरूपा ॥ १६ ॥

मन्ये एषु मासाष्टकवर्तिषु गुरुषु एकैकशोऽतिदीर्घेषु **दिवसेषु गच्छत्सु** सा **बाला** क्लेशासहा **गाढोत्कण्ठा** च सती **अन्यरूपैव जाता** न तु रूपविका-

---

१. Ml. Vl. V३. गाढोत्कण्ठां ... बालां जातां ... मथितां पद्मिनीं वान्यरूपाम् ।

रमात्रमापन्ना इति । शिशिरमथिता पद्मिनीवेति । अनेन मत्सान्निध्ये पुनरपि कन्दलिता भविष्यतीति ध्वन्यते । १६ ॥

अथ सहजतात्कालिकयोः शोभातदभिभवयोः समावेशमुक्तं तस्या मुखे तावद्दर्शयति —

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः[1]
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरण[2]क्लिष्टकान्तेर्बिभर्ति ॥ १७ ॥

स्पष्टोऽर्थः ॥ १७ ॥

अथ व्यापारानपि तस्यास्तत्कालसम्भवान् लक्षणत्वेन कथयति — आलोक इति त्रिभिः —

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं[3] लिखन्ती ।
पृच्छन्ती वा मधुरवचनां[4] शारिकां पञ्जरस्थां
कच्चिद् भर्तुः स्मरसि गिरिके[5] ! त्वं हि तस्य प्रियेति ॥ १८ ॥

आसां क्रियाणामन्यतमसंयुक्ता सा प्रायेण आलोके निपतिष्यतीति वाक्यार्थः । 'यावत्पुरानिपातयोर्लट्' इति लट्प्रत्ययः । बलिव्याकुला वा नित्यकर्मणि देवार्चनादौ व्यग्रा वेत्यर्थः । मत्सादृश्यं लिखन्ती वा । सादृश्यं विशिनष्टि — विरहतनु विरहेण कृशम् । पुनरपि विशिनष्टि — भावगम्यमिति । स्वात्मदृष्टान्तेन स्वबुद्धि-परिकल्पितं स्विन्नहस्ततयाश्रुकलुषेक्षणतया च लेखनापरिसमाप्तेनैव लिखित्वा पश्यन्ती इति शतृप्रत्ययेनोच्यते । मन्नामग्रहणाद्विशेषतोऽस्या मधुरवचनां शारिकां शुकीं पृच्छन्ती वा । प्रश्नप्रकारमाह — कच्चिद् भर्तुः स्मरसि इति । न परमिदं तथा-

१. Jn. बहूनां for प्रियायाः ।

२. Dk. उपगमन, Jn. Vl. उपसरण for अनुसरण ।

३. Jn. भाव्यगम्यम् ।

४. Jn. मधुरवचनम् ।

५. Jn. Ms. Ml. Sd. St. Sv. Vs. रसिके, Ps. सुभगे, Vl. निभृते for गिरिके ।

ममात्रमेव स्मरसि, तमपि स्मरस्येव कच्चिदित्यर्थः । स्मरणनिश्चये कारणमाह—त्वं हि तस्य प्रियेति । पञ्जरस्थामिति । यामपकोष्ठनिवेशनं तु विरहिणां न सम्भवतीति भावः ॥ १८ ॥

उत्सङ्गे वा मलिनवसने सौम्य[1]! निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीरार्द्रा[2] नयनसलिलैः सारयित्वा कथञ्चित्
भूयो भूयः स्वयमधिकृतां मूर्च्छनां विस्मरन्ती ॥ १९ ॥

तामनुशोचति । उत्सङ्गे मलिनवसने वीणां निक्षिप्य नयनसलिलैरार्द्रीभूतास्तन्त्रीश्च वसनाञ्चलादिभिः सारयित्वा शोषयित्वा मद्गोत्राङ्कं मन्नामाङ्कितं यथा भवति तथा विरचितपदं गेयमुद्गातुकामः सती स्वयमधिकृतां मूर्च्छनां रागक्रमं विरहवेदनया मुहुर्मुहुर्विस्मरन्ती वा ॥ १९ ॥

शेषान् मासान् विरह[3]दिवसस्थापितस्या[4]वधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीमुक्त[5]पुष्पैः ।
मत्संयोगं[6] हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ २० ॥

विरहदिवसस्थापितस्य विरहप्रथमदिवस एव निरूप्य निर्णीतस्य अवधेः संवत्सरान्त्यदिवसस्य सम्बन्धिनः शेषान् अनतिवाहितान् मासान् देहल्यामलङ्कारार्थतया मुक्तैः पुष्पैः गणनया भुवि विन्यस्यन्ती दिनाद्यवयवैः विभज्य गणनया न्यस्यन्तीत्यर्थः । मत्संयोगमिति । वियोगावसानोत्सवदशामिति यावत् । हृदयनिहितारम्भमिति क्रियाविशेषणम् । आरम्भशब्देन तत्कालसम्भावितानि क्रियान्तराण्युच्यन्ते । स्वबुद्धिपरिकल्पितैः क्रियान्तरैरुपबृंहितैः यथा भवति तथा मदागमन-

---

१. Vl. सोम्य ।
२. Ml. Vs. तन्त्रीमार्द्राम् ।
३. Vl. गमन for विरह ।
४. Vl. प्रस्तुतस्य for स्थापितस्य ।
५. Ml. Vl. दत्त for मुक्त ।
६. Ml. सम्भोगम् ।

सुखमास्वादयन्ती वेति वाक्यार्थः । क्रियान्तराणि च ससम्भ्रमोपसरणगाढालिङ्गनालकोत्सारणाश्रुपरिमार्जनवेणीशिथिलनसान्त्वनसम्भाननादीनि तस्या हृदये सम्भावितानि इति । उक्तव्यापारोपेतत्वकथनं लोकाख्यं प्रमाणं दर्शयति —मार्गेणैव इति ॥ २० ॥

एवमाह्निकव्यापारकथनेनाहस्तत्समाश्वासनकालत्वमुक्तम् । रात्रेरपि तद्योग्यत्वं दर्शयन्नाह—

सव्यापारामहनि न तथा पीडयेद्विप्रयोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥ २१ ॥

अत्राहःकालाद्रात्रिकालस्य सुखापनयनमात्रकालत्वशङ्कया रात्रिर्न वृथा नेतव्या, गतिवशादुपागतः कालः सर्वोऽपि सखा पत्यर्थो योजयितुं कल्प्यः, न त्वहःकालस्य व्यवहाराङ्गतया लोकसिद्धस्य 'आलोके ते निपतति' इत्यादिना च स्वयमुपदर्शितबहुविधाभिज्ञानस्य निषेधार्थतया इति मन्तव्यम्, अहर्निन्दापदपरतया तन्निषेधपरत्वस्यानङ्गीकार्यत्वात् । य एते तथाशब्दस्तरप्प्रत्ययोऽलं सुखयितुमिति अलंशब्दश्च रात्रिप्रशंसां कुर्वन्ति इमेऽहन्यपि पीडाशोकयोः सद्भावं तदपनयने तस्याः सुखसद्भावं च बोधयन्तोऽहःकालविधानस्याप्युपपादका एव इति रात्रिमुख्यत्वकथनमपि विशेषतः सायमतिथेः पूज्यत्वकथनवद् द्रष्टव्यम् । न हि तत्रापि दिवागतोऽतिथिः कथञ्चिद्विलम्बेन सायन्तनः कर्तव्य इति तत्प्रशंसावाक्यस्यार्थो भवति । किञ्च एवंवादिनां निशीथावधानदर्शनाद् रात्रिभागान्तरयोरपि निषेधः कल्प्यः स्यात् । न चैवं कल्पयितव्यम् । उत्तरश्लोक एव 'नीता रात्रिः' इति रात्रिपदप्रयोगात् । शाकुन्तले च

'अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या ।' ✓.

---

१. Vl. खेदयेत् for पीडयेत् ।
२. Dk. Ms. Sd. St. Sv. मद्वियोगः for विप्रयोगः ।
३. Jn. Vl. अतः for अलम् ।
४. Dk. विरह for अवनि ।
५. Dk. Jn. Ms. Sd. ०शयनां सप्तवातायनस्थः, Ml. ०शयनां सौधवातायनस्थः ।

इत्युक्तत्वात् । तस्मादार्तपरित्राणप्रवृत्तस्य तव निशीथकालेऽपि तदानीमार्त्यतिशयसद्भावाद् ग्राह्य एव । न त्वकालत्वशङ्कया [illegible] मूर्च्छादिदोषान्तरावकाशो दातव्य इत्येवात्र विवक्षितम् । अयं च [illegible] धारां [illegible]कुलत्वाद्युक्तव्यापारोपेतां ते सखीमहनि विप्रयोग[illegible] न पीडयेत् [illegible] न पीडयेत् । रात्रौ तु निर्विनोदां, हेतुगर्भमिदं, [illegible] । अत्र तस्मादिति शब्दोऽर्थसिद्धो द्रष्टव्यः । [illegible] निशीथे पश्य वीक्षस्व । साध्वीमिति विशेषणेन

"[illegible] ।
[illegible] ॥"

इति निषेधस्य नेयं विषय [illegible] ऽपीति शेषः । अवनिशयनासन्नवातायन[illegible] अधिकरणे ल्युट्, आसन्नं यद्वातायनं गवाक्षः [illegible] ॥ [illegible]१ ॥

अथ तत्कालसम्भाविनं [illegible] आधिक्षामामिति चतुर्भिः —

आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥ २२ ॥

विरहशयने अवनिशयने[illegible] । संनिषण्णैकपार्श्वामिति पार्श्वान्तरपरिवर्तनेऽपि नास्या बुद्धि[illegible] । [illegible]वस्था तस्याः शोभावहैव भवतीति दर्शयन्नाह — प्राचीमूले [illegible] हिमांशोः तनुमिव । अत्र दर्शस्थस्य दर्शनायोग्यत्वाच्चतुर्दशी[illegible] हिमांशोरभिधानमिति द्रष्टव्यम् । कलामात्रशेषामित्यपि कृशामित्येव विवक्षितम् । एवं शयितायास्तस्या निद्राभावः पूर्वश्लोक

१. Ms. Sd. Sr. विरहजनितैः, [illegible] विरहपातितैः ।
२. Vl. संनिकीर्णैकपार्श्वाम् ।
३. Vl. मत्संयोगः कथमुपनमेत्स्वप्नजोऽपीति निद्रामाकाङ्क्षन्ती नयनसलिलोत्पीडरुद्धावकाशाम् ।
४. All other com. except Dk. Ps. and Ml. read क्षणमिव ।

एवोक्तः । धत्ते च [illegible] --- नीमेति । इच्छारतैरिति इच्छानियमिततत्करणोपचार[illegible] । [illegible]ीम् । अनया विरहावस्थया कल्पप्रायाम् ॥ २२ ॥

निःश्वासेना[illegible] [illegible] निक्षिपन्ती
शुद्धस्नानात् [illegible] [illegible]म् ।
मत्संयोगः [illegible] [illegible] निद्रा-
मा[illegible] [illegible] [illegible] [illegible]साम् ॥ २३ ॥

निःश्वासेनाल[illegible] [illegible] [illegible]नुशोचति अधरेति । अधरमनुशोचति शुद्धात् [illegible] [illegible] परुषं अपेतस्निग्धभावम् । पारुष्यहेतुत्वेन [illegible] [illegible]म् । अभिविषावाकाराः । अनेन श्वाससम्बन्ध[illegible] [illegible] [illegible]सिद्धये पूर्वश्लोका- न्वेतव्यः । [illegible] [illegible] [illegible]या निद्राभावक्लेशपरि- जिहीर्षया केलि [illegible] [illegible] [illegible] [illegible]पि न गच्छेत् येना- काङ्क्षया वर्तमान[illegible] [illegible] [illegible]काङ्क्षामिति ॥२३॥

आर्द्रे [illegible]
शा[illegible] [illegible] ।
स्पर्श[illegible] [illegible]
[illegible] [illegible] [illegible] ॥ २४ ॥

आर्द्रे विरहा[illegible] [illegible] [illegible] [illegible]क्त्वा तथा स्वयैव बद्धा या ताम्[illegible] [illegible] [illegible] [illegible] [illegible]नीम् । करशब्दनिक्षेपणा[illegible] [illegible] [illegible] [illegible] [illegible] दर्शयति --- कठिनविषमामिति । क[illegible] [illegible] कठिनां त्रिभा पञ्चषा वा

---

१. Ms. Sd. St. Sv. Vl. [illegible] ।
२. Vl. नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहशयनेष्वश्रुभिर्यापयन्तीम् ।
Dk. Ms. मत्सम्भोगः ।
३. Ju. कथमुपनयेत्, St. कथमपि भवेत्, Ms. Sd. Sv. सुखमुपनयेत् ।
४. Ms. Sd. St. सा मयोद्वेष्टनीया, Vl. सा मयोन्मोचनीया ।
५. All other com. read स्पर्शक्लिष्टां ।
६. Vl. कठिनविषमात् ।

विभक्तेः केशमुष्टिभिरेकत्वेन रज्जुवद् भ्रमणाद् विषमां च इत्यर्थः । करमपि तस्याः पूर्वावस्थाविरहात् पश्यतां जनानां दयाविषय एव भवतीति द्योतयन् विशिनष्टि — अयमितनखेनेति । अशिक्षितनखेनेत्यर्थः । अस्य वेणीबन्धस्यावधिं दर्शयन्नाह — शापस्यान्ते मया उद्वेष्टनीयां उद्भूतसन्निवेशं शिथिलीकृत्य मदभ्यस्तेन प्रकारेण वेष्टनीयामित्यर्थः । विगलितशुचा वियोगदुःखमतिक्रान्तमात्रेण मया सद्य एव इत्यर्थः ॥ २४ ॥

पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव ।
खेदाच्चक्षुः सलिलगुरुभिः पक्ष्मभिश्छादयित्वा
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥ २५ ॥

शशधरस्य इन्दोः पादान् अमृतमयत्वेन शिशिरान् जालमार्गेणान्तः प्रविष्टान् पूर्वप्रीत्या मत्सन्निधिसमयसम्भूतया प्रीतिवासनया सहसाभिमुखं गतं अथ भूयः खेदात् तथैवाकृतार्थतयैव सन्निवृत्तं चक्षुः सलिलेन बाष्पभरेण गुरुभिः पक्ष्मभिः छादयित्वा न प्रबुद्धां न सुप्तां निमीलनोन्मीलनयोरन्तरालावस्थां प्राप्ताम् । उक्तरूपत्वं तस्य दृष्टान्तेन दर्शयति — साभ्रेऽह्नीति । एवंभूतां तां पश्येति पूर्वयैव क्रियया सम्बन्धः ॥ २५ ॥

एवं सव्यापारामित्यनेन सह पञ्चभिः श्लोकैः क्लेशातिशयवशाद् एवं शयिता सा निशीथेऽपि द्रष्टव्यैव इत्युक्त्वा तथापि तद्दर्शनसमये दुःखवशादवश्यं कोऽप्यवस्थाविशेषो भविष्यतीति पुनरपि क्लेशातिशयं द्योतयन्नाह

सा संन्यस्ताभरणमबला पेलवं[1] धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।
त्वामप्यास्रं[2] नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ २६ ॥

सा एवं शयाना दृश्यमाना न स्वयमेवास्रं मुञ्चति त्वामप्यवश्यं नवजलमयमास्रं मोचयिष्यति । कथंभूता सा इत्यत आह — दुःखदुःखेन गात्रं

१. Ml. Vs. पेशलम् ।
२. All other com. except Dk. and Ps. read अस्रम् ।

धारयन्ती । ईदृशक्लेशभाजनस्य गात्रस्य त्याग एव वरमित्यनुवेलं सञ्चिन्त्य पुनरपि आशया तदपरित्यजन्तीत्यर्थः । दुःखदुःखेनेत्येतद्विवृणोति — शय्योत्सङ्गे असकृत् निहितमिति । अनेन शयनासहत्वेन मुहुर्मुहुरुत्थानं सूचयति । निहितशब्देन शयितुमपि न स्ववशानि स्वाङ्गानीति द्योतयति । अवलाशब्देन मनोदौर्बल्यमुच्यते । पेलवं मृदु । अनेन गात्रमप्यस्याः स्वतः क्लेशासहमेवेति विवक्षितम् । आस्तामेतत् सर्वमेकतः, इयमेव तावदवस्था त्वदश्रुप्रवर्तनाय पर्याप्ता भवतीत्याह — संन्यस्ताभरणमिति । आभरणशब्देन मङ्गलसूत्रातिरिक्तान्युच्यन्ते । प्रायः सर्व इति । भवतस्त्वविवादसिद्धमेवार्द्रान्तरात्मत्वमिति भावः ॥ २६ ॥

नन्वित्थंभावे तस्याः किं तव प्रमाणम् ; न तावत् प्रत्यक्षाप्तवचने स्तः, नूनमवश्यमिति शब्दप्रयोगादेव तदभावनिश्चयात् ; नाप्यनुमानं, तद्धि प्रथमविरहं दृष्टान्तीकृत्य द्वितीयावावेव सम्भवति ; उपमानमपि सादृश्यमात्रविषयमिति नात्रिलवतरति ; अर्थापत्तिरपि दयितासम्बन्धिनोऽनुपपद्यमानस्यार्थस्यात्रादर्शनान्नैव क्रमते ; अतो जळस्येव सौभाग्याभिमानमात्रविजृम्भितमेतद्दयिताक्लेशनिश्चयवचनमिति शङ्कामनुरागविषयपूर्वप्रत्यक्षबलादेवास्माभिरुच्यते 'अस्त्येवात्रानुमानं प्रमाणं, सौभाग्यप्रकाशनं तु तं प्रत्येव युज्यते यस्याविसंवादकं प्रमाणं न भविष्यति' इति परिहरन्नाह —

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगम्मन्यभावः करोति
प्रत्यक्षं ते निखिलमचिरात् भ्रातरुक्तं मया यत् ॥ २७ ॥

स्पष्टार्थः श्लोकः ॥ २७ ॥

अथ तस्याः स्ववार्ताश्रवणसुखसूचकनिमित्तसम्भावनां श्लोकद्वयेनाह —

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाचलकुवलयश्रीतुलामेष्यतीति ॥ २८ ॥

१. B. स्पष्टार्थोयम् ।
२. Dk. वामं for शङ्के ।
३. Dk. मन्ये मीनोपलकुवलय० ।

रुद्धोपाङ्गे प्रसरो यस्य । अञ्जनस्नेहशून्यमिति अलङ्कारवर्जनादञ्जनेन शून्यं; 'रात्रौ जागरणं रूक्षम्' इत्यायुःशास्त्रविरुद्धया जागरणभुवा रूक्षतया व्याप्तत्वात् स्नेहेन च शून्यमित्यर्थः । 'प्रत्यादेशो निराकृतिः' इत्यमरः । एभिर्विशेषणैर्नयनशोभापगमविषयेऽनुशयः सूचितः । एवमपि मृगाक्ष्या नयनं त्वय्यासन्ने सति उपरिस्पन्दि भूत्वा मीनक्षोभाच्चलं यत् कुवलयं तेन सह प्रीतुको शोभासाम्यं एष्यतीति शङ्के इत्यर्थः ॥ २८ ॥

वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
मुक्ताजालं चिरविरचितं त्याजितो दैवगत्या ।
सम्भोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ २९ ॥

ऊरुश्च वामश्चलत्वं यास्यतीति सम्बन्धः । अतश्च नयनमपि वाममिति सिद्ध्यति । कररुहपदैर्मुच्यमान इति नखरेखाणां चिरेण तिरोभावं सम्भवतीति मत्वा वर्तमाननिर्देशः कृतः । ऊरुद्वयालङ्कारभूतं मुक्ताजालं त्याजितः । चिरविरचितमिति चिरेण निर्मितमतिमनोहरमित्यर्थः । अनेन तत्त्यागेऽनुशयातिशयः सूचितः । दैवगत्येति दैवप्रातिकूल्यादित्यर्थः । इदं नयनोरुविषयसकलानुशयोक्तिसाधारणमभिधानम् । सम्भोगान्ते मम हस्तसंवाहनानां समुचित इति । दैवगत्याच तैरपि विहीन इत्यर्थः । सरसकदलीस्तम्भगौर इति सरसशब्देन सेकाविच्छेदं वदता विवृद्धिं लक्षयति । गौरत्वं युवतीनां ऊरुस्तनकपोलपुष्कलत्ववत् प्रसिद्धमेव ॥ २९ ॥

अनेन प्रियसमागमाव्यभिचारिणा निमित्तेन शापकालासमाप्त्या च

'शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य'

इतिवदितस्ततः संभ्रमतो दृष्टद्दष्टि तामेवमुत्थाप्यैवं वक्तुं प्रक्रमेथा इति विवक्षन् निशीथकालस्य पाक्षिकमयोग्यत्वं सपदि स्फुरितं कथयति—

तस्मिन् काले जलद ! यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।

१. Vl. वामो वास्याः ।
२. Jn. Ml. Vl. चिरपरिचितम् ।
३. Jn. गर्भ for स्तम्भ ।
४. Vl. दयिता for यदि सा ।
५. Ms. Sd. St. Sv. तत्रासीनः for अन्वास्यैनां ।

मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यःकण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ३० ॥

सुगमः पूर्वार्धः । प्रणयिनि मयि स्वप्नलब्धे सति [illegible] यदस्या गाढोपगूढं तत सद्यःकण्ठच्युतभुजलताग्रन्थि मा भूदित्युत्तरार्धान्वयः ॥ ३० ॥

एवं याममात्रावच्छिन्न[illegible] मुद्दिश्य पुनरपि तद्विषयमाश्वासनोत्थापनादिव्यापारजातं पूर्वं विवक्षितं [illegible] —

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भः [illegible] गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ३१ ॥

तामिति [illegible] निःश्वसमानामित्यर्थः । आश्वस्तामुत्थाप्येति सम्बन्धः । [illegible] आश्वासनातिरिक्तस्य उत्थापनव्यापारस्य [illegible] समाश्वस्तामिति । तानि च तत्कालानिलेन [illegible] । त्वत्सनाथे गवाक्षे स्तिमितनयनां गवाक्षबहिर्देशस्थिते [illegible] । विद्युद्गर्भः तद्दृष्टिविघातापादनाय विद्यु[illegible] । [illegible]वचनैः स्तनितरूपैः शब्दैः वक्तुं मद्वृत्तान्तवाक्यानि वक्तुं प्रक्रमेथाः । [illegible]मानिनीपदनिर्देशाच्च युवयोर्निशीथे समीपावस्थानं न दोषावहं भवतीति विवक्षितम् । धीरशब्दस्तावत् कविना स्वयमेव कुमारसम्भवे व्याख्यातः

"विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।"

इति । मानिनीशब्दोऽप्ययमभिमानत्वं वदन् तत्कारणभूतमसदाचारवर्जनं स्वार्थेऽन्तर्भावयति ॥ ३१ ॥

१. Jn. जने for मयि ।
२. Jn. प्रोत्थाप्यैनां for तामुत्थाप्य ।
३. Jn. Vl. विद्युद्गर्भे ।
४. Vl. निहितनयनां ।
५. Jn. Sv. स्तनितवचनो ।

अथ प्रक्रमवाक्यं दर्शयति—

भर्तुर्मित्रं प्रियमविधवे! विद्धि मामम्बुवाहं
तत्सन्देशान्मनसि निहितादागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ ३२ ॥

अविधवे! अनेन प्रथमप्रयोजनमाशीर्वचनं तत्त्वनिवेदनसम्बोधनं च तन्त्रेण कृतम् । मां भर्तुः प्रियं विश्वास्यं मित्रं मनसि निहितात् तत्सन्देशात् कारणात् त्वत्समीपमागतमम्बुवाहं विद्धि । उत्तरार्धेन स्वात्मन ईदृशे कर्मणि अधिकृतत्वप्रसिद्धिं प्रथमपुरुषप्रयोगेण दर्शयति । यो मन्द्रस्निग्धैः ध्वनिभिः अबलावेणिमोक्षोत्सुकानि प्रोषितानां वृन्दानि त्वरयति । पथि श्राम्यतामिति विशेषणेन स्ववशानामेव न तु शापाद्यभिभूतानामिति विवक्षितम् ॥ ३२ ॥

अस्य वचनप्रकारस्य फलमाह—

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवं ।
श्रोष्यत्यस्मात्परमवहिता सौम्य! सीमन्तिनीनां
कान्तोपान्तात् सुहृदुपगमः सङ्गमात् किञ्चिदूनः ॥ ३३ ॥

इत्याख्यात इति अस्मिन् वाक्ये एवमुक्ते सति विशेषेणोन्मुखी उत्कण्ठोच्छ्वसितहृदया वार्ताश्रवणौत्सुक्याद् विकसितहृदया च भूत्वा सा त्वां प्रसन्नया दृष्ट्या वीक्ष्य मधुरया च गिरा सम्भाव्य अस्मात् त्वद्विज्ञापनरूपाद्वाक्यात् परं वाक्यं मद्वृत्तान्तविज्ञापनरूपं अवहिता श्रोष्यतीत्यर्थः । पवनतनयं मैथिलीवेत्येनेन मेघस्य जितेन्द्रियत्वादिसकलगुणसम्पूर्णत्वं स्वभार्यायाः पतिव्रताग्रेसरत्वं च वदति।

१. Jn. अभिदधे for अविधवे ।
२. Jn. Ml. तत्सन्देशैः for तत्सन्देशात् ।
३. Ms. Ml. हृदयनिहितैः for मनसि निहितात् ।
४. Ps. अध्वगानां for प्रोषितानां ।
५. Sd. चैवम् ।
६. Jn. Sv. अवहितं for अवहिता ।
७. Ms. Sd. St. Vl. Vs. कान्तोदन्तः ।
८. Dk. Vl. Vs. सुहृदुपनतः, Ms. Sd. St. सुहृदुपगतः ।

तात्कालिकहृदयोच्छ्वासाविक्यस्य इयत्तां दर्शयति — सीमन्तिनीनामिति । सङ्गमात् कान्तस्यागमनात् इत्यर्थः । किञ्चिदून इति किञ्चिदेवेत्यर्थः । त्वागिन्द्रियस्यैव कान्तादन्यत्र निर्व्यापारत्वेन अकृतार्थत्वात् किञ्चिदूनत्वकथनम् ॥ ३३ ॥

किं तर्हि तद्वाक्यं यन्मया श्रावयितव्यमिति जिज्ञासमानं प्रत्याह —

तामायुष्मन्! मम च वचनादात्मनश्चोपकर्तुं[1]
ब्रूया एवं[2] तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले! पृच्छति त्वां वियुक्तां[3]
पूर्वाशास्यं[4] सुलभविपदां प्राणिनामेतदेव ॥ ३४ ॥

तामिति मद्वृत्तान्तं मद्वाक्यानि च विस्तरेण श्रोतुमवहितां इत्यर्थः । आत्मनश्चेति तव चेत्यर्थः । उपकर्तुं आशाग्रन्थिं द्रढयितुम् । एवं ब्रूयाः इति । एवंशब्देन तव सहचर' इत्यादि 'प्रेमराशीभवन्ति' इत्येवमन्तानां वाक्यानां परामर्शः । अत्र केचिदर्था मध्यस्थवाक्येन वक्तव्याः केचिद्यक्षवाक्येन । तेनोक्तं मम चात्मनश्च वचनादुपकर्तुमिति । तेषु प्रथमप्रयोज्यानि तद्वाक्यानि तावद्दर्शयति — तव सहचर इत्यादिना श्लोकत्रयेण । सुलभविपदामिति अप्रतीयमाननिमित्तापि विपत्तिर्दृश्यत इति भावः । अत्र तु निमित्तमपि महदस्तीत्याह — वियुक्तामिति ॥ ३४ ॥

अङ्गेनाङ्गं तनु च[5] तनुना गाढतप्तेन तप्तं
सास्रेणास्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन[6] ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना[7] दूरवर्ती
सङ्कल्पैस्ते विशति[8] विधिना वैरिणा रुद्धमार्गः ॥ ३५ ॥

१. Vl. आत्मना चोपकर्तुं ।
२. Jn. Vl. Vs. ब्रूयादेवं ।
३. Jn. नियुक्तः; all other com. except Ps. read वियुक्तः ।
४. Ml. Ms. Sd. St. Sv. पूर्वाभाष्यं ।
५. Ml. Sd. St. Sv. प्रतनु for तनु च ।
६. Jn. Vl. अस्रद्रव, Sv. St. अश्रुद्रव, Ml. अश्रुद्रुत, for आस्रद्रुत ।
७. Dk. समधिकतरोच्छ्वासिना ।
८. All other com. except Ps. and Vl. read सङ्कल्पैस्तैर्विशति ।

दैवप्रातिकूल्याद् दूरवर्ती रुद्धमार्गश्च सन्नसौ ते तावकमङ्गं तनुत्वाद्युपलक्षितं अङ्गेन निजेन तथाविधेनैव सङ्कल्पैरुपायैर्विशति प्राप्नोतीति वाक्यार्थः । अधिकतरशब्दोक्तं दीर्घत्वं पूर्वपदस्थमुष्णत्वञ्चोभयमुभयत्रापि द्रष्टव्यम् । इह चशब्दस्य वाक्यार्थसमुच्चयपरत्वं कुशलप्रश्नवत् सङ्कल्पसमागमस्यापि तात्कालिकत्वप्रतीतिप्रसङ्गादुत्तरवाक्ये चशब्दाभावाच्च नादर्तव्यम् ॥ ३५ ॥

एवं मद्वृत्तान्तकथनरूपेण त्वद्वाक्येनोपकृतायां व्याह्रियमाणानि मद्वाक्यानि श्रोतुमुत्सुकायां सत्यां यदुपरितनानां वाक्यानां मद्वाक्यत्वं द्योतयितुं स मन्मुखेनेदमाहेत्येवंरूपं वाक्यं तदप्यनुरागद्योतकमभिज्ञानगर्भमीदृक्कर्तव्यमित्याशयवानाह —

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट-[1]
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ ३६ ॥

यत् किल शब्दाख्येयं शब्देन प्रत्याययितव्यं तत् सखीनां पुरस्तादपि य आननस्पर्शलोभात् ते कर्णे कथयितुं लोलोऽभूत् स लोचनाभ्यामदृष्टः श्रवणविषयञ्चातिक्रान्तः सन् उत्कण्ठाविरचितपदं उत्कण्ठया कर्तृभूतया ग्रथितानि पदानि यस्मिन् तत् तथोक्तं इदं वक्ष्यमाणं वाक्यं मन्मुखेन त्वामाह इति योजना ॥ ३६ ॥

इदंशब्दपरामृष्टानि[2] वाक्यानि दर्शयति —

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे[3] दृष्टिपातं[4]
वक्त्रच्छायां[5] शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्[6]
हन्तैकस्थं[7] क्वचिदपि न ते चण्डि![8] सादृश्यमस्ति ॥ ३७ ॥

---

१. Ml. Ms. Sd. St. Sv. Vs. अदृश्यः Vl. अगम्यः for अदृष्टः ।
२. A. omits this word.
३. Vl. हरिणप्रेक्षिते ।
४. Ms. Sd. St. Sv. Vs. दृष्टिपातान् ।
५. Vl. गण्डच्छायां ।
६. Dk. भ्रूपताकां ।
७. Ml. एकस्मिन् for एकस्थं ।
८. Ms. Sd. Sv. Vl. Vs. भीरु for चण्डि ।

अयमर्थः । यदा त्वद्दर्शनाधीनजीवनोऽहं वियोगदुर्दशामविशं तदा प्रभृति त्वत्सादृश्यमेव शरणमनुप्राप्तस्तल्लिप्सया सकलवस्तुसम्पूर्णे महति रामगिरौ पर्यटन् व्रततीषु श्यामासंज्ञितासु अङ्गसादृश्यमात्रमुत्पश्यामि, तिर्यक्षु हरिणीषु दृष्टिसादृश्यमात्रं, सतन्त्रिषु मयूरबर्हभारेषु केशसादृश्यं, नदीवीचिषु भ्रूविलाससादृश्यं, हंसेषु गतिसादृश्यं, पिकेषु स्वरसादृश्यं, कदलीषु ऊरुसादृश्यं, गगने शशिनि वक्त्रच्छायां, किं बहुना ! क्वचिदपि गगने भुवि वा त्वत्सादृश्यं एकत्रस्थं नोत्पश्यामि । हन्त! वयं मोघमनोरथाः संवृत्ताः इति । चण्डीति सम्बोधनेन मद्विरहे मा भूदस्य कथञ्चिदपि निर्वृतिरेति मत्वा नूनं त्वयैव इदं त्वत्सादृश्यमितस्ततो निक्षिप्तमित्येवंरूपा चाटूक्तिर्व्यज्यते ॥ ३७ ॥

अथैकस्थं त्वत्सादृश्यमलभमानस्य ममैषा बुद्धिरासीत् समग्रसादृश्यसम्पादनक्षमे चित्रे त्वां कोपप्रसादादिभिर्भावविशेषैः बहुधा विलिख्य तत्र तत्र मामपि प्रणिपातादिव्यापारोपेतमालिख्यावयोरन्योन्यानुरागमखिलमपि पश्येयमिति । तत्राप्यहं दैवविरोधान्मुहुर्मुहुर्भग्नमनोरथः संवृत्त इत्याह

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालिप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥ ३८ ॥

धातुरागैरिति बहुवचनेन तत्सम्पादनसम्भूतं गिरिसञ्चारक्लेशं सूचयति । शिलायामित्येकवचनेनावयोर्बहुविधरूपद्वन्द्वविलेखनाय पर्याप्तविस्तारा श्लक्ष्णत्वसमत्वगुणयुक्ता शिलाप्येका दुर्लभैव इति द्योत्यते । उक्तरूपोपेततया त्वदालेखनपुरस्सरं मां विलिखितुं यावदिच्छामि इति पूर्वार्धस्यार्थः । चरणपतितं कर्तुमिति तथा विलिखितुमित्यर्थः । यतोऽत्र चिरपरिचितं चित्रकर्मापि सान्तरायं भवति अतस्तस्मिन्नपि आवयोः समागमो धातृसङ्कल्पप्रतिहत एव इत्याह — क्रूर इत्यादिना । अत्र विधातेति वक्तव्ये कृतान्तशब्दग्रहणं जीवनोपायेषु तत्तद्भङ्गकारी सन् नूनमन्तकधर्मोप्राप्तित्युपालम्भाभिप्रायेण कृतम् ॥ ३८ ॥

---

१. A. दृष्टिसादृश्यं ।
२. Jn. Ml. Vl. Vs. अस्रैः ।
३. Dk, Jn. Ml. आलुप्यते
४. A. आलिखितुं ।

एवं कालयापनव्यापारेषु स्वीयेषु दैवप्रतिहतत्वमुक्त्वा दैवापतिते स्वप्नसमागमेऽपि दैवप्रतीघातप्रकारं तत्पश्यन्तीनां स्थलीदेवतानां व्यसनपरम्परादर्शनाद् दुःखोत्पत्तिं च दर्शयति --

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥ ३९ ॥

स्वप्नहेतोर्निद्राया दुर्लभत्वात् स्वप्नसन्दर्शनेषु कथञ्चिल्लब्धायास्ते निर्दयाश्लेषहेतोः गाढालिङ्गनलिप्सया आकाशप्रणिहितभुजं निद्राभङ्गहेतुभूतबाहुद्वयोच्छ्रयणव्यापारवन्तं मां पश्यन्तीनां स्थलीदेवतानां अहो ! दैवापतितस्वप्नसमागमोऽप्यस्य दैवादेव भग्नः हन्त! विधातुरलमलमिति निर्बन्धेन इति कारुण्यात्तरुकिसलयेषु मुक्तास्थूलाः अश्रुलेशाः बहुशो न खलु न पतन्तीति । पतन्त्येवेत्यर्थः ॥ ३९ ॥

किं बहुना । इदमेवैकं कादाचित्कं मम जीवितालम्बनं भवति नान्यत् किञ्चिदस्तीत्याह ---

भित्वा सद्यः किसलयपुटं देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति! मया ते तुषाराद्रिवाताः
पूर्वस्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ ४० ॥

गुणवति! वेषभाषाशीलवृत्तेषु सकलजनपूजिते ! तवाङ्गं एभिः पूर्वस्पृष्टं यदि किल भवेदिति मत्वा ते तुषाराद्रिवाताः मया आलिङ्ग्यन्ते । तच्छब्दोक्तान् विशिनष्टि — ये दक्षिणेन मार्गेण प्रवृत्ताः । तुषाराद्रिजत्वोक्त्यैव शैत्यमुक्तमिति कृत्वा देवदारुकिसलयपुटभेदनकथनेन तत्क्षीरसम्बन्धकथनेन च मान्द्यसौरभ्ये ॥ ४० ॥

१. A. समागमेऽपि ।

२. All other com. except Dk. Ps. Vl. read पूर्वं स्पृष्टं ।

एवं शक्येष्वप्युपायेषु दैवात् प्रतिहतवृत्तितया सीदमानं मे चेतः सहसाशक्यमप्यर्थं अभिधावतीत्याह —

> सं[1]क्षिप्येत [2]क्षण इव कथं दी[3]र्घयामा त्रियामा
> सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
> इत्थं चेतश्चटुलनयने! दुर्लभप्रार्थनं मे
> गा[4]ढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ ४१ ॥

गाढोष्माभिः त्वद्वियोगव्यथाभिः अशरणं कृतं सन्मम चेतः इत्थं दुर्लभप्रार्थनं भवतीत्यर्थः ॥ ५१ ॥

इत्थमतिक्लिष्टचेतसापि मया भविष्यदमन्दानन्दसन्दोहस्मरणशृङ्खलया लङ्घितवेगाः क्रियन्ते प्राणाः, अतः त्वयापि तथैव कर्तव्यमित्याह —

> न[5] त्वात्मानं बहु विगणयन्ना[6]त्मना नावलम्बे
> तत् कल्याणि! त्वमपि नि[7]तरां मा गमः कातरत्वम् ।
> क[8]स्यात्यन्तं सुखमु[9]पनतं दुःखमेकान्ततो वा
> नीचैर्ग[10]च्छन्त्युपरि च दशा[11]चक्रनेमिक्रमेण ॥ ४२ ॥

तुशब्देन पूर्वप्रमेयविनिवृत्तिः सूच्यते । आत्मानमात्मनैव न तु नावलम्बे वियोगवेदनया प्रयाणोन्मुखप्राणं मां मयैव निवारयामीत्यर्थः ।

'आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।'

१. Sd. St. Sv. संक्षिप्यन्ते, Vl. संक्षिप्यन्ते ।
२. Jn. Ms. St. Sv. Vs. क्षणमिव ।
३. Ms. Sd. S . Sv. Vl. Vs. दीर्घयामास्त्रियामाः ।
४. Dk. Ps. गाढोष्णाभिः ।
५. Jn. St. Vl. नन्वात्मानं, Ms. Sd. Sv. Vs. इत्यात्मानं ।
६. Jn. Ml. Ms. Sd St. Sv. आत्मनैवावलम्बे ।
७. All other com. except Dk. Jn. and Ml. read सुतरां for नितरां ।
८. Jn. Ml. कस्यैकान्तं ।
९. Sd. Vs. उपगतं for उपनतं ।
१०. Jn. Dk. गच्छत्युपरि ।
११. Jn. Dk. दशा चक्रनेमिक्रमेण ।

इतिवत् एकार्थत्वेवात्मशब्दौ । बहुशब्दार्थः 'तं तमात्माभिलाषम्' इत्यत्र विवृतो भवि-ष्यति । तत् तस्मात् कारणात् कल्याणि! अनेन गुणकीर्तनसाम प्रयुज्यते । नितरामत्यर्थं कातरत्वं मा गमः । प्राणान् धारयितुमशक्ता मा भूरित्यर्थः । त्वमपी-त्यपिशब्देन हेतुसाम्यं सूचयति । बहुविगणनशब्दोक्तं भविष्यदानन्दप्राप्तिसद्भावमवस्था-न्तरन्यासेन द्रढयति — कस्येति ॥ ४१ ॥

अथ नितरां कातरत्वं मा गम इत्येतच्छेषतया शापावच्छिन्नकालस्य शिष्टस्या-ल्पत्वं तन्निर्वहणोपायं च कमपि पूर्वार्धेन दर्शयन् उत्तरार्धेन बहुविगणनशब्दोक्तमभि-मतमर्थं विवृणोति —

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
 शेषान्मासान्[२] गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं[३] तं तमात्माभिलाषं[४]
 निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ४२ ॥

भुजगशयनादुत्थिते हेमन्तारम्भे शेषाननतिवाहितान् नभ आदींश्चतुरो मासान् गमय । अयं चाषाढो गतप्राय इति भावः । लोचने मीलयित्वेति सहि-ष्णुतयैवेत्यर्थः । पश्चात् दिव्यभावप्रत्यापत्त्या झटिति गगनमार्गेण इमं देशमागम्य अहं त्वन्मनोरथान् अभिलाषान् पूरयिष्यामि । त्वमपि मन्मनोरथान् पूरयिष्यसीति वाक्यार्थः । अभिलष्यत इत्यभिलाषो विषयः । विरहगुणितं विरहकृतादनुपभोगा-न्मनसि पुञ्जीभूतमित्यर्थः । ननु

"क्षीराब्धौ शेषपर्यङ्क आषाढ्यां संविशेद्धरिः ।
 निद्रां त्यजति कार्तिक्यां तयोः सम्पूजयेद्धरिम् ॥"

इति कौर्मवचनविरुद्धमिदं हेमन्तारम्भे मार्गशीर्षमासीत्युत्थानशब्दव्याख्यानम् । नैष विरोधः । कार्त्तिके प्रबोधः मार्गशीर्षे उत्थानमिति सुपरिहरत्वात् ॥ ४२ ॥

एवमिदंशब्दपरामृष्टानि स्वक्लेशातिशयस्वजीवनसन्धारणविषयाणि वाक्यानि सप्तभिः श्लोकैर्दर्शयित्वा पुनरभिज्ञानवाक्येन जीवनधारणविश्वासं 'स्नेहः प्रवासाश्रयाद्'

---

१. A. शब्दाभिमतमर्थं ।
२. Dk. Jn. Ps. Vl. मासानन्यान् ।
३. Dk. Ml. St. विरहगणितं ।
४. Jn. तमेवाभिलाषं ।

इत्यस्य कौलीनस्याप्रामाण्यकथनेन क्लेशातिशयविश्वासं च पञ्चपादत्रिपादविभक्तेन श्लोकद्वयेनादधाति —

भूयश्चाह त्वमसि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव ! रमयन् कामपि त्वं मयेति ॥ ४४ ॥

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने ! मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ह्रासिनस्ते ह्यभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ४५ ॥

आहेति । स मन्मुखेनेति शेषः । त्वं पुरा शयने, अधिकरणे ल्युट् । मे कण्ठलग्ना सती किमपीषन्निद्रां गत्वा सस्वरं रुदती विप्रबुद्धासि । ततः स्वप्नदृष्टमप्यस्य साधारणीप्राप्तिरूपमपराधं जाग्रद्दृष्टो यथाभिधीयते तथाभिधाय क्रीडिष्यामि तावत् किञ्चिदयमवसर इति मत्वा त्वया रोदनकारणमसकृत् पृच्छतो मे पृच्छन्तं मां प्रति कितवेति सान्तर्हासं कथितम् । ततः कितवशब्दसम्बोधनश्रवणोन्नीतसद्भावं मदपराधं असकृत् पृच्छतो मे त्वया त्वं कामप्यरमय इति कथितम् । ततोऽस्य कदाचिदप्यकृतपूर्वस्यापराधस्यावगमागममसकृत् पृच्छतो मे त्वया कथितं रमयन् मया दृष्ट इति । ततः किं त्वयाहं तथा दृष्ट इत्यभिधाय सविषादस्थिते मयि मद्विषादप्रशमनायोच्चैर्हासपूर्वकं स्वप्न इति चान्ते कथितम् । इत्येवमभिज्ञानवाक्यं नेतव्यम् । विदित्वेत्यत्र विद्धीत्येव विवक्षितम्, (न ?) त्वाशब्दाद् द्वयोरपि क्रिययोर्भर्त्रागमननिश्चयोत्पादनं प्रति संहत्यकारित्वनियमेन पौर्वापर्यविवक्षाभावात् । त्वाशब्दस्तु

---

१. Ml. Ms. Sd. St. Sv. Vl. त्वमपि ।

२. Ml. Ms. Sd. Sv. सस्वरं, Vl. सस्वनम् ।

३. Jn. पृच्छतोऽपि, Ps. पृच्छते च for पृच्छतश्च ।

४. Jn. विरहे ह्रासिनस्तेऽप्यभोगात्, Ml. विरहे ध्वंसिनस्ते त्वभोगात्. Ms. St. विरहध्वंसिनस्ते ह्यभोगात्, Sv. Sd. विरहे ध्वंसिनस्ते ह्यभोगात्, Vl. विरहह्रासिनस्ते ह्यभोगात् ।

जिज्ञासाधिक्यकृतः कुशलित्वज्ञापनस्यार्थसिद्धं प्राथम्यमनुवदति न तु प्रत्याययति। एवं वाक्यभेदे सति चशब्दोऽप्युत्तरवाक्ये सिध्यति। कौलीनमाश्रित्य यो मय्यविश्वासः स्नेहमधिकृत्य तत्कर्त्री च माभूरिति। अत्र कौलीनस्य युक्तिहतत्वेन अप्रामाण्यादिति निषेधहेतुरभिप्रेतः। कौलीनमनूद्य युक्तिहतत्वं दर्शयति—स्नेहानाहुरित्यादिना। इष्टे वस्तुनि कलत्रादौ स्नेहाद् विरहे सति किमपीन्दुभ्रासिन आहुर्जना इति कौलीनमनूदितम्। शेषेण युक्तिहतत्वमुच्यते। हिशब्दो हेतौ ते स्नेहा अभोगादुपचितरसाः सन्तः प्रेमराशीभवन्ति यत इत्यर्थः। रसशब्दो रागपर्यायः स्नेहस्यैवोपरितनीमवस्थां वक्ति। तदुपरितनीं प्रेमशब्द इति विवेकः। यस्तूपपन्नस्य स्नेहस्य भोगेन व्ययं करोति तस्यैव तत्पुञ्जीभावासंभवो नेतरस्येति भावः॥ ४४॥ ४५॥

अथाभिहितसकलवक्तव्यो यक्षस्तदानीमपि तूष्णीम्भूतमेव मेघमालक्ष्य भवतस्त्वेवमवस्थानमपि सत्स्वभावप्रयुक्तं प्रवृत्त्यङ्गमेव नास्तामिव प्रत्यादेशपरं भवतीति तं प्रशस्य विशेषेणानुरञ्जयति—

कच्चित् सौम्य! व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्[1] खलु भवतो धीरतां[2] कल्पयामि[3]।
निःशब्दो[4] हि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव॥ ४६॥

सौम्य इदं मे मत्सम्बन्धि बन्धुकृत्यं त्वया कच्चिद्व्यवसितं कर्तुं निश्चितं व्यवसायमेव द्योतयति तवेयमाकृतिरिति सौम्यशब्देन सम्बोधयतोऽभिप्रायः। यः पुनरत्रानुमतिद्योतकवाक्प्रवृत्त्यभावरूपः प्रत्यादेशः तस्माद्धेतोर्धीरताकल्पनं, निश्चलचित्तत्वकल्पनं तु न खलु करोमि। खलुशब्दोऽवधारणे। भवत इत्यस्य विवरणं निःशब्दो हीति। चातकेभ्य इति। अपिशब्दोऽत्र द्रष्टव्यः। तूष्णीमासीनेभ्यो मनुष्येभ्यो वाचैव याच्ञां कुर्वद्भ्यश्चातकेभ्योऽपि त्वं निःशब्द एव प्रदिशसीत्यर्थः। सकलसज्जनसाधारणश्चायं स्वभावो न तवैवेत्याह— प्रत्युक्तं हीति। प्रत्युक्तं क्रियैवेति वदता प्रत्युक्त्यवसरे प्रथमक्षण एव क्रियामारभेतेति युक्तं भवति॥ ४६॥

१. Ms. Sd. Sv. Vl. प्रत्याख्यातुं, St. प्रत्यादेष्टुं
२. Ms. Sv. अधीरताम्।
३. Sd. St. Vl. Vs. तर्कयामि।
४. Jn. Vr. निश्शब्दोऽपि।

पुनरपि निश्शङ्कं निष्क्रियं च तमालक्ष्य असौ मत्प्रियकरणानन्तरं स्वचिकीर्षितं कर्तुं मदनुज्ञाप्रतीक्षया वा उक्तिसमाप्तिद्योतकवाक्यस्याश्रवणाद्वात्र तूष्णीमास्त इति मत्वोभयं करोति —

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशान् जलद ! विचर प्रावृषा सम्भृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ ४७ ॥

अनुचितप्रार्थनावर्त्मनोऽनभ्यस्तयाच्ञासरणेरित्यर्थः । अनेन उक्तिचातुर्य-भङ्गादिदोषसम्भावनया न मद्वाक्यानां त्वत्प्रवर्तकत्वशक्तिरस्ति, बालरुदितानामिव केवलमवस्थानिवेदनपरत्वमेव भवति इत्युच्यते । प्रवर्तकत्वं तु साक्षात् त्वद्गुणानामेवे-त्याह—सौहार्दाद्वेति । एतत् कृत्वेति । एतन्मे प्रियमापाढमास्यैव कृत्वेत्यर्थः । यदा प्रावृट् समागच्छेत् तदैव प्रभृति ये त्वदधीनवर्षा देशास्तान् सर्वानपि विचर । न को-ऽप्यन्तरितव्य इति तृतीयपादेनोच्यते । इतरथा स्वकाले विहिताकरणात् प्रत्यवायो-ऽपि भवेदिति जलदपदेन सम्बोधयतोऽभिप्रायः । उक्तिसमाप्तिद्योतकं वाक्यमाशीर्वचनेन करोति — माभूदिति । एवंशब्देन स्वीयो वियोगः परामृश्यते ॥ ४७ ॥

अनुदिनमभिनवरूपा सुमनोरमणीव जगति जयतितराम् ।
हरिचरितकाव्यसहभूर्व्याख्यासौ मेघदूतस्य ॥

मन्त्रब्राह्मणसूत्रवित् कृतमतिः शास्त्रे च कौमारिले
कर्ता न्यायसमुच्चयस्य कणिकाव्याख्याप्रणेता कविः ।
उत्पत्तिं त्वघमर्षणप्रवरजाद् गौर्यामृषेराप्तवान्
कर्तास्याः परमेश्वरो नतशिराः पूज्ये गुरौ शङ्करे ॥

लब्धभवदासभावो भगवति भक्त्याख्यया च भवदासः ।
वादी वेदान्तरतो यस्य पितृव्यः स एष कर्तास्याः ॥

शिवमस्तु ।

APPENDIX I

ADDITIONAL AND VARIANT MATTER IN THE SMALLER RECENSION OF SUMANORAMAṆĪ

PŪRVASANDEŚA

p. 1. ll. 7—8. In the place of the verse सुमनोरमणीव्याख्या etc. the following two verses are seen:

क्रियते मेघव्याख्या नादृश्या न च गता विमानपथम् ।
अथ च विबुधोपभोग्या सुमनोरमणीयमद्भुता जयति ॥

निबन्धनानि सन्तीति नाविधाननिबन्धनम् ।
न ह्यनल्पेषु वृक्षेषु न कल्पद्रुमकल्पयत् ॥

Śloka 1.

p. 2. l. 3. After नान्यः —

अपि च यथैष महिमास्तमयो दिव्यदेशनिवासदिव्यजनसंव्यवहारदिव्यजनान्तर्धानशक्त्याद्याकाशगमनशक्त्याद्यभिभवरूपः कान्ताविरहमावहति न तथा कान्ताविरहस्तामित्यस्तङ्गमितमहिमेति परमर्थहीनं किं कुर्यात्, शापेनेति च पदं क्व सङ्गच्छेत ।

l. 12. After वसतिं चक्रे —

रामगिर्याश्रमेषु इति बहुवचनेन विरहवेदनातिशयादेकत्र चिरमवस्थानाशक्तिः सूच्यते । आश्रमबहुत्वं 'वन्यैः पुंसां' इत्यत्रापि सिध्यति ।

ll. 16—21. For प्रबन्धोपोद्घातभूते ……… मन्तव्यम् —

यच्चानभिहितानां यक्षनामविशेषादीनामनभिधाने कारणमुक्तं रसानुपयोगादिति तदप्यनभिहितानां पदानामानन्त्यादवक्तव्यमेव इत्यास्तामेतत् ।

p. 3. l. 25. After द्योतयितुं कृतम् —

ननु शापकृतमहिमास्तमयदुःखितस्य तत्तादृशपुण्यदेशनिवासिनोऽपि सतः किमिति सदैव तद्देशोचितव्यापारवैमुख्यमिति शङ्कां निवर्तयितुं कान्ताविरहगुरुणेति शापविशेषणं कृतम् । शापकृतमहिमास्तमयदुःखादधिकं कान्ताविरहदुःखमेव तस्यामतिसक्तस्य दुःखं गुरुतरमासीत् । ततश्च तद्वेदनोन्मत्तचित्तस्य कथं विशुद्धचित्तजनानुष्ठेयतपश्चर्यादिसम्भव इत्यर्थः ।

l. 28 – p. 4. l. 4—

आश्रमविशेषणाभ्यां वासोपयोगितया रम्यत्वं पावनत्वञ्च द्योत्यते । स्निग्धच्छायातरवो येषां इति विग्रहः । अत्र च रामगिरिसमाख्यावचनेन जनकतनयास्नानकथनेन चास्य गिरेश्चिरतरं रामेणाध्युषितत्वं तदा तत्साहचर्यञ्च सूचयता तन्निवासस्य स्थानान्तरेभ्यः पावनत्वातिशयं उक्तो भवति ।

Śloka 2.

p. 5. ll. 4 – 6.

अथ प्रबन्धार्थबीजमावपति तस्मिन्नद्राविति ।

ll. 4 – 11. For न त्वद्रौ कतिचिन्मासान् नीत्वेति कर्तुरधिकरणमद्रिः ... ... न कर्तुः—

नत्वद्रौ कतिचिन्मासान् नीत्वेति कर्तुरधिकरणमद्रिः, स इत्यनेनैवाश्रमाधिकरणत्वप्रतीतेस्तस्मिन्नद्राविति वचनवैयर्थ्यात् । अतः स्वसन्निधौ मेघं ददर्शेत्यस्यार्थस्य सिद्धये कर्माधिकरणमद्रिः ।

p. 6. ll. 16—19. For कालपरिच्छेदकानां ... ... यावत् —

सदृशदर्शनादिप्रयासानां वक्ष्यमाणानामेवात्र मासनयनशब्देन विवक्षितत्वात् । ग्रीष्मद्वितीयमास आषाढः । तस्याद्ये दिवसे स्वाभिलषितसमय इत्यर्थः । आश्लिष्टसानुमिति । 'षणु दाने' इत्यस्माद्धातोस्सनोति ददाति सुखमिति व्युत्पत्त्या सुखप्रदेशवाची सानुशब्दः । तत्र निविष्टमिति यावत् । इदं तु विशेषणं मिथस्संव्यवहारादेस्सुखदे प्रदेशे तस्यावस्थानं इति द्योतयितुं कृतम् ।

l. 23.

कान्ताविरहगुरुणेत्यनेनास्य विरहसद्भावः तस्यासह्यवेदनत्वं तन्निदानतया कान्तातिसक्तिश्च सूचितम् । तत्रयमपि निर्दिशति — अबलाविप्रयुक्तः कामी कनकवलयभ्रंशरिक्तप्रकोष्ठ इति । कामो रागः, अतिशयने मत्वर्थीय इनिप्रत्ययः । अतिसक्त इत्यर्थः । विरहवेदनातिशयजन्मना देहकार्श्येन भूषणादिष्वनादरेण च कनकवलयस्य भ्रंशात् रिक्तः शून्यः प्रकोष्ठो यस्य सः तथोक्तः । वसतिं चक्रे इत्यनेन योऽर्थो विवक्षितः सोऽयं विशदीकृतः ।

Śloka 3.

The whole commentary on this verse is as follows—

तस्य स्थित्वेति । राजराजस्यानुचरः तस्य पुरः कथमपि स्थित्वा चिरं दध्यौ इत्यन्वयः । कथमपि तरुलताद्यवलम्बनेन स्थित्वा । पुरः इत्यनेनात्यन्तासह्यत्वमुक्तम् । केतकाधानहेतोः केतककुसुमस्याधाने निर्माणे हेतोः । मेघध्वनिश्रवणात् केतककुसुमस्योत्पत्तिः इति प्रसिद्धिः । अन्तर्बाष्पः वेदनासह्यतयान्तर्बाष्पत्वम् । राजराजस्यानुचरः वैश्रवणस्य भृत्यः । मेघालोके सुखिनोऽपि चेतः अन्यथावृत्ति भवति, कण्ठाश्लेषप्रणयिनि जने दूरसंस्थे किं पुनरित्यनेनात्यन्तासह्यता व्यज्यते ।

Śloka 5.

p. 9. ll. 3—4.

ननु महेन्द्रनियुक्तस्सलिलनिधेरुदकमादाय तत्र तत्राभिवर्षन्नसौ मेघः किमसमर्थः एव यक्षनियुक्तमर्थमनुष्ठातुं येन तद्विषयाया यक्षप्रवृत्तेरुन्मादकारित्वमुच्येत, न चोन्मादस्तथाविधस्य युक्तः कल्पयितुं, विरहिजनेष्वदर्शनात् इति शङ्कां निरस्यन्नुत्तरक्रियामाह — धूमज्योतिरिति ।

l. 27.

औत्सुक्यात् उत्कण्ठातिशयात् ।

l. 28.

गुह्यकः गुहायामन्तःपुरे निरतः । अनेन निसर्गसिद्धमौत्सुक्यमिति द्योत्यते ।

p. 10. l. 2.

कामार्ता इति । अत्रार्तपदेन भ्रान्त इत्युक्तम्, कामेन कारणेन मरणदशासु अष्टमीमुन्मादावस्थां प्राप्ता इत्यर्थः ।

l. 3.

चेतनाचेतनेषु प्रणयकृपणाः चेतनाचेतनेष्वविशेषेण प्रार्थनया दीनवृत्तयः । हिशब्दोऽस्यार्थस्य रागादिषु प्रसिद्धिं सूचयति । अयं श्लोकार्थसंक्षेपः — अचेतन एवायं मेघो निर्याज्यतामनुभवति । वृष्ट्यादिव्यापारोऽस्येन्द्रसङ्कल्पाद्वायुकृत एव । अतः कामोन्मादनिबन्धनैतद्विषया यक्षस्य प्रवृत्तिः इति ।

Śloka 5.

p. 10. *l.* 25 After मन्तव्यम —

अनेनाद्य मम सकलपुरुषार्थापगमस्संवृत्त इति द्योत्यते ।

p. 11. *ll.* 2—3. For मेघेतरे ....प्रयोगः —

लब्धकामा तावत् अधिगुणविषया याच्ञा समग्रप्रीत्यालम्बनं भवति; मोघापि सा किञ्चित् प्रीत्यालम्बनमेव । अधमे लब्धकामापि सा प्रीतिलेशस्यापि न गोचरः । अलब्धकामत्वे तु कैव कथेत्यर्थः । अधिगुणो हि केनचिद्याचितस्स्वशक्तिसाकल्ये तावत् सुप्रसन्नस्तदेव तदभिलाषितमापूरयन् न कदाचिदपि तमर्थं पुनरनुभाषेत । तद्वैकल्येऽपि तदेकव्यसनी भूत्वा कालान्तरे महत्तरमुपकरिष्यति । इतरस्य तु तद्वैपरीत्यमिति प्रसिद्धमेतदिति भावः ।

Śloka 7.

p. 11. *l.* 15.

पयोदेति सन्तापशान्तिप्रद इत्यर्थः, पयश्शब्देन सन्तापशान्तिमात्रलक्षणात् ।

l. 28.

अलकाशब्देन सकलसम्पन्निदानत्वमुक्तम् ।

'अलकामतिवाह्येव वसतिं वसुसम्पदाम् ।'

इत्युक्तत्वात् । यक्षेश्वराणां वसतिरित्यनेन ईश्वरोचितसकलोपभोगशालिदिव्यजनसम्पूर्णत्वमुक्तम् । बाह्योद्यानेत्यादिना तु अपरिभाव्यतमत्वं रमणीयतमत्वञ्चोच्यते ।

Śloka 8.

p. 12. For *ll.* 3—5.

न केवलं मत्कलत्रपरित्राणैकफलक एव भवतः उद्यमः, किन्तु प्रोषितानां वनितास्सर्वा एव विरहकृच्छ्रादुत्तारिता भवेयुः, ताभिश्च भवान् प्रीत्युत्फुल्लैर्नयनकुवलयैस्तत्र तत्र समाराधितो भविष्यतीत्याह — त्वामारूढमिति ।

l. 15. After सन्नद्धे—

त्वयि वर्षादिकं स्वधर्ममनुष्ठातुं उद्युक्ते ।

Śloka 9.

p. 13. *l.* 1. After तद्द्वयं —

तस्य फलञ्च श्लोकत्रयेण दर्शयति—मन्दं मन्दमिति ।

l. 7. For अनुकूलः ··· ··· वामभागस्थितः —

अनुकूलो गन्तव्यदिगभिमुखः पवनो नुदति वामो वामभागस्थितः चातको दति इत्युभयत्रापि मन्दत्वमाधुर्यविशेषणाभ्यां निमित्तयोः पौष्कल्यं वदति । चशब्देन तयोः परस्परनिरपेक्षयोरेव समुच्चय सति सफलाभिवर्यं कियद्गाम इत्युक्तम् ।

l. 17.

सगन्धो बन्धुः, इदं वायोरपि विशेषणं, अयमिति च ।

l. 18. After द्रष्टव्यः —

यथेदृशी निमित्तसम्पत्तिर्दृश्यते तत्फलसम्पत्तिरपि तादृशीं समप्रामेवोत्पश्यामि ते श्लोकत्रयार्थसंक्षेपः ।

Śloka 10.

p. 14. *l.* 5.

दिवसगणनातत्परामिति सांवत्सरिकातीतानागतदिवसगणनादिव्यापृताम् । एतदपेक्षाबीजमाह — एकपत्नीमिति । पतिव्रतानां तादृशीनां खलु प्रियविरहेष्वीदृशं कालनयनमिति वक्ष्यति ।

Śloka 11.

p. 14. *l.* 22. After तथाविधम् —

प्रास्थानिकं गर्जितं शङ्खपटहादिनिनदोपमानभूतत्वात् श्रवणसुभगम् ।

Śloka 12.

p. 15. *l.* 16 After सख्यमित्याह —

तुङ्गमिति च मेखलासु रघुपतिपदैरङ्कितमिति च आकृत्यैव लोकोत्तरत्वं मूर्तत्वं भगवच्चरणविन्यासपवित्रशरीरश्च इत्यर्थः । अथवा पुनरप्याप्रश्ने कारणद्वयाभिधानमिदम् ।

Śloka 13.

p. 16. l. 22. After श्रवणसुखावहपदग्रथनम् --

तत्रापि मनोव्यापारो निवृत्तचर एवेत्यर्थः ।

Śloka 14.

p. 17. l. 11. After वाक्यार्थः —

त्वामारूढमित्यत्र यादृशी वनिताकटाक्षविषयत्वापत्तिरुक्ता ततोऽपि सुभगतरं दिव्यवनिताकटाक्षलक्षत्वमारोहसमय एव भवति इत्यनेनोच्यते ।

l. 14. After सरसनिचुलात् —

तत्रवतसादसाद्वतात् । अल्पसारा निचुलादयोऽप्यत्र श्रीरामप्रभावात्सान्द्रच्छाया भवन्ति इत्यर्थः । अनेन सलिलव्ययो न कर्तव्यः इति द्योत्यते ।

l. 17. After अवलेपाः

अवलेपमूलाः प्रहाराः तान् परिहरन् दूरगमनेन वर्जयन्नित्यर्थः । अस्खलितोत्थानस्य हि कार्यसिद्धिः इति भावः ।

Śloka 15.

p. 17. l. 24. After रत्नच्छायेति—

प्रेक्ष्यमेतदिति मङ्गलमङ्गीकुर्वित्यर्थः । आपतस्यत इति अस्य परिपूर्णावस्थायामिति शेषः ।

Śloka 16.

p. 19. l. 5. After वाक्यार्थः—

भ्रूविलासानभिज्ञतावचनेन स्वाभाविकविलासालङ्कृतत्वमुच्यते ।

l. 8.

लघुगतिः गलितप्रायतोयतया द्रुतगतिर्भूत्वेति वाक्यार्थः ।

Śloka 17.

p. 18. l 15.

इतः पूर्वमस्मिन् संवत्सरे वर्षाभावाद्दाववह्निनावश्यंभाविनि गिरिवनदाहे ।

l. 21. After नीचोऽपीत्यर्थः—

प्रथमशब्देन अवस्थाप्राप्तयोरुपकारप्रत्युपकारयोः अव्यवधानं वदति ।

l. 24. After प्राप्ते मित्रे—

मित्रं प्राप्य करिष्यति । मित्रत्वमप्यतन्त्रमेव; शत्रुमप्यर्थितया प्राप्तं अनुगृह्णातीत्यर्थः ।

Śloka 18.

p. 20. l. 8.

सर्पवेणीसवर्णे मेचकरुचितया स्तनचूचुकसमानवर्णे ।

'नीलालके मेघचये मेचके स्तनचूचुके ।
मण्डले कृष्णसर्पाणां सर्पवेणी निगद्यते ॥'

इत्युक्तत्वात् ।

Śloka 19.

p. 20. ll. 21—26. For मुहूर्तमिति ··· ··· द्रक्ष्यसि—

तस्मिन् अद्रौ मुहूर्तं यावद्विश्रमलाभं स्थित्वा तोयोत्सर्गान्मालदेशाभिवृष्टस्य तोयस्य तत्प्रीतिसम्पादनाय तत्र तत्र निश्शेषकृताद्वर्षाद्धेतोः द्रुततरगतिः अपेतभारक्लेशतया लब्धवेगातिशयगमनस्तत्परं वर्त्म तीर्णस्सन् उपलविषमे गण्डशैलैः स्थपुटिते विन्ध्यपादे विशीर्णां अत एव गजस्यांगे मस्तके भक्तिच्छेदैर्विरचितां भूतिमिव दर्शनीयां रेवां द्रक्ष्यसीति ।

Śloka 20.

p. 22. l. 3. For शक्ष्यति ··· ··· ···इत्यर्थः—

असौ मम मित्रमेव अतस्तस्य मदवज्ञा न सम्भवति इत्यत्राह–रिक्त इति ।

Śloka 21.

p. 22. l. 24. After वाक्यार्थः—

लघुपदेन गौरवगुणरक्षणाय मार्गे सर्वत्र वर्षणाय च क्वचिदपि नातिव्ययः कर्तव्य इति द्योत्यते ।

Śloka 22.

p. 23. l. 18. After सुरभिते—

इदमपि कालक्षेपहेतुः वक्ष्यमाणस्य सहकारि भवेत् इति भावः ।

Śloka 23.

p. 23. l. 27.

सूचिभिन्नैः सूच्याकारेष्वग्रेषु विकसितैः केतकपुष्पैः पाण्डुच्छायोपवनवृतयो येषां ते तथोक्ताः । अनेन न केवलं उपवनान्येव तत्र सदासत्त्या सुमनोभिः सुभगतराणि भवन्ति, तेषां वृतयोऽपि केतकपरिकल्पितास्सत्यः सुकरकुसुमशालिन्यो भवेयुः इत्युच्यते ।

p. 24. l. 2. After हलायुधः—

तेषां नीडारम्भैः कुलायनिर्माणकोलाहलैराकुला उत्कम्पिता ग्रामप्रदेशवर्तिनः चैत्यवृक्षा येषां ते एवमुक्ताः । जम्बूप्रचुरास्तत्र वनप्रदेशाः तत्फलानि च वर्षासत्या प्रच्यवन्ते । तेनोक्तं परिणतफलश्यामजम्बूवनान्ता इति । एवं विशेषणत्रयेण वनानां उपवनानां ग्रामप्रदेशानाञ्च रमणीयत्वं वदता जलाशयव्यतिरिक्तस्य सकलस्यापि प्रदेशस्य रमणीयत्वमुक्तम् । जलाशयस्यापि तदाह—कतिपयदिनस्थायिहंसा इति । स्वच्छसलिलकमलाकरवासिनो हि हंसा न वर्षर्तुप्रत्यासत्तिमात्रेण गच्छेयुः पुनरपि कतिचिद्दिनान्यवस्थाय यदा तस्मिन् देशे वृष्टिस्तदैव गच्छेयुः । अतस्त्वत्प्राप्तिसमये जलाशयमलङ्कुर्वन्तस्सन्त्येव तत्र हंसा अनुगच्छेयुश्च भवन्तमित्युभयमनेनोक्तम् ।

Śloka 24.

p. 24. Introduction to the verse—

अथ वेत्रवत्यां पयःपानं, प्रियामुखपानसाधर्म्यकथनेन तत्प्रीतिं मुख्यत्वेन विदधाति—तेषामिति—

l. 10. Between इति and अतिमहतः

राजधानीं प्राप्तानां चिरेण खलु फललाभो भवति; अत्र तु ।

l. 11. After तीरेति—

वच्छब्दः स्वादुताप्रसिद्धिं स्मारयति । वेत्रवत्या नद्याश्चलोर्मि अत एव तीरोपान्तभुवा स्तनितेन सुरतोचितेन शब्दविशेषेण सुभगं मनोहरम् । अनेन ससीत्कारमिति मुखविशेषणं लभ्यते । स्वादु तत्पयसः सीत्कारं सभ्रूभङ्गं स्वादु प्रियामुखमिव शोभमानैरं पास्यतीति यत् इत्यर्थः । चलोर्मिपदस्य नदीविशेषणतया षष्ठ्यन्तपाठेऽप्यूर्मिचलपयोगतं सत्तद्विशेषणफलं जनयेत् इति केचित्तथा पठन्ति ।

Śloka 25.

The whole commentary on the verse is as follows:—

तत्र वेत्रवतीसन्निधौ । विश्रामहेतोः विश्रमार्थम् । नीचैराख्या नीचैः इत्याख्या यस्य तं गिरिं अधिवसेः तत्सम्माननमकृत्वा तु गमने तस्य महदप्रियं स्यादित्याह— त्वत्सम्पर्कादिति त्वद्गर्जितश्रवणेन प्रीत्या रतया मनसि विपरिवर्तमानादित्यर्थः । पुलकितमिव संजातपुलकमिव । अमुकुलपरं पुष्पगन्धैः । नायमप्रकृष्टवन्म्लेच्छजनाश्रयो गिरिः, अतस्तत्रत्यजनवृत्तान्तदिदृक्षया दृष्टिदानं न दोषाय भवति इति द्योतयन् विशिनष्टि— य इति । पण्यस्त्रीरतिपरिमलोद्गारिभिः वश्याजनानां रत्यवसरोचितकलभकुसुमादिसौरभमणितसीत्कारादींश्च उद्गमद्भिः शिलावेश्मभिर्यत्राभ्यस्तानां नागरिकाणां यौवनान्युद्दामानि उच्छृङ्खलानि इति पथिकजनद्वारा लोके प्रथयतीत्यर्थः ।

Śloka 27.

p. 25. The whole commentary on the verse is as follows:—

अथ प्रागुदगवस्थितोज्जयिनीप्राप्त्यनुगुणं मार्गमुपदेष्टुमुपक्रमते— वक्रः पन्था इति । उत्तराशां प्रस्थितस्य तवोज्जयिनीगमने वक्रः पन्थाः स्यात्, मम कार्यविलम्बश्च भवेत् इति चशब्देन द्योत्यते । तद्द्वयमपि भवतु यतस्त्वयोज्जयिनीसौधोत्सङ्गप्रणयविमुखेन न भवितव्यम् इत्याह —सौधोत्सङ्गेति, मशब्दो हेतौ । 'समुच्चयान्वाचयेतरेतरतुल्ययोगिताहेतुषु' इति (निपातसूत्र पाणिनि.) स्मरणात् । तद्वैमुख्ये किं स्यादित्यत आह— विद्युद्दामेति । यत्र पौराङ्गनानां स्वनो लोलापाङ्गानि सन्ति । लोचनानि विद्युद्दामस्फुरणेन चकितानि च कृत्वा तैर्यदि न रमसे तर्हि वञ्चितः स्याः जन्मसाफल्यविरहित एव स्याः ।

Śloka 28.

p. 26. l. 3

उज्जयिनीं गमिष्यतस्तव मार्गे निर्विन्ध्या नाम नदी भविष्यति, तत्र महत्तरोऽनुभव इत्याह—वीचीक्षोभ इति ।

l. 10. After दर्शितावर्तनाभेरिति—

अनेन नीवीशैथिल्यापत्तिनाम मदनविकारः सूच्यते ।

Śloka 29.

p. 26. l. 17. After भविष्यति—

सा त्वद्विषयेणानुरागेण निर्विन्ध्यामप्यभ्यस्यति; सा तु त्वया सातिशय सम्मानयितव्येत्याह—।

l. 22.

वेणीभूतेन विरहिणीकेशबन्धरूपेण प्रतनुना तनीयसा सलिलेनान्विता ।

p. 23. After भ्रष्टैः—

जीर्णपर्णैः पाकपाण्डुभिः पत्रैः पाण्डुच्छाया पाण्डरवर्णा ।

p. 27. *l.* 2 After कार्श्यम्—

विरहक्लेशं जलशून्यतां च येन विधिना समागमोत्सवेन प्रभूतसलिलवर्षेण च त्यजति स त्वयोपपाद्य एव यतोऽनन्यगतित्वात् त्वयैवोपपाद्य इत्यर्थः । स्थाने खलु तस्यास्त्वामधिकृत्येदृशोऽनुराग इति सुभगेति सम्बोधनेन व्यज्यते ।

Śloka 30.

p. 27. *l.* 4.

अथावन्तिविषयालङ्कारभूतोज्जयिनीप्राप्तिं विदधानस्तामनितरसाधारणगुणोपपन्नां उपवर्णयति— प्राप्यावन्तीनिति ।

l. 9.

अवन्तिविषये खलु कोविदः ग्रामवर्तिनो वृद्धाः सकलजनमनोहारिवत्सराजचरितकथानिबन्धग्रन्थाभ्यासरसिका एव इत्यनेनोच्यते ।

l. 11.

श्रीविशालां तत्तद्विशिष्टपदार्थसम्पत्प्रकर्षलक्षणया श्रिया व्याप्ता ।

l. 14. After दिवः खण्डमिव—

एकशब्दः प्रधानवाची । कान्तिमदित्यातिशायने तमप् । आभ्यां विशेषणाभ्यामिह खण्डपदोक्ता न्यूनता परिगणायत्तैव , दिव्यदेशोचितभोगसमृद्ध्या तु शोभाविशेषेण वा सातिशयैवेत्युच्यते ।

Śloka 33.

p. 28. *l.* 23. After धूतोद्यानमिति—

कुवलयशब्दो जलकुसुममात्रोपलक्षणम् । गन्धवतीति महाकालनिकटे काचिन्नदी वहति । तोयेत्यादि । तोयेषु स्वैरं क्रीडित्वा ततो विरतानां युवतीनां स्नानेन स्नानीयसुरभिद्रव्येण तिक्तैः सुरभीकृतैः । 'स्नानीयेऽभिषवे स्नानम्' इति वैजयन्ती । तादृशैर्मरुद्भिर्धूतोद्यानं अविरतोत्कम्पितारामलावलयितम् ।

Śloka 34.

p. 29. *l.* 2. After चोत्कम् —

तत्र तदनुरूपफलद्वयावाप्तिं उत्तरश्लोकाभ्यामाह— अप्यन्यस्मिन्निति ।

l. 10.

अविकलं शिवलोकावाप्तिलक्षणं फलं लप्स्यसे ।

Śloka 35.

p. 29. l. 22. After ललितवधूतैः

भगवत्प्रीतिहेतोः सविभ्रमं भ्रमितैः ।

l. 27. For रत्नच्छायया खचिताः

चामरदण्डप्रत्युप्तानां रत्नानां छायाभिः खचिताः ।

Śloka 36

p. 29. l. 26

अथ तदङ्गसक्तितया भगवत्सेवाप्रकारमाह— पश्चादुच्चैरिति ।

p. 30. l. 7.

आर्द्रनागाजिनेच्छां सकललोकभयङ्करे प्रचण्डताण्डवे शान्तोद्वेगो धैर्यावलम्बनेन निर्भयस्सन् हर पूरयेति । भवान्या स्तिमितनयनं दृष्टभक्तिरित्यनेन सापि त्वद्भक्त्यतिशयदर्शनेन परितुष्टा सती त्वदनुग्रहे भगवतः त्वरामुत्पादयेदिति ध्वन्यते ।

Śloka 37.

p. 31. l.

कस्याञ्चिदिति सर्वत्र सुखसद्भावस्सूचितः । भवनवलभौ कूटाकारे भवने । 'कूटाकारस्तु वलभिः' इति वैजयन्ती । दृष्टे सूर्ये इति । कुतूहलनिवृत्तिस्तु तत्र वसतां दिनशतेनापि न भवेदिति भावः ।

l. 9. After भवन्तं प्रति—

न विधिपरमिदं वाहयेदिति मद्वचनं किन्तु करिष्यमाणानुवादकमेव इत्यर्थः ।

Śloka 39.

p. 31. l. 11.

सूर्योदयसमये गच्छता त्वया सर्वत्रैवं गन्तव्यमित्याह—तस्मिन् काले इति ।

Śloka 34.

p. 34. l. 20. After हरशशिरुचा—

हरशिरश्चन्द्रचन्द्रिकया ।

Śloka 45.

p. 34. Before the verse —

अथ चर्मण्वती नाम नदीं गच्छेः इत्याह—।

p. 35. The whole commentary on verse 45 is as follows :—

सिद्धद्वन्द्वैरिति । आर्द्रतन्त्रीका वीणा न स्वनतीति मत्वा भगवदाराधनार्थं तत्परिसरवर्तिभिस्सिद्धद्वन्द्वैः वीणिभिर्वीणावद्भिर्जलकणभयान्मुक्तमार्गः । अनेन तद्दर्शनसंभाषणादिना न तव गतिविलम्बसम्भवः इति विवक्षितम् । सुरभितनयानां तत्तद्यज्ञसम्बन्धिनां सर्वेषां पशूनामालम्भेन तच्चर्मराशेर्जातां स्रोतोमूर्त्या भुवि परिणतां नद्यात्मना बद्धशरीरां रन्तिदेवस्य राज्ञः कीर्तिं मानयिष्यन् व्यालम्बमानः भवतर । अनेन नद्युत्पत्तिकथाप्रस्तावेन रन्तिदेवकृतसकलयज्ञफलप्राप्तिस्त्वामवगाहनेन स्यादिति द्योत्यते ।

Śloka 46.

p. 35. ll. 5-6.

त्वयि तत्सम्माननं कुर्वति देवा अप्यन्तरिक्षचराः तां भुवो मुक्तागुणत्वेनोत्प्रेक्ष्य वर्णयिष्यन्ति, अहो सत्संगमस्य महिमा इत्याह – त्वय्यादातुमिति ।

l. 13.

गगनगतयः सिद्धाद्याः स्थूलेन मध्यस्थेन इन्द्रनीलमणिना सितं भुवो मुक्तागुणत्वेनोत्प्रेक्ष्यमाणं नूनं दृष्टीरावर्ज्य कुतूहलवशात् नयनान्येकाग्राणि कृत्वा प्रेक्षिष्यन्ते ।

Śloka 47.

p. 35. l. 26.

नेत्रकौतूहलानां कौतूहलविशिष्टानां नेत्राणामिति यावत् ।

l. 27.

पात्रीकुर्वन् नखपदमुखसलिलकणविकिरणमत्र कृत्यर्थः ।

Śloka 49.

p. 36. l. 23. After याः सिषेवे —

अनेन भगवत्सेवितत्वकथनेन स्वाभाविकमौपाधिकञ्च तासां पावनत्वमुक्तं भवति।

Śloka 50.

p. 37. l. 9. After कन्यां

तत्तपःप्रभावादेव तस्य पुत्रित्वमापन्नां सगरतनयानां कपिलकोपदहनभस्मीभूतानां स्वर्गसोपानपङ्क्तिं तद्भस्ममात्रस्पर्शेनापि तेषां स्वर्गारोहणोपायभूतां भागीरथीं गच्छेः अवगाहनादिना मङ्गलं सम्पादयितुमुपसर ।

l. 13. After भावः —

फेनवत्त्वं विहसनोत्प्रेक्षाबीजम् ।

Śloka 51.

p. 37. l. 22. After संसर्पन्त्या —

स्रोतोवत्तरलतया स्फुरन्त्या ।

l. 27. After व्योम्न्यवस्थानमुक्तम् —

व्योम्न्येव स्थित्वा सलिलपाने क्रियमाणे पश्चार्धस्योर्वीभावे दीर्घा छाया न स्यादिति पश्चार्धलम्बीत्युक्तम् । तिर्यगिति क्रियाविशेषणम् । तिरश्चीनो यथा भवति तथा पश्चार्धलम्बी भूत्वेत्यर्थः । एवं स्थित्वा उत्तरकूलपरिसरे सलिलमाददाने तस्मिन् नदीमध्यदेशं यावच्छायाव्याप्तिसम्भवात् सम्पूर्णबिम्बसिद्धिः । सुरगज इवेत्यनेन 'सर्पवेणिसवर्णे' 'शार्ङ्गिणो वर्णचोरे' इतिवदिह यमुनासमानवर्णत्वमुत्प्रेक्षाबीजमुक्तम् ।

Śloka 52.

p. 38. l. 15. After त्रिनयनवृषोत्खातेन

तच्छृङ्गसङ्गिना बहुलेन पङ्केनोपमेयाम् ।

Śloka 53.

p. 38. ll. 19 – 21.

गिरिराजस्य तस्यापि गिर्यन्तरात् प्रत्युपकारस्तं स्यादेव इत्याह — तं चेदिति

l. 27. After बाधेत चेत् —

राजचिह्नभूतचामरनाशनात् परो न तस्य बाध इति भावः ।

p. 39. l. 6. Before आपन्नार्तीति —

अथवा किमत्र मया वक्तव्यं, परोपकारार्थमेव हि भवादृशां सम्पत्सम्पाद मित्याह — आपन्नार्तीति ।

Śloka 54.

p. 40. l. 7. After क्रियानिष्फलशब्देन

अर्थानर्थप्राप्तिपरिहारलक्षणप्रयोजनशून्यत्वमुच्यते ।

Śloka 55.

p. 40. l. 9. The commentary on the whole verse is as follows:

तत्र गिरौ परमशिवः स्वकीयां चरणन्यासमुद्रां कस्याञ्चिद् दृषदि भक्तजनानुग्रहार्थं व्यक्तीकुर्वन् नित्यमेव सन्निधत्ते । स त्वयेत्थं समाराधनीय इत्याह— तत्र व्यक्तमिति । शश्वत्सिद्धैरुपहृतबलिमिति कपिलाद्यैरनवरतकृतार्चनम् । अनेन सुज्ञान एवासौ चरणन्यासप्रदेशस्तव इत्युच्यते । एवं कृतं भगवदाराधनं तद्दर्शनद्वारा तत्प्राप्तिलक्षणं मोक्षमपि वक्ष्यतीत्याह — यस्मिन् दृष्ट इति । करणशब्दः कायवाची । 'करणं कारणं कायः' इति वैजयन्ती । पापशब्दः काम्यकर्मणामप्युपलक्षणम् । स्थिरेति । अत्र पदशब्दः पद्यते गम्यत इति व्युत्पत्त्या प्राप्यं परमशिवमाह । गुणशब्दोऽप्यणिमाद्यष्टकमभिधत्ते । यथोक्तम् —

"अणिमादिगुणोपेतं अस्पृष्टपुरुषान्तरम् ।
शुद्धमीश्वरमित्युच्चैस्सार्धचन्द्रं बिभर्ति यः ॥"

इति । स्थिरा नैसर्गिका गुणा यत्र तत्प्राप्तये कल्पिष्यन्ते पर्याप्ता भविष्यन्ति ।

Śloka 56.

p. 41. l. 9.

निर्ह्रादी प्रतिशब्देन दीर्घीभूतः भावी भविष्यति । ननुशब्दोऽवधारणे ।

Śloka 57.

p. 41. l. 19.

यत्तत्क्रौञ्चाख्यस्य महाशिखरस्य मध्यस्थं रन्ध्रम् । भृगुपतिना श्रीपरशुरामेण ।

ll. 1–5. For हन्तैवं ……… भविष्यति —

भवान् बलिविमथनाभ्युद्यतस्य विष्णोः तिर्यगायमशोभी श्यामः पाद इव उच्छ्रीयमाणः पादो यदा तिरश्चीनो भवति तदवस्थस्स इव दर्शनीयो भविष्यतीत्यर्थः ।

Śloka 58.

p. 42. l. 12.

कैलासं विशिनष्टि— दशमुखेति । आत्मानं लङ्कां नेतुमिच्छतस्तदुद्धरणप्रवृत्तस्य दशमुखस्य भुजैराकुलीकृतः शिथिलीकृतः प्रस्थसन्धिर्यस्य स तथोक्तः । अनेन मनोज्ञत्वातिशय उक्तः —

"यानि यानि मनोज्ञानि वस्तून्यमरवेश्मनि ।
तानि तानि किलोद्धृत्य लङ्कां नयति रावणः ॥"

इति रावणस्य मनोज्ञवस्तुसङ्ग्रहप्रसिद्धेः । तामेव मनोज्ञतां विवृणोति—त्रिदशेति । दिव्याङ्गनानां सखीजनसमर्पितां अलङ्कारशोभां प्रियतमसमर्पितानि नखदन्तपदानि च सकौतुकं दिदृक्षमाणानां विशुद्धरजतात्मत्वादादर्शभूतस्येत्यर्थः । अनेन तत्र वसतस्तव तद्दर्शनानुभवेन सफलीकृते नयने भविष्यत इति द्योत्यते । एवं मनोज्ञतया प्रशस्य त्र्यम्बकाट्टहासत्वोत्प्रेक्षणेन अधृष्यतामप्याह — शृङ्गोच्छ्रायैरिति ।

Śloka 61.

p. 44. l. 5. After उच्यते —

अवश्यं नेष्यन्तीति । अनुभूतचराणि तासां नादृशानि दुर्विलसितानीत्यर्थः ।

l. 9. After निर्देशः —

यत्तु ग्रैष्मबाधोक्तिरत्र न सम्भवतीति केनचिदुक्तं तदङ्ग सर्वावस्थासु मन्द-मन्दातपत्वस्य दुर्लभताभिधानेन वक्ष्यमाणेन विरुद्धमिति ।

Śloka 62.

p. 45. The commentary on the whole verse is as follows :—

रम्यपदार्थानुभवातिक्रमणमुक्तं तदत्र कर्तव्यमित्याह — हेमाम्भोजेति । हेमा-म्भोजप्रसवीति सलिलस्य गुणातिशयं दर्शयति । बह्वाश्चर्यदिदृक्षया सर्वत्र सञ्चरता त्वया तत्र तत्र वर्षः कर्तव्यः, सलिलविच्छेदे जाते तस्मादेव मानसात् अक्षय्यसलिलात् पुनः पुनरादानञ्च कर्तव्यमिति जलदपदसम्बोधनेनाददान इति वर्तमानत्वकथनेन च विवक्षितम् । मुखपटशब्देन मस्तकालङ्कारतया बध्यमानः पटोऽभिधीयते । ऐरावतशब्देन स एव अभ्रमातङ्गत्वात् स्नातुं पातुं विहर्तुञ्च समागतेषु त्वया सम्माननीयः, तस्यैव च शुक्लवर्णस्य नीलवर्णेन त्वया शोभा भवेदित्युभयमपि सूचितं भवति । कुर्वन्निति वर्तमाननिर्देशेन यदा यदा सलिलादानं तदा तदा क्षणं क्षणं तत्प्रीणनं कार्यमित्येव विवक्षितम् । धुन्वन्निति अंशुकभूतानि कल्पद्रुमकिसलयानि वर्षाङ्गभूतैः स्ववातैः आधु-न्वन्, तदुत्कम्पनेन सर्वतः पताकाश्रियमाचरन्नित्यर्थः । नानाशब्देन रजतमये कैलासे विद्युता पिङ्गलत्वकरणं तत्क्षणमेव जर्जितनर्तितमयूरनिवहबिम्बप्रतिबिम्बैर्वर्णान्तरोज्ज्वल-त्वकरणं गर्जितमनुविदधद्भिर्दरीगृहविनिर्गतैः शरभसिंहनिवहैः सर्वतो मुखरत्वसम्पाद-नमेवमादयो व्यापारा गृह्यन्ते ॥

UTTARASANDEŚA

Śloka 1.

p. 46, l. 2. After दर्शयन् —

सप्तभिः श्लोकैः अलकामुपवर्णयति ।

Śloka 2.

l. 15. Before पाण्डुतां नीता—

यत्र वधूनां हस्ते लीलाकमलं, अलका बालकुन्दवृक्षस्य पुष्पैरनुविद्धाः 'अलकाश्चूर्णकुन्तलाः' इत्यमरः । आननश्रीः स्वाभाविकी मुखशोभा लोध्रपुष्पपाण्डुतां नीता मनोहरतराश्च चूडापाशे बद्धकेशकलापे नवं कुरवकपुष्पम् ।

'पाशः कक्षश्च हस्तश्च कलापार्थाः कचात्परे ।'

इत्यमरः । कर्णे चारु शिरीषपुष्पम् । सीमन्ते समविभक्तस्य केशकलापस्य मध्यरेखायां नीपं कदम्बपुष्पम् ।

l. 18. After कर्तव्या —

अन्तिमस्य नीपस्य वर्षसम्बन्धकथनेनैव कमलादीनां यथाक्रमं शरदादिसम्बन्धोऽपि सूचित इति वेदितव्यम् ।

Śloka 3.

p. 46, l. 19. For मधुपानप्रकारान्तरमाह —

स्वयौवनसफलीकरणप्रकारमाह ।

p. 47, l. 5

आहतेषु ताडितेषु ।

l. 7.

कल्पवृक्षप्रसूतिं अभिलषितप्रदायिभ्यः समुत्पन्नम् ।

'पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले'

इति वैजयन्ती ।

ll. 8—9. For शनकैः ... उक्तः—

गाम्भीर्यं सम्पादयितुमुक्तं— शनकैराहतेष्विति ।

Śloka 4.

p. 7. l. 16.

प्रियेष्वत्यन्तानुरागविषयभूतेषु स्वभर्तृषु । ह्रीमूढानां लज्जया मौग्ध्येन च युक्तानाम् ।

l. 19. After इत्यर्थः —

वैफल्यकथनेनात्र साध्वसमपि सिध्यति ।

p. 48. l. 2.

नीवीबन्धोच्छ्वसिताशिथिलं नीवीबन्धस्य यदुच्छ्वसितं, अबुद्धिपूर्वकं श्लथनं तेन शिथिलं श्रोणीचक्राद्विस्रस्तप्रायम् । अनेन प्रियशब्दोक्तं भर्तृणां अनुरागविषयत्वं विवृतम् । रागादनिभृतकरेष्विति रागादनिभृताः स्वयमेव स्वोचितनखक्षतादि कुर्वाणाः करा येषामित्यर्थः । एवं क्षौमविशेषणेन प्रियजनविशेषणेन च अन्योन्यानुराग उक्तो भवति ।

Śloka 5.

p. 48. l. 9.

शङ्कास्पृष्टां इव भर्त्सनभयादिव ।

p. 50. l. 2. After सभ्रूभङ्गेति —

अत्र विभ्रमाः चापस्थानीयाः, भ्रूभङ्गाः ज्यास्थानीयाः, नयनानि शरस्थानीयानि इति सिध्यति ।

l. 3.

अत्र षड्भिः श्लोकैः स्वभवनाभिज्ञानमाह ।

Śloka 10.

p. 15. l. 11.

'चारौ दक्षे च पेशलम्' इत्यमरः । रत्नान्तरैर्यथाशोभं अनुक्तप्रदेशनिर्माणमप्यर्थादुक्तं भवति ।

Śloka 15.

p. 54. l. 1.

तन्वी न स्थूला न च तनुतरा ।

Śloka 17.

p. 55. l. 9.

भिन्नो अन्यत्वमापन्नो वर्णो ययोस्तौ भिन्नवर्णौ, भिन्नवर्णौ अधरोष्ठौ यस्य तत्तथोक्तम् । लम्बालकत्वादसकलव्यक्तीति सम्बन्धः । हस्तव्यस्तं इदमप्यसकलव्यक्तावुपयुज्यते । एवं क्लिष्टकान्ति तस्या मुखमद्य नूनं त्वदनुसरणेन, मेघसंरोधेनेति यावत्. क्लिष्टकान्तेः कलुषितशोभस्येन्दोः दैन्यं दीनभावं बिभर्तीति वाक्यार्थः ।

Śloka 22.

p. 58. l. 19. For विरहशयने ··· अनुवादकमेतत् —

चतुर्भिरेवंभूतां पश्येति पूर्वक्रिययैव सम्बन्धः । आधिक्षामां वियोगदुःखकृशाम् । विरहशयने विरहसमयोचिते तृणादिमात्रव्यवहिते भूभागे ।

l. 9.

अथ तमेव कार्श्यातिशयं सहजशोभानभिभवञ्च दर्शयन्नुत्प्रेक्षते — प्राचीमूले कलामात्रशेषां हिमांशोस्तनुमिव ।

p. 59. ll. 1–3. For नीतेति ······ कल्पप्रायाम् —

नीता रात्रिरिति । मया सार्धं इच्छारतैः स्वेच्छानियमिततत्तत्करणोपचारयुक्तैः सुरतैः कारणैः या रात्रिः क्षणमिव नीता तामेव विरहमहतीं अनया विरहावस्थया कल्पप्रायां उष्णैः अश्रुभिः यापयन्तीम् ।

Śloka 24.

p. 60. l. 3. For अस्य ········· दर्शयन्नाह —

आद्ये दिवसे स्वयैव कृतस्य वेणीबन्धस्य शिथिलनेऽपि कालं कर्तृविशेषञ्च ।

Śloka 26.

p. 61. ll. 5 – 6. For आस्तामेतत् ······ भवतीत्याह —

आस्तामिदं तद्दुःखातिशयो दृश्यमानस्त्वद्दुःखनिदानं स्यादिति । यत्पुनस्तया स्वयमेव धर्मबुद्ध्या मङ्गलसूत्रातिरिक्तसकलाभरणापाकरणेन कृतं वेषान्तरमात्मनः इदमेव तावत्प्रथमतो दृश्यमानं त्वदासप्रवर्तनाय पर्याप्तं भवत्येवेत्याह — ।

Śloka 27.

p. 61. l. 20.

स्नेहो हि विरहक्लेशातिशयस्य निदानं भवति । जानामि च सम्यगेव मत्प्रेयस्या मनो मयि सम्भृतस्नेहमिति । अतोऽनुमानेनास्मिन् प्रथमविरहे तामहमित्थम्भूतां तर्कयामि । न खलु सुभगम्मन्यभावप्रवृत्तमनर्थकमिति मद्वाक्यमवगन्तव्यम् । संवादकश्चास्मिन्नर्थे भवतः प्रत्यक्षमेवाचिरात् भविष्यतीत्यर्थः । तव सख्या इत्यभिधानेन निर्व्याजतया त्वत्समानशीलैवेयमिति ध्वन्यते ।

Śloka 28.

p. 62. l. 1. For रुद्धो .... यस्य—

अलकैरागण्डलम्बिभिः कारणैः रुद्धो अपाङ्गे प्रसरो यस्य तत्तथोक्तम् ।

Śloka 29.

p. 62. l. 13. After त्याजितः —

मुक्ताजालशब्देन ऊरुद्वयालङ्कारभूतरशनालम्बिन्यो मुक्तामाला उच्यन्ते । चिरविरचितमिति बहुशिल्पयुक्तत्वात् चिरेण पर्यवसितनिर्माणमित्यर्थः ।

l. 16. For सम्भोगान्ते .... इति—

सम्भोगेति । प्रतिदिनं सम्भोगावसाने मद्धस्तसंवाहनसुखाभिज्ञ इत्यर्थः ।

Śloka 32.

p. 64. l. 6.

अविधवे जीवद्भर्तृके ।

Śloka 35.

p 65. l. 9.

आयुष्मान्निति आदेहपातं परोपकारैकव्यापाराणां भवादृशामायुः प्रशस्ततमं भवतीति स्तुतिरत्र सम्बोधनेन क्रियते । तामेवं ब्रूया इति सम्बन्धः ।

l. 14. After श्लोकत्रयेण —

तव सहचर इत्यनेन यदा सः स्वायत्तचेष्टः तदा कदाचिदप्यपृथग्भूत इति द्योत्यते । तथाभूतस्सन्नपि रामगिर्याश्रमस्थो भूत्वा आश्रमप्रभावादायुःशेषसद्भावाद्वा स्वयमव्यापन्नः त्वामपि कुशलं अव्यापत्तिमेव पृच्छति, यतः प्राणिनामेतदेव कुशलं पूर्वाशास्यम् ।

Śloka 35.

p. 66. l. 3. After द्रष्टव्यम् —

चकारोऽङ्गविशेषणानां द्वितीयान्तानामन्ते कर्तव्यः ।

l. 5. After नादर्तव्यम् —

अस्रद्रुतमिति । अस्रेण सिक्तमित्यर्थः । सङ्कल्पैरिति बहुवचनेन समाधिशैथिल्ये जाते पुनः पुनः सन्दधातीति ध्वन्यते ।

Śloka 40.

p. 68. ll. 13—14.

अथ त्वदङ्गसङ्गसम्भावनावतो वायूनहमखिलानेव आलिङ्गन् वियोगदहनोद्दीपनदर्शनात् तस्य वार्यतामपि निश्चिन्वानोऽस्मिन्नपि व्यापारे निष्फलयत्नोऽहं संवृत्त इत्याह — भित्त्वा सद्य इति ।

l. 20. After आलिङ्ग्यन्ते —

किलेत्यकार्यदर्शनलभ्यं अङ्गस्पर्शाभावं सूचयति ।

Śloka 41.

p. 69. l. 8. After भवतीत्यर्थः —

चटुलनयनपदसम्बोधनेन 'रामो राजीवलोचनः' इतिवत्तस्याः सर्वावयवसौन्दर्यमुच्यते । तद्वचनेन च युक्तरूपैवेयं त्वद्वियोगव्यथानां ईदृशी शक्तिरिति द्योत्यते ।

Śloka 43.

p. 70. l. 13.

भुजगशयनादुत्थिते हेमन्तारम्भे खलु मे शापान्तः, अतः शेषान् अनतिवाहितान् ।

Śloka 45.

p. 72. l. 7. After इत्यर्थः —

भोगेनैवं रागादिरागनाशो दृश्यत इति भावः ।

l. 8. After विवेकः —

ब्रूया एवं इत्येवंशब्दपरामृष्टानां वाक्यानाम् अत्र समाप्तिः ।

Śloka 46.

p. 72. l. 19. After प्रत्यादेशः —

'प्रत्यादेशो निराकृतिः' इत्यमरः ।

Śloka 47.

p. 73. The commentary for the whole verse is as follows:

अनुचितप्रार्थनावर्त्मन इति मघवत्प्रकृतिपुरुषदौत्यकरणविषयत्वात् अनुचितैवेयं प्रार्थनेत्यर्थः । सौहार्दानुक्रोशाभ्यामेतन्मे प्रियं कृत्वेति वचनेन मत्प्रार्थनामतन्त्रीकृत्य त्वद्गतकारुण्यादिवशादेव प्रवर्तमानेन त्वया मद्व्यापारानौचित्यमपि परिहृतं भवतीति स्तुतिर्विवक्षिता । प्रावृषा सम्भृतश्रीरिति आषाढमास्येव मदर्थो व्यापारः कर्तव्यः, प्रावृषि तु सलिलदानाय भुवनतलसञ्चरणमेव करणीयमित्यर्थः ॥

ll. 16—23 For अनुदिनं .... कर्तास्याः

कौमारिलाचार्यवरस्य नाम्ना
वृत्तेन मूर्त्यापि च शङ्करस्य ।
शिष्येण सृष्टा परमेश्वरेण
व्याख्येयमेनां विमृशन्तु सन्तः ॥

APPENDIX II.

Index of Quotations in Sumanoramaṇī.

Quotation	Source	Author	Page
अतिदीर्घा भृशं ह्रस्वा	सामुद्रिकाशास्त्रम्	...	४४
अथ शब्दानुशासनम्	महाभाष्यम् १-१-१	पतञ्जलिः	५
अविनोददीर्घयामा	शाकुन्तलम् (?)	..	५७
आत्मैव ह्यात्मनो बन्धुः	भगवद्गीता ६-५	...	१९
आवेग एव विषये	...	दिवाकरः	३१
एकप्रघट्टको	...	...	४
एको न गच्छेदध्वानम्	...	...	१४
एतेंशांशकलाः पुंसः	भागवतम् १-३-२८	...	१८
कटुतिक्तकषायास्तु	...	अमरः (?)	१२
करीव सिक्तम्	रघुवंशम् ३-१	कालिदासः	२३
कुटचो गिरिमल्लिका	अमरकोशः १-४-६६	अमरः	८
कृतशुद्धेः क्रमात्	...	खरनादः	२२
केदारस्येव कोदारः	रामायणम्	...	८
क्षीराब्धौ शेषपर्यङ्के	कौर्मपुराणम्	...	७०
गृहबलिभुङ्नीलकण्ठश्च	अभिधानरत्नमाला २-८८	हलायुधः	२३
चतुष्पथं चैत्यतरुं	...	....	५८
चापमैन्द्रमनुलोमं	महायात्रा	वराहमिहिरः	१८
चिरं न तत्र स्थातव्यम्	...	...	१६
जलमध्येऽनावृष्टिः	संहिता (?)	...	१८
तवास्य नीलोत्पलचारु०	...	...	५
तिर्यग्दन्तप्रहारस्तु	अभिधानरत्नमाला२-६५	(अमरः?)हलायुधः	७
दयितास्वनवस्थितम्	कुमारसम्भवम् ४-२८	कालिदासः	३१
देवाद्वृते वरः श्रेष्ठे	अमरकोशः ३-३-१७३	अमरः	११
धर्मे चार्थे च कामे च	महाभारतम्	...	१०

Quotation	Source	Author	Page
धर्मो रक्षति	मनुस्मृति	...	१४
धातुसम्बन्धे प्रत्ययाः	अष्टाध्यायी ३-४-१	पाणिनिः	४४
धूपोऽसौ गन्धवासितः	वैजयन्ती १-१-३-२८	यादवप्रकाशः	२८
न तु भाद्रपदे	महायात्रा	वराहमिहिरः	१३
न स्थातव्यं न गन्तव्यम्	....	...	१४
नितम्बः पश्चिम०	वैजयन्ती १-२-१-३६	यादवप्रकाशः	३२
नृत्तं गीतं च	....	हलायुधः (?)	४१
पक्वदाडिमबीजाभं	....	...	५४
पर्यायोक्तं विना	काव्यप्रकाशः १०-२९	मम्मटः	४८
पश्चान्नितम्बः स्त्रीकट्याः	अमरकोशः १-६-६४	अमरः	३२
पादाः पर्यन्तपर्वताः	,, २-३-७	,,	२१
पानीयं प्राणिनां प्राणाः	अष्टाङ्गसङ्ग्रहः १-६	वाग्भटः	११
पूर्वानुभूतं स्मरता	रघुवंशम् १३-२८	कालिदासः	८
प्रत्यादेशो निराकृतिः	अमरकोशः ३-२-३१	अमरः	३२
प्राणो वायौ बले	...	केशवः (?)	१४
बाष्पोऽश्रुण्यम्बु०	वैजयन्ती २-१-१-७९	यादवप्रकाशः	१५
मनश्शरीरयोस्तापः	....	...	६
यद्यद्विभूतिमत्	भगवद्गीता १०-४१	...	१५
यावत्पुरानिपातयोः	अष्टाध्यायी ३-३-४	पाणिनिः	५५
रात्रौ जागरणं रूक्षम्	अष्टाङ्गहृदयम् १-७-५५	वाग्भटः	६२
राम इत्यभिरामेण	रघुवंशम् १०-६७	कालिदासः	२
वप्रः पितरि वा नक्ली	वैजयन्ती २-१-५-१५७	यादवप्रकाशः	७
वष्टि भागुरिः	...	...	२५
वामाः प्रशस्ताः	योगयात्रा	वराहमिहिरः	१३
विकारहेतौ सति	कुमारसम्भवम् १-५९	कालिदासः	६१
विभाषा सपूर्वस्य	अष्टाध्यायी ४-१-३४	पाणिनिः	१४

Quotation	Source	Author	Page
व्यथ भयचलनयोः	धातुपाठः	...	१२
शरभस्तु गजारातिः	(वैजयन्ती १-३-४-११)	अमरः (?)	४०
शान्तमिदमाश्रमपदम्	शाकुन्तलम् १-१४	कालिदासः	६२
षणु दाने	धातुपाठः	...	१९
सरस्वतीदृषद्वत्योः	मनुस्मृतिः २-१७	मनुः	३६
सारो बले स्थिरांशे	वैजयन्ती २ २-५-९७	यादवप्रकाशः	१३
सारङ्गः शबलो वर्णः	,, २-२-५-८९	,,	२३
सुखसुप्तं न बोधयेत्	...	...	३१
सुहृदर्थं प्रतिश्रुत्य	महाभारतम्	....	,,
स्नेहः प्रवासाश्रयात्	नीतिशतकम् (घन० ३)	भर्तृहरिः	७०
स्रोतोऽम्बुनिर्गमद्वारः	वैजयन्ती २-१-३-३७	यादवप्रकाशः	३३

APPENDIX III.

REFERENCES TO THE VIDYULLATĀ IN THE SUMANORAMAṆĪ

Sumanoramaṇī — *Vidyullatā*

P. 2, l. 4.

कश्चित्तु ग्रन्थनिवेशलिप्सया भित्वा कश्चिच्छब्दसंज्ञाभ्यां समानाधिकृताभ्यां जीवपरमात्मनोरैक्याभिधानमातिष्ठते । तत्तावदीदृशेष्वद्वैतासम्बन्धेषु ग्रन्थेषु सकलरूपनिरूपणस्यैव कर्तुं योग्यत्वान्नाद्रियामहे । चित्पदस्य च ज्ञानवाचिनो जीवाभिधायित्वमदृष्टचरम् । तस्माद् ग्रन्थनिवेशं विना मङ्गलविषयमनोवाक्कायव्यापारसद्भाव एवात्रास्थेयः ॥

P. 2, l. 15.

अथ सकलविबुधमहितयशाः कविकुलपरमेश्वरो मेघसन्देशसंज्ञितं रसिकजनरसायनं प्रबन्धमारभमाणः तस्य निष्प्रत्यूहपरिसमास्त्यादिनिखिलसमीहितसिद्धये विश्वमङ्गलनिदानमवनिदेवताकं मगणमादौ प्रयुञ्जानः 'कं ब्रह्म खं ब्रह्म' इति, 'वह्नीन्द्रोपेन्द्रमित्रैः कः' इति, 'काश्चित्तात्मार्कधीधातृवाताः' इत्यादिवचनैः परब्रह्मवाचिना ककारेण चित्साक्षिज्ञानमात्रस्वलक्षणजीवप्रतिपादकेन चिच्छब्देन च समानाधिकृताभ्यां जीवेश्वरैक्यमशेषपुरुषार्थमौलिभूतमनुसन्दधानः प्रथमपद्येन वस्तुनिर्देशं करोति कश्चिदित्यादि ॥

P. 2, l. 27.

ये तु कान्ताविरह एवात्र शापविषय इत्याहुः तेषां मतं 'शापदुपकृतनुः', 'शापान्मतङ्गजत्वं प्राप्तः', 'शापेन भृङ्गीभूतः' इत्यादिप्रयोगेषूपकृत्वादिवत् शापेनास्तङ्गमितमहिमेत्यत्रापि महिमास्तमनस्यैव विषयत्वप्रतीतेर्विरहस्य च कान्ताविरहगुरुणेत्येवमुच्यमानस्य गौरवहेतुत्वमात्रावगमाच्चोपेक्षणीयम् ॥

P. 5, l. 2.

शापस्य भोग्यत्वं नाम फलतः प्रियाविरहरूपात् ॥

P. 3, l. 18.

कश्चित्तु नामविशेषानभिधानं रसानुपयोगात कृतमिति व्याकृतवान् । तदस्ति तया

P. 8, l. 11.

कश्चिदिति सामान्यनिर्देशो रससंरम्भितवेस्तदनुपयुक्तयक्षविशेषप्रतिपादने

Sumanoramaṇī

तावद्वक्ष्यमाणानुपयोगः । अस्मिन्नपि वाक्ये निक्षिप्यमाणं देवदत्तादिनामपदं न श्रोतृजनचमत्कारं जनयेदित्यभ्युच्चयत्वेन कृतमिति मन्तव्यम् ॥

P. 3, l. 25.

यत्तूत्तरश्लोके मासेष्वतीतेष्वित्यनभिधाय मासान् नीत्वेति केचित् तन्न तथा मन्तव्यम्, 'वन्द्यैः पुंसां रघुपतिपदैराङ्कितं मेखलासु' इत्येतद्वाक्यवशादाश्रमबहुत्वस्यैवावगमात् ॥

P. 4, l. 5.

यत्तु कान्ताविरहगुरुणेत्यस्य कान्ताविरहोपदेशाचार्येणेति व्याख्यानं तद्विरहस्य शापविषयत्वोपजीवनेन कृतत्वात्तन्निरासेनैव निरस्तं भवति ॥

P. 4, l. 6.

यत्पुनः 'स्वाधिकारप्रमत्तः' इत्यत्राधिकारविशेषानभिधानं रसानुपयोगात् कृतमित्युक्तं तन्नामविशेषानभिधानं रसानुपयोगादितिवदभ्युच्चयत्वेन नेतव्यम् ॥

P. 4, l. 8.

यत्पुनरयं ग्रन्थः — 'अनेनैव कान्तातिसक्तिमूलत्वमपि शापस्यावगम्यते अन्यथा तद्विरहविषयत्वानुपपत्तेः शापस्य' इति सोऽपि विरहस्य शापविषयत्वाभावात् प्रलापमात्रमेव ॥

Vidyullatā

तात्पर्याभावं ध्वनयति । यथा रघुवंशे 'मतङ्गशापादवलेपमूलात्' इत्यवलेपप्रकारविशेषानुक्तिः ॥

P. 8, l. 8.

मासान्नीत्वा न तु मासेषु गतेषु, निर्विनोदतया दीर्घीभूतानिवानपगच्छतो मासान् विचित्रैरुपायैः कथं कथमपि गमयित्वेत्यर्थः ॥

P. 3, l. 13.

कान्ताविरहगुरुणा प्रियतमावियोगोपदेशाचार्येण ॥

P. 3, l. 19.

स्वाधिकारप्रमत्तः स्वेन आत्मना अङ्गीकृते अधिकारे कार्यधुरायां निधिपालनादौ । अत्रापि विशेषानभिधानं पूर्ववद्रसानुपयोगात् ॥

P. 3, l. 18.

अनेनैव कान्तातिसक्तिमूलत्वमपि प्रमादस्यावगम्यते । अन्यथा तद्विरहविषयस्यानुपपत्तेः शापस्य ॥

Sumanoramaṇī

P. 4, l. 12.

यत्पुनः भर्तृपदनिक्षेपस्य प्रयोजनमुक्तं— भर्तुरिति निग्रहानुग्रहेऽपि शक्तस्यैतावता क्रोधनिवृत्तिर्महान् लाभ इति द्योत्यत इति— तदप्ययुक्तमेव । निग्रहविशेषनियामकेन यथापराधदण्डत्वेन गुणेनान्वितस्य वैश्रवणस्य निग्रहान्तरेच्छासम्भवात् ॥

P. 4, l. 16.

यत्तु महात्मनोऽपि यक्षस्य महिलासङ्गातिशयादनर्थपरम्परापतिता, अतो विषयेष्वतिसक्तिरनर्थाय, 'विनोदमात्रमेवेदमिति यस्यावधारणा विटवृत्तं स जानाति' इत्युक्तया नीत्या वर्तमानो न क्वचिदवसीदति इति ज्ञाप्यत इत्यादिप्रयोजनकथनं तेन कृतं तत्सकलं ग्राम्यमेव । असाधारणप्रयोजनासम्भवे काव्यमात्रसम्बन्धिनां प्रयोजनानां विद्यमानत्वात् ॥

P. 5. l. 26.

कश्चित्तु 'शब्दानुशासनम्' इति 'तवास्य नीलोत्पलचारुचक्षुषो मुखस्य तद्रेणुसमानगन्धिनः' इति च शास्त्रे काव्ये च प्रयोगदर्शनात् समासे गुणभूतस्यापि परामर्शः क्रियत इति क्लेशकृतोऽयं परामर्श इति व्याचष्टे । तद्व्याख्यानं स्वशब्दसाहित्यकृतं विशेषमनवधाय कृतमित्युदाहृतवाक्यद्वयानुसन्धानादेव सुज्ञेयमिति नादर्तव्यम् ॥

Vidyullatā

P. 5, l. 6.

भर्तुरिति, निग्रहान्तरेऽपि शक्तस्य एतावता क्रोधनिवृत्तिर्महालाभः, अप्रतिविधेयत्वादिति द्योत्यते ॥

P. 6, l. 22.

अतो विषयेष्वतिसक्तिरनर्थाय, 'विनोदमात्रमेवेदमिति यस्यावधारणा विटवृत्तं स जानाति' इत्युक्तरीत्या वर्तमानो न क्वचिदवसीदतीति ॥

P. 7, l. 20.

तच्छब्देन प्रकृतः समासे गुणीभूतो रामगिरिः परामृश्यते । 'अथ शब्दानुशासनं, केषाम्' इति 'तवास्य नीलोत्पलचारुचक्षुषो मुखस्य तद्रेणुसमानगन्धिनः' इति च शास्त्रे काव्ये चैवं प्रयोगदर्शनात् ॥

Sumanoramaṇi	*Vidyullatā*
P. 6, l. 19.	*P. 8, l. 20.*
कश्चिदत्र सुहृदालिङ्गनसमाधिरित्याह । तदयुक्तम् । कविबुद्धौ गिरिमेघयोरचेतनत्वेनासुहृद्भावात् । 'आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य' इति तु ध्यक्षबुद्ध्या वक्ष्यति ॥	अत्र सुहृदालिङ्गनसमाधिः ॥
P. 7, l. 20.	*P. 9, l. 19.*
यत् पुनः अस्य प्रियामिति शेषः इति व्याख्याति तदयुक्तम् । ध्यानविषयीकृतस्यार्थान्तरस्योत्तरश्लोक एव दर्शयिष्यमाणत्वात्, अस्य सार्वकालीनत्वेन स्थिरध्यानान्तर्भावाच्च । तथा च वक्ष्यति 'अङ्गेनाङ्गं सङ्कल्पैर्विशति ' इति ॥	दध्यौ, प्रियामिति शेषः ॥
P. 12, l. 22.	*P. 18, l. 15.*
केचित्तु अन्योऽपि यः पुमान् पराधीनवृत्तिः स्वात्मवैधर्म्येणोदाह्रियत इत्याहुः । तत्र तावद्व्यवहितान्वयो भवति । अपिशब्दोऽपि न संबध्येत । साधर्म्ये हि गुणक्रियासामान्यैरपिशब्दप्रयोगो भवति, न वैधर्म्ये । 'रामः शुक्लः कृष्णोऽपि कृष्णः', 'रामः शेते कृष्णोऽप्यास्ते' 'प्रथमो रामो ब्रह्मः द्वितीयतृतीयावपि क्षत्रियौ' इत्यसंभवात् ॥	अन्योऽपि यः पुमान् अयं जन इव पराधीनवृत्तिर्न स्यात्, अहं यथा अनतिक्रमणीयेन स्वामिना परतन्त्रः, एवं परतन्त्रता यस्य नास्ति स इति वैधर्म्योदाहरणमेतत् ॥
P. 21, l. 1.	*P. 34. l. 8.*
कश्चित्तु 'तोयोत्सर्गेण कृतेन गलितगौरवतया शीघ्रतरगमनः' इति तोयोत्सर्गस्य द्रुततरगतिसिद्धिमेव प्रयोजनमभिहितवान् ।	तोयोत्सर्गद्रुततरगतिः । तदनुग्रहाय तत्र प्रयुक्तेन वर्षेण गलितगौरवतया शीघ्रतरगमनः ॥

Sumanoramaṇī

तदयुक्तम् । 'अद्रेः शृङ्गं' इत्यत्र तोयपूर्णस्यापि स्वरूपाच्छादनक्षमवेगसम्पादनशक्तेरुक्तत्वात् । किञ्च अनन्तरभाविनोयादानविधिविरुद्धश्चैतद्व्याख्यानम् । तथा हि— पूर्वमुभयत्र वृष्टिं विहितवता यक्षेण स्वेनैव कारितस्य तोयोत्सर्गस्यानेन श्लोकेन द्रुततरगतिलाभे प्रयोजने कथिते सत्युत्तरश्लोके द्रुतत्वविरुद्धं तोयादानविधानं न घटते । न च वाच्यं तोयमादायेति तोयादानं प्रत्यनुमितिरेवात्र क्रियते न विधिरिति । विध्यभावे 'अन्तस्सारम्' इत्यादानप्रशंसानन्वयप्रसङ्गात् । तस्माद्वदान्यताप्रवृत्तिभङ्गापादकं रिक्तावस्थायामर्थिनः दृश्यत्वं परिहर्तुं द्रुतगत्यादिविशिष्टनदीप्राप्तिविधानमेवैतत् । न तु शीघ्रतरगतिविधानमात्रपरमिति ॥

P. 22. l. 27.

यद्यपि 'सारङ्गः शबलो वर्णश्चातकः षट्पदो मृगः ।' इत्यत्र सारङ्गशब्दस्य गजवाचित्वं न दृष्टं, तथापि 'त्वन्निष्यन्दोच्छ्वसिते'ति, 'करीव सिक्त'मिति च गजानां जलसिक्तमहीगन्धप्रियत्वं वदता कविनात्राप्युर्वीगन्धाघ्राणेन गजा एव सारङ्गशब्देनोक्ता इति मन्तव्यम् ॥

P. 66, l. 3.

इह चशब्दस्य वाक्यार्थसमुच्चयपरत्वं कुवलयप्रभवत् सङ्कल्पसमागमस्यापि तारकाकिकत्वप्रतीतिप्रसङ्गादुत्तरवाक्ये चशब्दा-
... ॥

Vidyullatā

P. 36, l. 21.

घ्राणे तु सारङ्गा गजा इति केचित् । 'करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम्' इत्युक्तत्वात् । अत्र प्रमाणं मृग्यम् ॥

P. 151, l. 14.

अङ्गेनाङ्गमिति । चकारः कुशलप्रश्नसमुच्चयार्थः ॥

APPENDIX IV.

VERSES NOT COMMENTED UPON IN SUMANORAMAṆĪ.

I

Jn 76, Ml 77, Ms 75, Sd 76, St 78, Sv 80, Vs 78.

अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥

II

Sd 18, Sv 18, Vs 18.

अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूट-
स्तुङ्गेन त्वां जलद ! शिरसा वक्ष्यति श्लाघ्यमानः ।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥

III

Ml 22, Ms 22, Sd 23, St 22, Sv 23, Vs 23.

अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणतया निर्दिशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि ॥

IV

Jn 69, Ml 71, Ms 69, Sd 70, St 70, Sv 71, Vs 72.

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यस्मात्प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥

V

Jn 118, Ml 119, Ms 120, Sd 121, St 119, Sv 120, Vs 121.

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥

VI

Vs 127.

इत्थंभूतं सुरचितपदं मेघदूताभिधानं
कामक्रीडाविरहितजने विप्रयोगे विनोदः ।
मेघस्यास्मिन्नतिनिपुणताबुद्धिभावः कवीनां
नत्वार्यायाश्चरणकमलं कालिदासश्चकार ॥

VII

Jn 68, Ml 78, Ms 73, Sd 72, St 74, Sv 75, Vl 70, Vs 75.

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥

VIII

Ms 124, Sd 124, St 122, Sv 123, Vs 124

तत्सन्देशं जलधरवरो दिव्यवाचा चचक्षे
प्राणस्तस्या जनहितरतो रक्षितुं यक्षवध्वाः ।
प्राप्योदन्तं प्रमुदितमनाः सापि तस्थौ स्वभर्तुः
केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु ॥

IX

Ms 123, Sv 125, Vs 125.

तस्माददद्रेर्निगदितुमथो शीघ्रमेत्यालकायां
यक्षागारं विगळितनिभं [illegible]चिह्नैर्विदित्वा ।

यत्सन्दिष्टं प्रणयमधुरं गुह्यकेन प्रयत्नात्
तद्गेहिन्याः सकलमवदत्कामरूपी पयोदः ॥

X

Ms 111, Sd 112, Sv 111, Vs 112.

धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले !
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।
घर्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयु-
र्दिक्संसक्तप्रविततघनव्यस्तसूर्यातपानि ॥

XI

Jn 78, Ml 35, Ms 33, Sd 69, St 27, Sv 69, Vs 69.

पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥

XII

Jn. 32, Ml 34, Ms 35, Sd 35, St 33, Sv 34, Vs 35.

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥

XIII

Jn 75, Ml 73, Ms 71, Sd 78, St 72, Sv 78, Vs 73.

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥

XIV

Jn 70 , Ml 70 , Ms 74 , Sd 75 , St 76 , Sv 77 , Vs 81

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥

XV

Jn 77 , Ml 80 , Ms 78 , Sd 81 , St 80 , Sv 82 , Vs 80.

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥

XVI

Ms 125 , Sd 125 , St 123 , Sv 124 , Vs 126.

श्रुत्वा वार्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः।
संयोज्यैतौ विगलितशुचौ दम्पती हृष्टचित्तौ
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ॥

XVII

Jn 83 , Ml 33 , Ms 32 , Sd 34 , St 36 , Sv 33 , Vs 34.

हारांस्तारांस्तरलगुटिकान् कोटिशः शङ्खशुक्तीः
शष्पश्यामान् मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भङ्गान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥

APPENDIX V.

Concordance of the verses in Meghasandeśa.*

Ślokas	Dakṣiṇāvartanātha	Jinasena	Mallinātha	Mahimasiṁhagaṇi	**Parameśvara**	Pūrṇasarasvatī	Sāroddhāraṇī	Sarasvatītīrtha	Sumativijaya	Vallabhadeva	Viśvanātha
अक्षय्यान्तर्भवन•	0	76	77	75	**0**	0	76	78	80	0	78
अङ्गेनाङ्गं	98	107	108	108	**98**	98	109	108	108	99	109
अद्रेः शृङ्गं	14	14	14	..	**14**	14	14	...	14	14	14
अध्वक्लान्तं	0	0	0	0	**0**	0	18	0	18	0	18
अप्यन्यस्मिन्	34	36	38	38	**34**	34	38	38	38	34	38
अम्भोबिन्दु•	0	0	22	22	**0**	0	23	22	23	0	23
आद्ये बद्धा	87	96	98	97	**87**	87	95	95	98	85	98
आधिक्षामां	85	94	95	93	**85**	85	96	97	96	87	96
आनन्दोत्थं	0	69	71	69	**0**	0	70	70	71	0	72
आपृच्छस्व	12	12	12	12	**12**	12	12	...	13	9	10
आराध्यैनं	45	47	49	49	**45**	45	49	49	49	45	49

* The Ślokas in the Uttarasandeśa are numbered continuous with the Pūrvasandeśa.

Concordance of the verses in Meghasandeśa — (Contd.)

Śloka	Dakṣiṇāvartanātha	Jinasena	Mallināātha	Mahimasiṁhagaṇi	**Parameśvara**	Pūrṇasarasvatī	Sāroddhāraṇī	Sarasvatītīrtha	Sumativijaya	Vallabhadeva	Viśvanāthā
आलोके ते	81	90	91	91	**81**	81	92	91	92	82	92
आश्वास्यैवं	0	118	119	120	**0**	0	121	119	120	0	121
आसीनानां	52	54	56	56	**52**	52	56	56	56	52	56
इत्थम्भूतं	0	0	0	0	**0**	0	0	0	0	0	127
इत्याख्याते	96	105	106	106	**96**	96	107	106	0	97	107
उत्पश्यामि त्वयि	59	61	63	63	**59**	59	63	63	63	59	63
उत्पश्यामि द्रुतं	22	22	23	23	**22**	22	24	23	24	22	24
उत्सङ्गे वा	82	91	92	92	**82**	82	93	[illegible]2	93	83	93
एतत्कृत्वा	110	120	121	122	**110**	110	123	121	122	111	123
एतस्मान्मां	108	117	118	119	**108**	108	120	118	119	109	120
एभिः साधो !	76	88	86	86	**76**	76	87	86	87	77	87
कच्चित्सौम्य !	109	119	120	121	**109**	109	122	120	121	110	122
कर्तुं यच्च	11	11	11	11	**11**	11	11	...	12	12	12
कश्चित्कान्ता०	1	1	1	1	**1**	1	1	1	1	1	1

गच्छन्तीनां	37	39	41	41	**37**	37	41	41	41	37	41
गत्युत्कम्पाद०	0	68	78	73	**0**	0	72	74	75	70	75
गत्वा चोर्ध्वं	58	60	62	62	**58**	58	62	62	62	58	62
गत्वा सद्यः	77	89	87	87	**77**	77	88	87	88	78	87
गम्भीरायाः	40	42	44	44	**40**	40	44	44	44	40	44
छन्नोपान्तः	18	18	18	18	**18**	18	19	18	19	18	19
जातं वंशे	6	6	6	6	**6**	6	6		6	6	6
जाने सख्याः	90	99	100	100	**90**	90	99	99	101	90	100
जालोद्गीर्णैः	32	34	36	36	**32**	32	36	34	36	32	36
ज्योतिर्लेखा०	44	46	48	48	**44**	44	48	48	48	44	48
तत्र व्यक्तं	55	57	59	59	**59**	59	59	59	59	55	59
तत्र स्कन्दं	43	45	47	47	**43**	43	47	47	47	43	47
तत्रागारं	71	80	81	81	**71**	71	82	81	82	72	82
तत्रावश्यं	61	63	65	65	**61**	61	65	65	64	61	65
तत्सन्देशं	0	0		124	**0**	0	124	122	123	0	124
तन्मध्ये च	75	87	85	85	**75**	75	86	85	86	76	86
तन्वी श्यामा	78	83	88	88	**78**	78	89	88	89	79	89
तं चेद्वायौ	53	55	57	57	**53**	53	57	57	57	53	57
तस्मादद्रेः	0	0	0	123	**0**	0	0	0	125	0	125
तस्माद्गच्छेः	50	52	54	54	**50**	50	54	54	54	50	54
तस्मिन् काले जलद !	93	1 2	103	103	**93**	93	104	103	104	94	104
तस्मिन् काले नयन०	39	41	43	45	**39**	39	43	43	43	39	43

Concordance of the verses in Meghasandeśa.—(Contd.)

Sloka	Dakṣiṇāvartanātha	Jinasena	Mallinātha	Mahimasiṃhagaṇi	**Parameśvara**	Pūrṇasarasvatī	Sāroddhāraṇī	Sarasvatītīrtha	Sumativijaya	Vallabhadeva	Viśvanātha
तस्मिन्नद्रौ	2	2	2	2	**2**	2	2	..	2	2	2
तस्य स्थित्वा	3	3	3	3	**3**	3	3		3	3	3
तस्याः किञ्चित्	41	43	45	45	**41**	41	45	45	45	41	45
तस्यास्तिक्तैः	20	20	20	20	**20**	20	21	20	20	20	21
तस्यास्तीरे	73	82	83	83	**73**	73	84	83	84	74	84
तस्याः पातुं	51	53	55	55	**51**	51	55	55	55	51	55
तस्योत्सङ्गे	63	65	67	67	**63**	63	67	67	67	63	67
तामायुष्मन् !	97	106	107	107	**97**	97	108	107	107	98	108
तामुत्तीर्य	47	49	51	51	**47**	47	51	51	51	47	51
तामुत्थाप्य	94	103	104	104	**94**	94	105	104	105	95	105
तां कस्याञ्चित्	38	40	42	42	**38**	38	42	42	42	38	42
तां चावश्यं	10	9	10	10	**10**	10	10	...	10	11	11

सा काषीया:	79	84	89	89	79	79	90	89	90	80	90
तेषां दिक्षु	24	24	25	25	24	24	2	25	26	24	26
स्वन्निष्यन्द॰	42	44	46	46	42	42	46	46	46	42	46
स्वक्यातातुं	46	48	50	50	46	46	50	50	50	46	50
?वक्यायस्तं	16	16	16	...	16	16	16	16	16	16	16
स्वामाल्कं	8	8	8	8	8	8	8	...	8	8	8
स्वामालिख्य	101	110	111	112	101	101	113	111	112	102	113
स्वामासार॰	17	17	17	17	17	17	17	17	17	17	17
दीर्घीकुर्वन्	31	31	32	34	34	33	33	32	35	31	31
धारासिक्त॰	0	0	0	111	0	0	112	0	111	0	112
धूमज्योतिः	5	5	5	5	5	5	5		5	5	5
न स्वात्मानं	105	114	115	115	105	105	117	115	115	106	117
निश्वासेन	86	95	97	94	86	86	97	96	97	88	97
वीचैराल्बं	25	25	26	26	25	25	27	26	27	25	26
नीपं दृष्ट्वा	21	21	21	21	21	21	22	21	22	21	22
नीवीबन्धो॰	67	73	74	70	67	67	73	73	76	69	74
नूनं तस्याः	80	85	90	90	80	80	91	90	91	81	91
नेत्रा नीताः	68	74	75	79	68	68	77	75	79	68	76
पश्चादुच्चैः	36	38	40	40	36	36	40	40	40	36	40
पत्रश्यामा	0	78	35	33	0	0	69	37	69	0	69
पाण्डुच्छाया॰	23	23	24	24	23	23	25	24	25	23	25
पादन्यास॰	35	37	39	39	35	35	39	39	39	35	39

Concordance of the verses in Meghasandeśa—(Contd.)

Śloka	Dakṣiṇāvartanātha	Jinasena	Mallinātha	Mahimasiṁhagaṇi	Paramesvara	Pūrṇasarasvatī	Sāroddharaṇī	Śarasvatītīrtha	Sumativijaya	Vallabhadeva	Viśvanātha
पादानिन्दोः	88	97	96	98	**88**	88	98	98	99	89	99
प्रत्यासन्ने	4	4	4	4	**4**	4	4	...	4	4	4
अप्येतस्य	0	32	34	35	**0**	0	35	33	34	0	35
प्राप्यावन्तीन्	30	30	31	31	**30**	30	32	31	32	30	32
प्रालेयाद्रेः	57	59	61	61	**57**	57	61	61	61	57	61
ब्रह्मावर्तं	48	50	52	52	**48**	48	52	52	52	48	52
भर्तुं कण्ठच्छविः	33	35	37	37	**33**	33	37	37	37	33	37
भर्तुर्मित्रं	95	104	105	105	**95**	95	106	105	106	96	106
भित्त्वा सद्यः	103	113	113	114	**103**	103	115	113	114	104	116
भूयश्चाह	107	116	117	118	**107**	107	119	117	118	108	119
मत्वा देवं	70	79	79	80	**70**	7[illegible]	80	79	81	71	79
मन्दं मन्दं	9	10	9	9	**9**	9	9	...	9	10	9

मन्दाकिन्याः	0	75	73	71	**0**	0	78	72	78	0	73
मार्गं मत्तः	13	13	13	13	**13**	13	13	...	11	13	13
मामाकाश०	102	111	112	113	**102**	102	114	112	113	103	114
यत्र स्त्रीणां	69	67	76	76	**69**	69	79	77	73	67	77
यत्रोन्मत्त०	0	70	70	74	**0**	0	75	76	77	0	81
यस्यां यक्षाः	66	72	72	77	**66**	66	71	71	74	66	71
ये संरम्भोत्पतन०	54	56	58	58	**54**	54	58	58	58	54	58
रक्ताशोक०	74	86	84	84	**74**	74	85	84	85	75	85
रत्नच्छाया०	15	15	15	...	**45**	15	15	...	15	15	15
रुद्धापाङ्ग०	91	100	101	101	**91**	91	102	101	102	92	102
वक्रः पन्थाः	27	27	28	28	**27**	27	29	28	29	27	29
वापी चास्मिन्	72	81	82	82	**72**	72	83	82	83	73	83
वामश्चास्याः	92	101	102	102	**92**	92	103	102	103	93	103
वासश्चित्रं	0	77	80	78	**0**	0	81	80	82	0	[illegible]
विद्युत्वन्तं	64	66	68	68	**64**	64	68	68	68	64	68
विश्रान्तस्सन्	26	26	27	27	**26**	26	28	27	28	26	28
वीचिक्षोभ०	28	28	29	29	**28**	28	30	29	30	28	30
वेणीभूत०	29	29	30	30	**29**	29	31	30	31	29	31
शब्दाख्येयं	99	108	109	109	**99**	99	110	109	109	100	110
शब्दायन्ते	56	58	60	60	**56**	56	60	60	60	56	60
शापान्तो मे	106	115	116	117	**106**	106	118	116	117	107	118

Śloka	Dakṣiṇāvartanātha	Jinasena	Mallinātha	Mahimasiṁhagaṇi	**Parameśvara**	Pūrṇasarasvatī	Sāroddhāraṇī	Sarasvatītīrtha	Sumativijaya	Vallabhadeva	Viśvanātha
शेषान् मासान्	83	92	93	95	**83**	83	94	93	94	84	94
श्रुत्वा वार्तां	0	0	0	125	**0**	0	125	123	124	0	126
श्यामास्वङ्गं	100	109	110	110	**100**	100	111	110	110	101	111
संक्षिप्येत	104	112	114	116	**104**	104	116	114	116	105	115
सन्तप्तानां	7	7	7	7	**7**	7	7	...	7	7	7
सव्यापारां	84	93	94	96	**84**	84	100	94	95	86	95
सा संन्यस्ताभरणं	89	98	99	99	**89**	89	101	100	100	91	101
स्थित्वा तस्मिन्	19	19	19	19	**19**	19	20	19	20	19	20
हस्ते लीलाकमलं	65	71	69	72	**65**	65	74	69	70	65	70
हारांस्तारान्	0	33	33	32	0	0	34	36	53	0	34
हित्वा तस्मिन्	60	62	64	64	**60**	60	64	64	65	60	64
हित्वा हालां	49	51	53	53	**49**	49	53	53	53	49	53
हेमाम्भोजप्रसवि	62	64	66	66	**62**	62	66	66	66	62	66